दूषितमित्यमरः। ज्योत्स्नातमिस्रेत्यादिनामत्वर्थीयोनिपातः। क्षालयितुंरवेः। ऋतेरविंविना। अन्यारादितरइतिपंचमी। कःक्षमेतशक्नुयात्
नकोपीत्यर्थः। अत्रवाक्यद्वयेसमाधानधर्मस्यैकस्यैवशिषेक्षमेतेतिशब्दद्वयेनवस्तुप्रतिवस्तुभावेननिर्देशात् तत्राधिव्यतिरेकमुखत्वाद्वै
धर्म्म्येणप्रतिवस्तूपमालंकारः। तदुक्तंसर्वस्वे। वाक्यार्थगतत्वेनसामान्यस्यवाक्यद्वये पृथक्निर्देशेप्रतिवस्तूपमा २८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा०टी०
१५ करोतीति । किं त्वज्जनो मृगाणामिव कंसादिमहीभृतां वधाद्धेतोस्तवः स्तोत्रं स्तवः स्तोत्रं नुतिः स्तुतिरित्यमरः । करोतीति यत्र । हे हरे कृष्ण
सिद्धेति व्रज्यते । सा स्तुतिक्रिया हिरण्याक्षपुरः सुरास्तत्सम्भृतयो ये असुरास्त एव द्विपास्तेषां द्विषो हन्तुरित्यर्थः । तस्मात्तव प्रस्तुते वैपरी-

करोति कंसादिमहीभृतां वधाज्जनो मृगाणामिव यत्तव स्तवम् । हरे
हिरण्याक्षपुरःसरासुरद्विपद्विषः प्रस्तुत सा तिरस्क्रिया ३९

त्येन । प्रस्तुते स्तुतेः वैपरीत्ये इति गणव्याख्याने तिरस्क्रियाऽवमानः । यदिति सामान्ये नपुंसकेति विधेयलिंगं । गजघातिनः सिंहस्य मृग
वधवर्णनमिव महदसुरहन्तुस्तव कंसादिक्षुद्रनृपवधोद्घाटनं तिरस्कार एवेत्यर्थः । अत्रासुरद्विपानां हरिवद्धरिति श्लिष्टपरंपरितरूप राम:
कं मृगाणामिवेत्युपमाया अंगांगिभावेन संकीर्यते ३९ १५

CC-0. Digitized by eGangotri and MIDF- Delhi

एवं स्तुत्वा देवमभिमुखीकृत्यागमनप्रयोजनं वक्तुमुपोद्घातमाह । प्रवृत्त इति । त्वमुज्झितश्रमस्त्यक्तश्रमः सन् क्रमेण भुवनानि द्विषन्तीति द्विषस्तेषां
पेष्टुं तान् हन्तुमित्यर्थः । जासिनिप्रहणनाथक्राथपिषां हिंसायामिति कर्मणि षष्ठी ॥ स्वयमपरप्रेरित एव प्रवृत्तोऽसि । एवं न हि पिष्टपेषतो
२ मां काशीति वेत्त्याह । तथापि स्वतः प्रवृत्तोऽपि मिथो रहसि त्वदाभाषणे त्वया सह संलापे लोलुपं लुब्धं । लुब्धोऽभिलाषुकस्तृष्णक्समौ लोलुपलोलु
भौ वित्यमरः । मनो मां वाचालतया सह युनक्ति । वाचालं करोतीत्यर्थः ॥ वाचो बह्व्योऽस्य सन्तीति वाचालः । आलजाटचौ बहुभाषिणीत्यालच् । स्याज्ज

प्रवृत्त एव स्वयमुज्झितश्रमः क्रमेण पेष्टुं भुवनद्विषामसि तथापि वाचालतया युनक्ति मां मिथस्त्वदाभाषणलोलुपं म
नः ४० तदिन्द्रसंदिष्टमुपेन्द्र यद्वचः क्षणं मया विश्वजनीनमुच्यते समस्तकार्येषु गतेन धुर्यतामहीद्विषस्तद्भव
तानिशम्यताम् ४१

ल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् इत्यमरः ॥ ४० ॥ अथ स्ववाक्यश्रवणं सहेतुकं प्रार्थयते तदिति । तत्तस्मादिन्द्रमुपगत उपेन्द्रः इन्द्रावर
जः । अत एवेन्द्रसंदिष्टं श्रोतव्यमिति भावः । किंच विश्वस्मै जनाय हितं विश्वजनीनं आत्मन्विश्वजनभोगोत्तरपदात्खः । यद्वचः क्षणं
ननु विस्मयोच्यते तद्भवोऽहिद्विघ्नोऽत्र घ्नः । सर्पवृत्रासुरेष्वहिरिति वैजयन्ती । समस्तकार्येषु धुर्यतां धुरंधरत्वं गतेनातोऽपि भवता निशम्य
तां श्रूयतां । प्रार्थनायां लोट् । धुरं वहतीति धुर्यः । धुरो यड्ढकाविति यत्प्रत्ययः । स्फुटमत्र पदार्थहेतुकं काव्यलिङ्गमलंकारः ॥ ४१ ॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टी॰ अथ शिशुपालो हन्तव्य इति वक्तुं तस्याऽवध्यत्वे नानन्यवध्यत्वापकौ नौपायिकतयान्तदो द्व्यप्रकटनार्थं जन्मान्तरवृत्तान्तं तावदुद्घाटयति
१६ ॥अभूदिति। प्रतिपक्षाच्छत्रोर्जन्म यासां भियाम् अभूमिरविषयो निर्भीक इत्यर्थः। तपनद्युतिः। सूर्यप्रतापो दितेः तनूजो दैत्योऽभूत्। कोसाव
त आह। हरेरिन्द्रस्येन्द्रशब्दार्थनिषूदनं। इदंतीतीन्द्रः। इदि परमैश्वर्ये। ऋज्रेन्द्रेत्यादिनारप्रत्ययान्तेउणादिको निपातनः। तस्येन्द्रशब्दस्योऽ
इति संज्ञापदस्य योऽर्थः॥ परमैश्वर्यलक्षणस्तस्य निषूदकं निवर्तकं। कर्त्तरिल्युट्। हरैश्वर्यहर्त्तारमित्यर्थः। यं दैत्यं हिरण्यपूर्वात् पूर्वक

अभूदभूमिः प्रतिपक्षजन्मनां भियां तनूजस्तपनद्युतिर्दितेः यमिन्द्रशब्दार्थनिषूदनं हरेर्हिरणपूर्वकशिपुं प्रचक्षते ४२

शिपुं प्रचक्षते हिरण्यकशिपुमित्यर्थः। अत्र हिरण्यशब्दपूर्वकत्वं कशिपुशब्दस्यैव न तु संज्ञिके नस्तदर्थस्येति शब्दपरस्य कशिपुशब्दार्थस्यागतत्वे
नाप्रयोज्यस्य परप्रयोगाद्वाच्यवचनार्थत्वं दोषमाह। पदवाच्यवचनमवाच्यवचनं हि नत दिति। समाधानमेवं ध। भिषयेशब्दपरेणाप्यर्थलक्षणा
तिकथं विसंपाद्यमित्युक्तमस्माभिर्देवपूर्वं गिरिमिति। घनरूपपदमस्मैवेदमवादि देशोत्सेव न तद्व्याख्यानावसरे संजीविन्यां घंटापथे च विशे श्रीरामः
षश्चात्र। यं दैत्यमुद्दिश्य हिरण्यपूर्वकशिपुशब्दं प्रचक्षते॥ ॥ संज्ञात्वेन युक्तेः॥ ४२॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ १६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यदुक्तं योगिनामपि त्वमेव साक्षात्करणीय इति तद्देवदृष्टमिति। उदीर्णरागेति। उदीर्ण उद्रिक्तो रागो विषयाभिलाषः स एव प्रतिरोधकः प्रतिबंधकः।
तं पान्थरम्ध्रयस्मिन्नौ। प्रतिरोधिपरास्कंदिपाटच्चरमलिम्लुचाद्दस्यवः। अभीक्ष्णमक्षुण्णतया ऽनभ्यस्तत्वेनाप्रहतत्वेन वज्जनैरतिदुर्गमं मोक्षपथ
मपवर्गमार्गं कान्तारं वोपेयुषः। प्राप्तवतः। उपेयिवाननाश्वाननूचानश्च इति क्वसंतो निपातः। मनस्विनः सुमनसो धीरस्य प्रशंसायां विनिः त्वमेवानिर

उदीर्णरागप्रतिरोधकं जनैरभीक्ष्णमक्षुण्णतयातिदुर्गमम् उपे
उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमिर्निरपायसंश्रया ३२ छु

पायः। पुनरावृत्तिरहितः। संश्रयः प्राप्तिर्यस्याः सा तथोक्ता। न स पुनरावर्तते इति श्रुतेः। अग्रभूमिः प्राप्यस्थानं। अग्र्यमालंबनेप्राप्य इति विश्वः। सोहमि
त्यादिश्रुतेः। तत्प्राप्तेरेव मोक्षत्वादिति भावः। तस्मान्मुमुक्षूणामपि त्वमेव साक्षात्करणीय इति सिद्धं। तमेव विदित्वा ऽतिमृत्युमेति नान्यः पंथा वि
द्यते ऽयनायेति श्रुतेः। यथा कस्यचित् कुतश्चित्संकटान्निर्गतस्य केन चित्कान्तारेणागतस्य किंचिन्निर्बाधस्थानप्राप्तिरपायकल्पते। तथात्र म
पि मुमुक्षोरपि ध्वनिः ३२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा० टी० नतु प्रकृतिविविक्तपुरुषसाक्षात्कारान्मोक्षो नास्य साक्षात्कारादित्याशंक्य सो पि त्वमेवेत्याह । उपासितारमिति ॥ पुराविदः पूर्वजाः कपिलादयस्त्वां नि-
१२ गृहीतमानसैरंतर्निबद्धचित्तैर्योगिभिरात्मन्यधीत्य ध्यात्वा । विभक्त्यर्थे ऽव्ययीभावः । अनश्चेति समासांतो टच् । यद्वा ग्रहीतं ज्ञानेनांतर्गतया अध्यात्म ... टच् । प्रत्य-
गृह्य । कथंचन गृहीतं साक्षात्कृतं । केन रूपेण गृहीतं इत्यत आह । उपासितारं उदासीनं प्रकृतौ स्वार्थं प्रवृत्तायामपि स्वयं कृतत्वादस्पृष्टं इत्य-
र्थः ॥ आसमंतात् । विकारेभ्यो बहिः । बहिर्विकारं । महदादिभ्यः पृथग्भूतमित्यर्थः । अपपरिबहिरंचवः पंचम्येत्यव्ययीभावः । किंच । प्रकृतेस्त्रैगुण्या-

उपासितारं निगृहीतमानसैर्गृहीतमध्यात्मदृशा कथंचन बहिर्वि-
कारं प्रकृतेः पृथग्विदुः पुरातनं त्वां पुरुषं पुराविदः २३ ६ ७

त्मनो मूलकारणात्पृथग्भिन्नं । प्रकृतिः पंचभूतेषु प्रधाने मूलकारणे इति यादवः । पुराभवं पुरातनं अनादिं । सायंचिरमित्यादिना ट्युप्रत्ययः । पुरुषपद-
वाच्यं विज्ञानघनं विदुर्वदंति । विदो लटो वेति उसादेशः । यथाहुः ॥ मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडशकश्च विकारो न प्रकृ- राम: १२
वि तिर्न विकृतिः पुरुष इति । अजामेकां लोहितशुक्लकृष्णामित्यादिश्रुतेश्च । सोपि त्वमेव । तत्त्वमस्यादिवाक्यैरैक्यश्रवणात् । तस्मात्त्वमेव साक्षात्करणीय
इति सूक्तमिति भावः २३

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी० अस्योद्धत्यमष्टादशश्लोक्यावष्टे। प्रभुरिति। यो रावणो भुवनत्रयस्य प्रभुः स्वामी विभूषुर्भवितुमिच्छुर्नु। भवतेः सन्नंताडुः प्र
१९ त्ययः। अतिरागादत्युत्साहान्नतु फलविलंवननिर्वेदादितिभावः। दशामप्यशिरांसि शिरश्छिकर्त्तिषुः कर्तितुमिच्छुः। कृ
तीछेदन इति धातोः सन्नंतादुः प्रत्ययः। इष्टसाहसः प्रियसाहसः। अत एवेच्छासदृशां स्वेच्छानुरूपां पिनाकिनः प्रसादं वरं विघ्नमिवा
तर्कयत्। उत्प्रेक्षितवानिति परसाहसिकत्वोक्तिः। इत आरभ्य श्लोकषट्के पि यदृच्छकस्य सरावणो नाम रक्षो बभूवेति पूर्वेणान्वयः

प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोतिरागाद्दशमं विकर्त्तिषुः अ.
तर्कयद्विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः ४९

रंगराजस्तु नन्वक्रमस्याक्रमताधिकं धरमितु परिष्टादन्वय इत्याह। तदसत्। उणानां त्रयपरार्थत्वादितिन्यायाद्दासत्वपादिवप्रत्येकं
प्रधानाधियिनां मिथः संबंधायोगादित्यलं शास्त्रावक्रमणेन। पुरा किल रावणः कोप्येकमेणि प्रजापतिप्राणनायनवनि शिर रामः
भि अग्नौ कृत्वा दशमारंभे संतुष्टात्स्मात्। त्रैलोक्याधिपत्यं वव्रे। इत्युत्तरकांडोक्ता कथात्रानुसंधेया ॥४९॥ ॥ ॥ ७ ॥ ॥ १९

ग

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथास्यानंतरजन्मन्येव स्थितान्याचष्टे। विनोदमिति। अथ सहिरण्यकशिपुः पुनर्भूयोपि त्रिदशैः समं सह। साकंसत्रासमंहेत्यमरः॥रणो समं१
नदर्पादिन्नः। सा राज्यजन्मयस्यास्तस्याः कंड्वाः भुजकंडूते र्विनोदमपनोदमिच्छन्। प्राग्भवे नरवक्षतैस्तदपनोदाभावादिति.
भावः। दिवं स्वर्गस्य क्षतरक्षणं रक्षा येन तत्तम्। क्षतस्य रक्षणो मित्यसापेक्षत्वेपि गमकत्वात्समासः। अनेन देवसर्वस्वापहारित्वमुक्तं
भीषयइति भीषणं। नंद्यादित्वाल्ल्युः प्रत्ययः। निकामं भीषणं। सुप्सुपेति समासः। रावणो नाम। रावण इति प्रसिद्धं। रक्षो बभूव। रा

विनोदमिच्छन्नथदर्पजन्मनोरणेनकंड्वास्त्रिदशैःसमंपुनः
सरावणोनामनिकामभीषणंवभूवरक्षःक्षतरक्षणंदिवः॥४८

क्षसयोनौ जात इत्यर्थः। विश्रवसोऽपत्यं पुमानीति रावणो विग्रहः। तस्यापत्यमित्यण्। विश्रवसो विश्रवणरवणाः इति प्रकृतेरव
णादेशः। पौराणिकास्तु रावयतीति व्युत्पादयंति। तदुक्तमुत्तरखंडे। यस्माल्लोकत्रयं चैतद्रावितं भयमागतं। तस्मात्त्वं रावणो नाम ९
नाम्ना वीरो भविष्यसीति। रौतेर्णिजंतात्कर्त्तरि ल्युट्। रावणो राक्षसयोनियतलिंगत्वाद्विशेषणविशेष्यभावेपि स्वलिंगता॥४८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टी० सोपि त्वय्यैव हन्त ऽस्याह । सटाछटेति । हे नरसिंह नरः सिंह इवेत्युपमितसमासः । नावासौ सिंहश्चेत्यपि प्रस्तावात् । सिं
१८ हस्येमांसैहितामूर्त्ततनुमनल्पां तनुं कायं विभ्रता नरसिंहावतारभाजा ऽस्मत्प्रभुः । अत एव सटाछटाभिः केसरसमूहैर्भि
नेनरू न्नाघनामेघा येन । अभ्रंकषविग्रहत्वादिति भावः । सटाछटाकेसरयोस्तनूः कायेऽल्पोल्पेवेति विश्वः । त्वया सदैत्यो

सटाछटाभिन्नघनेन विभ्रता नरसिंह सैंहीमतनुं तनुं त्वया । स
मुग्धकान्तास्तनसङ्गभङ्गुरैरुरोविदारं प्रतिचस्करे नखैः ४७

मुग्धौ नवौ । सोऽप्यनवैमूढ इति वैजयन्ती । यौ कान्तास्तनौ तयोः संगेनापि भंगुरैर्नखैरुरोविदार्येति । उरो विदारं परिक्लि
रूपमानेचेति णमुल् । प्रतिचस्करे हतः । किरतेः कर्मणि लिट् । उपस्कारतामिति सुट् । हिंसायां प्राप्ते अश्वेति सुडाग राम:
मः । वज्रकठिनोपि नखैर्विदारित इति । अवाङ्मनसगोचरमाहिम्नस्ते किमसाध्यमिति भावः ॥ ४७॥ १८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सरति॥ अन्येषु भुवनेषु अवनांतरेषु। सुप्सुपेति समासः। संवरिष्णुः। संवरणशीलः। अलंकृञ् इत्यादिना वरेरिष्णुच्प्रत्ययः। श्रिय आ
श्रयः। स हिरण्यकशिपुः। यदृक्कृपायास्वैरहृत्या। यदृच्छास्वैरतेत्यमरः॥ यां दिशं मा सिश्रियत्। श्रयतेर्लुङि णिश्रीत्यादिना चङि द्विर्भा
वः। ई आदेशः। मुकुटोपलेषु मौलिरत्नेषु सबलं नतं कंधरो येषां तैः शिरस्सु बद्धांजलिभिरित्यर्थः। उपलः प्रस्तरे रत्ने इति विश्वः। तिस्रो द

स संवरिष्णुर्भुवनांतरेषु यां यदृच्छया शिश्रियदाश्रयः श्रियः। अकारि तस्यै
मुकुटोपलस्खलत्करैस्त्रिसंध्यं त्रिदशैर्दिशे नमः॥ ४८॥ ॥ ॥

शा अवस्था बाल्यं कौमारं यौवनानि जन्मसत्ता वृद्धयो वयो येषां ते त्रिदशा देवाः। यद्वा त्रिदशापरिमाणमेषामिति बहुव्रीहौ संख्येये डच्
ज डच् बहुगणात्। तिस्रः संध्याः समाहृता इति त्रिसंध्यं तद्धितेत्यादिना। समाहारे द्विगुः। द्विगुरेकवचनं। पात्राद्यंत इति पक्षे नपुंसकत्वं अत्यं ॐ
तसंयोगे द्वितीया। तस्यै दिशे नमः। स्वस्तीत्यादिना चतुर्थी। नमो नमस्कारोऽकारि। कृञः कर्मणि लुङ्। चिण्भावकर्मणोरिति च्लेः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टी॰ पुरारीति। किंच। किन्नांसुरारीणांगणैर्यहरिरूपकं प्रमादशंक्यवाधकत्वे नोत्प्रेक्ष्य सकाल आदिय स्मिन् तत्तदादि तदा पुमन्तिस्वरूपशोभैकैकं फ
२२ लं सुखं प्रयोजनं येषां पुरादीनां तान्निति थोक्तानि। प्रागीदृशासाध्यशात्रुभावादितिभावः। नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्यामिति
नपुंसके कशेषः। पुरारिशिदुर्गा रिप्राकारपरिखादिभिरगम्यानि चक्रिरे सुदुरोरूपंसंख्यानमितिगुमेउः। आयुधं निशातं निशितं चयच्छे

पुरारिदुर्गारिनिशातमायुधं बलानि भूरारिघनाश्चकुं
तुकाः॥ स्वरूपशोभैकफलानिनाकिनां
गणैर्यमाशङ्कितदा दिवंक्रिरे॥४५॥

शोतनूकरणा इति धातोः क्तः। शंबोरन्यतरस्यामिति विकल्पात्पक्षे आत्वं। बलानि सैन्यानि भूरारिगौर्यवंतिचक्रिरे। संपादितानि कंचुकावारवाण
व लौहभौरागीत्यर्थः। कंचुको वारवाणोऽस्त्रीत्यमरः। घनादुर्भेदाश्चक्रिरे। इत्यनित्यसन्नद्धाजायतीत्यर्थः॥४५॥ ॥ रामचन्द्रायनमः राम:
२२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समत्सरेणेति। समत्सरेणासवैरेणासूयतीतिअसुरः। असेरुरन्। असुरनाम्नश्चिरायचिरकालेनचिरायचिरराज्ञायचिरस्थायी चिरार्थकाःइत्यमरः। प्रथ
माभिधेयतांउपेयुषांअन्वर्थतयामुख्यार्थतांगतेनतरस्विनाबलवतासर्वबलदाहसौधिष्ठःयेनहिरण्यकशिपुना। दिविसीदन्तीतिद्युसदांदेवानां
मनस्सुभयस्यपूर्वावतरःप्रथमप्रवेशः। ऋदोरप्। न्यधीयतनिहितः। ध्यायःकर्मणिलङ्। अस्मादेवदेवानांभयस्योत्पत्तिरभूदित्यर्थः॥४२॥ दि
शामिति। श्रियःसंपदोयतोयदन्तर्थः। दिशामधीशान्दिक्पतीन्चतुरःसुरान्इन्द्रयमवरुणकुबेरानपास्यविहायतंहिरण्यकशिपुंरा

समत्सरेणाऽसुरइत्युपेयुषाचिरायनाम्नःप्रथमाभिधेयताम्॥ भयस्यपूर्वावतरस्तरस्विनामनस्सुयेनद्युसदांन्यधी
यत॥४२॥ दिशामधीशांश्चतुरोयतःसुरानपास्यतंरागहतासिषेविरे॥ अवापुरारभ्यततश्चलाइतिप्रवादमु
॥ ॥ च्चैरयशस्करंश्रियः॥४३॥

गहतारागाकृष्टाःसंत्योनतुबलादितिभावः। सिषेविरे। यतोवीरश्रीयाःश्रियइतिभावः। ततआरभ्यततःप्रभृति। अयशस्करोतीत्ययशस्करंदुःकी
र्तिहेतुकमित्यर्थः। कृञोहेतुताच्छील्यानुलोम्येष्विति टप्रत्ययः। कमीत्यादिनाविसर्जनीयस्यसत्वं। उच्चैःप्रभूतंचलाइतिअस्थिराइतिप्रवादंज
नवादंअवापुः॥ ॥ दिग्जिगीषूनामपिसर्वस्वहारित्वात्तदौद्धत्यस्यपराकाष्ठेतिभावः॥४३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



वहिः पुरतः कथं भर्वतीक्षते इदं तु चित्रं यश्रुती सामीप्यस्थ व्यवधानस्यापि दर्शनप्रतिबन्धकत्वादिति भावः प्रेमास्पदं वस्तु परोक्षमप्यपरोक्षमीक्षते इ
८२ तं दयोः क्षपि परोक्षमेवेति तात्पर्यार्थः विरोधाभासयोः संकरः ॥ ८१॥ इतीति ॥ इत्यभिधाय पुरो गन्तुमिच्छुः क्षणं दृष्टोः पातेन विकसद्वदनां परस्य
दृष्टिमात्रगतकोपामित्यर्थः कांचिन्नायिकां तरुणो युवा स्वकरपल्लवेन प्रियकरेणाग्रहणात्तेन विमुक्ता मुक्तचन्धना ऽतएव गलन्ती स्त्री वमा नाय
लाम्बुरा कांची यस्मिन्कर्मणि तत्र यथा तथा ग्रहणात् रुद्धवान् इत्यादिभ्यः क्षमम् ॥ स्वाकल्पसान्तरिता ॥ ८२॥ अपयातीति ॥ सरोषयाम्य
गाक्षणं कामिनि निरस्ते अपयाति निर्यातिसति कृतकं कृत्रिमं यथा तथा सुप्तुवे तल्लिगम प्रतिबन्धार्थं कृतमित्यर्थः क्षणं देमा वे दृ इत लि

इति गन्तुमिच्छुमभिधाय पुरः क्षणाद्दृष्टिपातविहसद्वदनां स्वकरपल्लवतस्त्वं विमुक्तगलत्कलकांचिकांचिद्रुरोध तरुणः ॥ ८२॥
अपयाति सरोषया निरस्तः कृतकं कामिनि चुक्षुवे मृगाक्ष्या कलयन्नपि सव्यथोऽवतस्थौ प्रकुतेन स्खलितः किलेनरोधि ८३ ८३
आलोक्य प्रियतमं शुके वितीर्णो यत्र स्थेनमितमुखेन्दुमानवत्या तेनूनं पदमवलोकयांवभूवे मानस्य द्रुतमपयातुमास्थितस्य ८४

तेपि नायकोपि कलयन्नपि कृतकोपमिति ज्ञात्वापि केशो नेन स्खलितः किल निरुद्धः सव्यथः स निर्वेदः इर्व्यवतस्थेऽस्थितः न गत इत्यर्थः उभावपि स
मानानुरागाविति भावः सपाचकलहान्तरिता ॥ ८३॥ आलोक्येति ॥ मानवत्या कोपवत्या स्त्रिया स्त्री शुकीमीर्व्यीकृतः को सो मानोन्यासे नितिप्रिये
प्रियतमसमालोक्य स्थित्या समानकर्तृत्वान्ति दर्शः अंगुके विनीचोपि यालोकनाद्विगलितं वन्धे सति भाषितपुंस्कत्वात् पुंवद्भावः स्त्री कटीवस्त्र
वन्धेपि नीवीपरिपणोपि चेत्यमरः नमितं मुखेन्दुयथा तथा नस्थोस्थितं इति यत्तत्तस्मान्नम्रमुखावस्थानात् इत्तं श्रीपुंप्रियालोकनदक्षयाः
एवेत्यर्थः अपयातुमास्थितस्य प्रयाणागतस्य मानस्य कोपस्यपदं पदचिह्नमवलोकयांबभूवे अन्वेषितमित्यर्थः लज्जालितितिनाथा मुखान
ते अन्वेषणार्थत्वमुक्तेक्षते नूनमिति मानगन्तोव्यक्तमिति इति भावः ॥ ८४॥ ७॥ ७॥ ७॥ ७॥ ७॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

९

मा०टी० सुदृशइति। सरसमार्द्रं नूतनमिति यावत् तेन व्यलीकेनापराधेन तत्पः तस्या यौवनोष्मणा समुद्धवर्तन इति स यौवनोष्मा किंच स्मरानलोष्णः कामाग्निसंतप्तः
१८ एवं विविधाग्निना सोपि सुदृशः स्तनभारेसावेगेन त्वरितदाहदृशा यामेवेत्यर्थः। आश्लिष्टवत आलिंगितवतः प्रियस्य कथमपि कथं वा कुतो हेतोरित्यर्थः
७३ नखैर्वचति क्वाथयति इति नखंपचः मितनखे चेति खश् प्रत्ययः अरुर्द्विषदजन्तस्य मुमिति मुमिति मुमागमः नाभवत् तयोः काइर्यदृशोपि नाभूदित्यर्थः। प्रि
यांगसंगप्रतीकाराः खलु कामिनां संतापा इति भावः तापद्वयस्य संबन्धेप्यसंबन्धोक्तेरतिशयोक्तिः॥८५॥ दधतीति। गुरुमरुद्दशीतलं स्मरयौवनोष्मण्या
मुन्नमुरोजद्वयं कुचयुगं दधती भुजलतालग्नताः स्वयं साक्षाद्दुर्वशीव स्थिता कृत्नुन्धेक्षा काचित्स्त्री अप्रतिमेन मुखेन वभौ तां प्रतिमेन कामिन का ख्याऽस
राः स्विस्त्रियास्तन्व्याः गाधिकेत्यतिशयोक्तिः तयोर्धर्मकेन संसृष्टिः। वंशस्थवृत्तं॥८६॥ इत्थमिति। इत्थमनेन प्रकारेण इमस्यु मुरिति प्रभुप्रत्यचः सपदि

म१

सुदृशः सरसव्यलीकनखांशस्मात् श्लिष्टवतः स यौवनोष्मा कथंचन भवत्स्मरानलोष्णः स्तनभारो न नखंपचः प्रियस्य: ८५ दधत्युरोजद्वयमुर्वशीतलं भुजो
गते चस्वयमुर्वशीतलं वभौ मुखेनाप्रतिमेन काचन श्रियाधिकत्तां प्रतिमेन काचन ८६ इत्थं नारीर्घटयितुमलं कामिभिः कामासन्नाले यांशोः सपदि
हृदयः शान्तमानान्तरायाः आचार्यत्वं रतिसुविकसन्मन्मथश्रीविलासा हीधूसूरद्रुमकुशलाप्रियत्वमश्रूकुशला॥८७॥ इति श्री माघकाव्ये प्रदोषव
र्णनो नाम नवमः सर्गः॥९॥ ॥
८८ शान्तः शमितो मानः कोपरूपो नरायो वा येस्ताः वाशान्तेत्यादिना शमेरर्थपन्ता शान्तेति निपातः प्रालेयांशोश्चन्द्रस्यरुचयो

९१ नारी कामिभिः घटयितुं मिनां दूत्यः पर्याप्ति वचने अलमर्थेष्विति तुमुन्प्रत्ययः कामं प्रकामं अलं समर्थो अपि तु दूत्यइवेतिभावः विलसंतो मन्मथश्रीविलासा
मणितसीत्कारादिमदनातिरेकविकारायाभिस्ताः हीरेव धम्भूहो विघ्नस्तस्य प्रशमने निवारणे कुशलाः प्रेरते आमिरितिश्रीधवो मदिराः पीडो धुजित्यौरणा
दिको धुकप्रत्ययः आसां रतिषु आचार्यत्वमाश्चर्यं कर्कं उपदेष्टांचकुः मर्मसरत्व इत्यर्थः इति भावः अत्र प्रथमार्थे प्रस्तुतचन्द्रमासां मानशमनकामिघटन
पाटवविशेषणसाम्यादप्रस्तुतदूतीत्वप्रतीतेः समासोक्तिः। द्वितीयार्थे तु श्लेषानुप्राणितस्याचार्यत्वस्य प्रकृतोपयोगात् रूपकम् तयोः सापेक्षत्वात् संकरः तेन
दूतीनर्मसख्युपमाध्वनिः उत्तरसर्गे मधुपानरतोत्सववर्णनाय प्रस्तावः। मंदाक्रान्तावृत्तं मंदाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत्॥८७॥ इति श्री

लाऽ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वलोर्मिभिरिति॰ वलान्पूर्णयइवतैर्वलोर्मिभिः॰ वलयैःकंकणैरिवतत्क्षणेहरिनिःक्रमणक्षणेऽवहीयमानाःक्षिप्यमाणारथ्याभुजाइवयस्यास्तस्याः॰ अतएवास्याःपुरोद्वा
रवत्याश्चक्रपाणौकृष्णेनिःक्रामतिनिर्गच्छतिप्रायेणभूम्नाद्वारवतीत्वंद्वारकात्वंस्वरूपमितियावत्॰ नादिष्टंनासीत्॰ हरिविरहेतद्वैफल्यादितिभावः॰ द्वारवतीद्वार्द्वस्यसं
ज्ञास्तात्॰ त्वतल्योर्गुणवचनस्येतिनपुंवद्भावः॰ अत्रद्वारवतीत्वंद्वारवत्त्वंनेष्टंतस्यहरिनिःक्रमणहेतुत्वादित्युभयथाप्युपमितभुजवलयगलनहेतुत्वादुपमासंकीर्णायमनि

वलोर्मिभिस्तत्क्षणहीयमानरथ्याभुजायावलयैरिवास्याः॥ प्रायेणनिष्क्रामतिचक्रपाणौनेष्टंपुरोद्वारवतीत्वमासीत्॥६९॥ पारेजलंनीरनिधेरप
श्यन्मुरारिरानीलपलाशराशीः॥ वनावलीरुत्कलिकासहस्रप्रतिक्षणोत्कूलितशैवलाभाः॥७०॥

इत्युत्प्रेक्षाप्रायेणेत्यनेनव्यज्यते॰॥६९॥ अथसर्ग
समाप्तेःसमुद्रंवर्णयति॰ पारइति॰ मुरारिर्नीरनिधेःसमुद्रस्यजलानांपारेपरतीरेपारेजलं॰ पारावारेपरार्वाचीतीरेइत्यमरः॰ पारेमध्येषष्ठ्यावेत्यव्ययीभावः॰ तत्संयोगादे
कारान्तत्वंच॰ पारेशब्दस्यसमन्तान्नीलाःपलाशानांपत्राणांराशयोयासांताःहरितपर्णपूर्णाइत्यर्थः॰ पत्रंपलाशंछदनमित्यमरः॰ अतएवोत्कलिकाःउर्मयः॰
उर्मिरुत्कलिकोल्लोलइतिविश्वः॰ तेषांसहस्रंतेनप्रतिक्षणमुत्कूलिताःकूलंप्रापिताइत्यर्थः॰ उत्कूलशब्दात्करोतेर्ण्यन्तात्कर्मणिक्तः॰ तेषांशैवलानामाभे
वाभायासांतास्तत्सदृशीर्वनावलीःकाननश्रेणीरपश्यत्॰ अत्रोत्कूलितशैवलस्यस्वतःसिद्धसन्देहात्तदुपमोत्प्रेक्षयोःसन्देहसंकरः॥७०॥ ७०॥ ७०॥ ७०॥०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



लक्ष्मीभृत इति· असौ हरिर्लक्ष्मीः शोभां श्रीदेवीं च बिभ्रतीति लक्ष्मीभृतः तान् अंभोधितटेऽधिवासो येषां तान्· नीरदवन्नीलं भासो नीलवर्णान् लतावधूः इवेत्युपमित
न समासः· अन्यत्र लता इव वध्व इति शाकपार्थिवादित्वान्मध्यमपदलोपी समासः· ताभिः संप्रयुज्यन्त इति संप्रयुजः ताः संगतान्· क्विप्· अधिवेलं वेला
यां विभक्त्यर्थेऽव्ययीभावः· द्रुमान्बहूकृतान् अनेकीकृतान् स्वान्स्वकीयविग्रहानिवेत्यर्थः· एवं च पुंस्त्रिंगतानिर्वाहः· आत्मपरत्वेन पुंसकत्वापातात्·।
स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन इत्यमरः· पश्यति स्म· श्लेषसंकीर्णोयमुत्प्रेक्षा·॥७१॥ आश्लिष्टेति· आश्लिष्टभूमिमालिंगितभूतलमुच्चै

लक्ष्मीभृतोंऽभोधितटाधिवासान्द्रुमानसौ नीरदनीलभासः॥ लतावधूसंप्रयुजोऽधिवेलं बहूकृतान्स्वानिव पश्यति स्म·॥७१॥
आश्लिष्टभूमिं रसितारमुच्चैर्लोलद्भुजाकारबृहत्तरंगम्·॥ फेनायमानं पतिमापगानामसावपस्मारिणमाशशंके·॥७२॥

रसितारं क्रन्दितारं· लोलता वलिता भितस्ततः पतितो भुजानामाकार इवाकारो येषां ते बृहन्तस्तरंगा यस्य तं तथोक्तं फेनायमानं फेनमुद्वमन्तं· फेनाच्चेति
बकार्यमिति क्यप्· वाक्यष इत्यात्मनेपदम्· अपां समूहः आपं· तस्य तत्समूह इत्यण्· तेन गच्छन्तीत्यापगाः तासां पतिं समुद्रमसौ हरिरपस्मारिणमपस्मार
रोगिणमाशशंके· तर्कयामासेत्यर्थः· यथाहुः नैदानिकाः· दुर्धातुभिराहतेऽथ मनसि प्राप्तमनः संज्ञोऽशनन् दन्तान् खादति फेन
मुद्गिरति दोः पादौ क्षिपन्मूढधीः॥ पश्यन् रूपमसन्निक्षितोऽभिपतति प्रायः करोति क्रियाविभ्रान्तं स्वयमेव नाग्यतिगते वेगे त्वपस्मारकः॥७२॥

श्रीः
२०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पीत्वेति॰ जलानां निधिना समुद्रेण अगाधं स्वगाधं॰ अपोपस्यादिवशात्तूर्वर्णादित्वात्स्वार्थे ष्यञ्॰ तदतिमात्रमतिगाधं मतस्मान्न लाभरादित्यर्थः॰ गधेः पुन
रोगुणः॰ वान्तोयि प्रत्यय इति गाधेवमिति स्यात्॰ पीत्वा॰ क्षेपणक्रियापेक्षया पूर्वकालता॰ अथ वृद्धिंगते आत्मनि स्वदेहे एवान्तोदधेः समुद्रस्य वृद्धिरित्यागमः॰ नैव मांती
त्ति रिश्रमाना इत्यर्थः॰ माते: शतरि ङीप्॰ आच्छीनद्योर्नुम्॰ क्षिप्ताः त्रुटीर्णाः आनितः तस्य योत्कलं पीत्वान्तरमाना हृदि हृतानाद् इत्यर्थः॰ इन्दोः रत्नौ मरीचि
रिवस्तुलेखा॰ सहर्षिर्धिवेलमधितीरं॰ वेलाकूलविकारयोरिति विश्वः॰ मुक्तावलीराकलयांबकार॰ आकलयामास॰ कलतिः कामधेनुः॥१३॥ साटो

पीत्वा जलानां निधिनातिगाधं वृद्धिंगते थात्मनि नैव मान्तीः॥ क्षिप्तास्तदिन्दोः सहर्षोधितीरं मुक्तावलीराकलयांबकार॥१३॥
साटोपमुर्वीमनिशं नदन्तो यैः प्लावयिष्यन्ति समन्ततोमी॥ तान्येकदेशान्निभृतं पयोधेः सोंऽभांसि मेघान्पिबतो ददर्श॥१४॥ ॥
उद्गत्य मेघैस्तत एव तोयमर्थं मुनीन्द्रैरिव संप्रणीताः॥ आलोकयामास हरिः पतन्तीर्नदीः स्मृतीर्वेदमिवांबुराशिं॥१५॥ ॥

पमिति॰ अमी मेघाः साटोपं ससंभ्रमं॰ संभ्रमाटोपसंरंभा इति यादवः॰ अनिशं गर्जन्तः येरंभोधिरुर्वीं समन्ततः प्लावयिष्यन्ति तानि अंभांसि पयोधे
रेकदेशादेककोणान्निभृतं निश्चलं पिबतो मेघान् हरिर्ददर्श॰ एतेन समुद्रस्य नदन्तो परिच्छिन्नरूपत्वं व्यज्यते॥१४॥ उद्गत्येति॰ मुनीन्द्रैस्ततो वेदादर्थ
मिव मेघैस्ततोंबुराशेरेव तोयमुद्गत्य संप्रणीताः कृताः अंबुराशिं पतन्तीः प्रविशन्तीः नदीर्वेदं पतन्तीः स्मृतीर्मन्वादिसंहिता इव हरिरालोक
यामास स्मृतिमूलत्वेन प्रामाण्यात् स्मृतीनां तत्संवाद एव तत्संप्रवेशः॰ अनेकेयमुपमा॥१५॥ श्रीहरिकृष्णनारायणगोविन्दमुरारि॰

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टि·व·
२१

विक्रीयेति· दिक्षु भवानि दिक्स्थानि दिगन्तरादानीतानीत्यर्थः· दिगादिभ्यो यदिति यत्· उद्धृतानि महान्ति धनानि नानाद्रव्याणि विक्रीय मूल्येन दत्वा उत्त
मलाभभाजः· उत्तमलाभं द्विगुणादिकं भजन्ति तान्· तत्र त्वं द्रष्टुमिच्छामीत्यर्थः· अथ यात्राप· अफल्गु सारवत्· फल्गुस्तुच्छमसारं चेति यादवः· भांडं
मूलधनं पणपद्रव्यमित्यर्थः· वणिग्मूलधने पात्रे भांडं भूषायां च भूषयोरिति वैजयन्ती· तरीषु नौषु· स्त्रियां नौस्तरणिस्तरिरित्यमरः· अवितृस्तृतं(
त्रिभ्य ईरिति औणादिकः प्रत्ययः· आवपतः आढ्यतः· वपतेः शतृप्रत्ययः· द्वैप्यान् समुद्रद्वीपवासिनः· द्वीपादनुसमुद्रं यञिति यञ्प्रत्ययः· संयात्रा सं(

विक्रीय दिक्स्यानि धनान्युरूणि द्वैप्यानसावुत्तमलाभभाजः। तरीषु तत्रत्यमफल्गु भांडं सांयात्रिकानावपतोऽभ्यनन्दत्॥१६॥
उत्पित्सवोऽन्तर्नदभर्तुरुच्चैर्गरीयसः निःश्वसितानिलेन। पयांसि भक्त्वा गरुडध्वजस्य ध्वजानिवोद्विक्षिपिरे फणीन्द्राः॥१७॥
तमागतं वीक्ष्य युगान्तबन्धुमुत्संगशय्याशयमम्बुराशिः। प्रत्युज्जगामेव गुरुप्रमोदप्रसारितोत्तुंगतरंगबाहुः॥१८॥ ॥·

भूय यात्रा सामप्रयोजनं येषां तान् पोतवणिजः· सांयात्रिकः पोतवणिगित्यमरः· प्रयोजनमिति ठक्· अभ्यनन्दत्· तानग्रतः शकुनभूतानवलोक्य
तुतोषेत्यर्थः·॥१६॥ उत्पित्सव इति· नदभर्तुः समुद्रस्यान्तरभ्यन्तरादुत्पित्सवः· उत्पतितुमिच्छवः· पततेः सन्नन्तादुप्रत्ययः· सनिमीमेत्यादिना इसादेशः·
अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः· फणीन्द्राः सर्पाः भक्त्वा गरुडध्वजस्य हरेर्ध्वजानिव गरीयसातिमहता निःश्वसितानिलेन मुखमारुतेन पयांसि उच्चैरु(
द्विक्षिपिरे· उत्क्षिप्तवन्तः· उत्प्रेक्षा· स्वरितत्वादात्मनेपदम्· १७॥ तमिति· अम्बुराशिर्युगान्तबन्धुमापद्बन्धुमित्यर्थः· उत्संग एव शय्या तत्र शेत इति त

[illegible] ...प्रत्युज्जगामेवेति क्रियास्वरूपोत्प्रेक्षा·॥१८॥

श्रीः १
२१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्संगितेति। उत्संगिनः संसर्गिणः कृता उत्संगिताः। तत्करोतेर्ण्यन्तात्कर्मणि क्तः। उत्संगिता अंभःकणा येन शेषाद्विभाषेति कप्प्रत्ययः। एलावनानामास्फालनेन संघर्षणेन लब्धगंधः। स्वेदशिशिरसुरभिरुदन्वतो नभस्वान् समुद्रवायुरधिवेलं वेलायां विभक्त्यर्थेऽव्ययीभावः। व्रजतो गच्छतस्तस्य हरेः स्वेदलवाननुवेलं प्रतिक्षणं यथार्थेऽव्ययीभावः। ममार्ज जहार। वेला कालेव जलधेर्वेला तीरविकारयोरिति विश्वः। काव्यलिंगम्। ७९॥ उत्तालेति। चमूषु चरन्तीति चमूचराः सैनिकाः। च

उत्संगितांभःकणको नभस्वानुदन्वतः स्वेदलवान्ममार्ज॥ तस्यानुवेलं व्रजतोऽधिवेलमेलावनास्फालनलब्धगन्धः॥७९॥
उत्तालतालीवनसंप्रवृत्तसमीरसीमन्तितकेतकीकाः॥ आसेदिरे लावणसैन्धवीनां चमूचरैः कच्छभुवां प्रदेशाः॥८०॥

रेष्विति चव। तैः उत्तालेषु उन्नतेषु तालीवनेषु संप्रवृत्तेन समीरणेन प्रवृत्तेन सीमन्तिताः सीमन्तवत्कृताः। सीमन्तशब्दान्मत्वन्तात्तत्करोतेर्ण्यन्तात्कर्मणि क्तः। णावि ष्ठवद्भावे विन्मतोर्लुक्। ताः केतक्यो येषु ते तथोक्ताः। नद्यृतश्चेति कप्। लवणसिन्ध्वोरिमौ लावणसैन्धवौ। तस्येदमित्यण्। हृद्भगसिन्ध्वन्ते पूर्वपदस्य च तूभयपदवृद्धिः। तासां कच्छभुवामनूपभूमीनां। जलाशयमनूपं स्यात्पुंसि कच्छस्तथाविध इत्यमरः। प्रदेशाः देशाः आसेदिरे प्राप्ताः। सीदतेः कर्मणि लिट्। अत्र स्वभावोक्तिः। अत्र स्वभावोक्तिरनुप्रासश्चालंकारौ। ओजःश्लेषसौशब्द्यसौकुमार्याद्यनेकगुणसंपत्तिः स्पष्टा॥८०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टि॰८॰ २२ लवंगेति॰ लवंगमालाभिः लवंगकुसुममाल्यैः कलितावतंसाः कृतभूषणाः नालिकेराणामन्तरित्यव्ययम्॰ नारिकेलफलाभ्यन्तरइत्यर्थः॰ अपइति पृथक्पदम्॰ समा सेऽस्त्रकृतिरित्यादिना समासान्तप्रसंगात् पिबन्तः॰ आस्वादिताः आर्द्रक्रमुकाः आर्द्रपूगीफलानि यैस्ते घोंटातु पूगंक्रमुक इत्यमरः॰ ते चमूचराः समुद्रादभ्यागतस्यातिथेः प्रतिपत्तिं गौरवं सत्कारमीयुः॰ प्रतिपत्तिः पदप्राप्तौ प्रवृत्तौ गौरवेपि चेति विश्वः॰ अत्राभ्यागतप्रतिपत्तिप्राप्तेर्विशेषणगत्यावतंसकल नादिपदार्थहेतुत्वात्काव्यलिंगमलंकारः॰ तेन समुद्रस्य चमूचराणांच हस्त्याभ्यागतोपमप्रतीतिरलंकारेणालंकारध्वनिः॥८१॥ तुरगेति॰ परित॰

लवंगमालाकलितावतंसास्ते नालिकेरान्तरपः पिबन्तः॥ आस्वादितार्द्रक्रमुकाः समुद्रादभ्यागतस्य प्रतिपत्तिमीयुः॥८१॥

तुरगशताकुलस्य परितः परमेकतुरंगजन्मनः प्रमथितभूभृतः प्रतिपथं मथितस्य भृशं महीभृता॰ परिचलतो बलानुजबलस्य पुरः

तुरगशतैराकुलस्य परिचिताभ्रस्येत्यर्थः॰ प्रतिपथं प्रतिमार्गं॰ यथार्थेऽव्ययीभावः॰ प्रमथिताः क्षुण्णा भूभृतो राजानो गिरयश्च येन तस्य॰ ननु स्वयं केनापि म थितस्येत्यर्थः॰ सततं ध्वताश्रीः शोभा रमा चयेन तस्य धृतश्रियः॰ पुरोग्रनगरात्परिचलतः परितो गच्छतः बलोरामस्तस्यानुजो हरिस्तस्य बलस्य सैन्यस्य॰ व लं सैन्यं बलं राम इत्युभयत्रापि श्लाघ्यतः॰ परं केवलमेकस्यैव तुरंगस्य जन्ममात्रं यस्मात्तस्य कोपि जातएव नत्वस्तीति भावः॰ महीभृता मन्दराद्रिणा राज्ञा च भृशामत्यन्तं मथितस्य न तु स्वयं कस्यापि मथितुरिति भावः॰ चिरं प्रभृति विगताश्रय इत्यनन्तरमेवास्याः हरि[illegible]ीकरणादिति भावः॰ जलनिधेश्च श्रीहरिः २२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदा प्रस्थानसमये महदन्तरं दूरगमनादिव्यवधानमुत्कारी सा महन्नारतम्यं वाभवत् अत्रोपमेयस्य हरिवलस्योपमानाज्जलधेराधिक्यवर्णनाद्व्यतिरेका
॥ मा० टि० ल० ॥ लंकारः पंचकावली वृत्तं नजभजरा हस्पतिः कथिता भुवि पंचकावलीति लक्षणात् त्रिस्वरा इति लक्षणात् तश्री र्धृतमितिद्याः तमाः ५८ तश्रीञ्जो
२३ ज्ञौज्ञौत्रिः स्वरा इति लक्षणात् ॥८२॥ अत्र कविः काव्यवर्णनव्याख्यानपूर्वकं सर्गसमाप्तिं कथयति ३॥ इतीति इति शब्दः परिसमाप्तौ माघकृत

ततस्तं धृतश्रियश्चिरविगतश्रियो जलनिधेश्च तदाभवदन्तरं महत् ॥८२॥ ॥इति श्रीशिशु
पालवधे महाकाव्ये श्र्यंके माघकृतौ मन्त्रानन्तरं द्वारवतीवर्णनं नाम तृतीयः सर्गः ॥३॥ ॥

ताविति कविनामकथनं महाकाव्य इति महत्त्वे लक्षणसंपत्तिः सूचिता द्वारिकावर्णन समुद्रवर्णन इति काव्यव्यवस्था कथनं तृतीयः सर्गः समाप्त इति ॥श्रीहरिः॥
शेषः एवमुत्तरत्रापि द्रष्टव्यम् ॥ ॥ इति श्रीपदवाक्यप्रमाणपारावारीण श्रीमहोपाध्यायकोलाचलमल्लिनाथसूरिविरचिते माघकाव्यव्या २३
ख्याने सर्वंकषाख्ये तृतीयः सर्गः समाप्तः ॥३॥ श्रीः ॥श्रीहरिर्जयति॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रीः॥ ॥ अथ सूर्यास्तमयं वर्णयति ॥ अभितापेति ॥ अथ समिसंक्षानन्तरं उष्णरुचिः सूर्यो निजतेजसामभितापसंप
मा·टी ९ दं संतापातिरेकं असहमान इवापराम्बुधेः पश्चिमाब्धेः पयसि प्रपित्सुः पतितुमिच्छुः पततेः सन्नन्तादुन्तादुप्रत्ययः स
१ निमीमेत्यादिना इसादेशः अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः अस्तगिरिमस्ताद्रिं अस्तस्तु चरमक्ष्माभृदित्यमरः
अधिरोढुमभ्यपतत् अभ्यधावत् अत्रासहमान इवेति कालप्राप्तस्य पयसि प्रपातस्य निजतेजसामसहनहेतुकत्वमु
त्प्रेक्ष्यते। अस्मिन्सर्गे प्रमिताक्षरा वृत्तं प्रमिताक्षरा सजससैः कदितेति लक्षणात् ॥१॥ गतयेति ॥ रतेनरस्यर्थप्रसिता उत्सुका
भ्यां तती या चेति सप्तम्यर्थे तरीया भृशमुत्सुकतां कालाक्षमत्वलक्षणामौत्सुक्यं दधती योषित् पुरो अग्रगवाक्षमुखे गवाक्ष

अभितापसम्पदमथोष्णरुचिर्निजतेजसामसहमान इव पयसि प्रपित्सुरपराम्बुनिधेरधिरोढुमस्तगिरिम
भ्यपतत् १ गतया पुरः प्रतिगवाक्षमुखं दधती रते भृशमुत्सुकतां मुहुरन्तरालभुवमस्तगिरेः सवितुश्च योषि
दनिमीनदृशा २

द्वारं प्रतिगतया अग्रपसृतया दृशा अस्तगिरेः सवितुश्चान्तरालमार्द्भुवं मध्याकाशदेशं मुहुरनिमीन मातिस्मेहस्तमात्रमवशि
ष्टमरलिमात्रमवशिष्टमित्यादिमानकरणे मास्तमयं प्रतिक्षितवतीत्यर्थः माङ्मेल ङिं क्षा विनिदिर्भावः अजामि सभ्यासस्येत्वं
तत्रास्तमयप्रतीक्षणान्तमरणादौत्सुक्यानुभावान्तरोपलक्षणं अश्रौत्सुक्यभावचनात्प्रेयोलंकारः २ विरलेति ॥ ॥ रा सं० ९
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

परिणतिं परिवृत्तिं शिथिलत्वं जरां चस्थाचगतः आतपस्य विरलात्वमल्पा आतपस्य छवियस्य सः अन्यच्छविराभाः अनुष्णवपुः अनुष्णचोक्ष
क्षणादिवद्दुस्थ देहः अलवर्णं यचाभ्रशिरेति यनत्वार्थेनस्य प्रयोगः परितो विपाण्डुरे कत्रशुभ्राभ्रपटलछन्नत्वादपवत्वादपरत्रपलितैस्त्वपाण्डु
रमाकाशमेव शिरोदधत् दुरुहतनु वरिमिदं प्रशान्तेत्यर्थः यथ हत्यासमर्थं च सूर्य एव नयनं यस्य सः दिवसः शिथिलः शिथिलवृत्तिः शिथिलांगश्च
भवत् अन्नाभ्रशिर इति आघवयनिरूपणाद्दिवसस्य वपुर्विरहत्यवयपरूपकसिद्धेरेकदेशविनिरूपकं स्त्रैवानुप्राणितं ॥ श्लो अयरोहेति॥

विरलातपच्छविरनुष्णवपुः परितो विपाण्डुदधदभ्रशिरः
अभवद्गतः परिणतिं शिथिलः परिमन्दसूर्यनयनो दिवसः २
अपराह्णशीतलतरेण शनैरनिलेन लोलितलताङ्गुलये ३
निलयाय शाखिन इवाह्वयते ददुराकुलाः खगकुलानि गिरः ४

अपरोपरभागोह्नाऽह्निर्यांतः पूर्वपराधरोत्तरके देशिनैकाधिकरणाद्येकदेशिसमासः एजाह्नः सविभ्यस्तु च अह्नोह्ण एतेभ्य इत्यह्नादेशः अह्नोदन्ता
दिति णत्वं अपराह्णे शीतलतरेण अनिले न शनै नैर्लोलिता आलोलिता लता एव अंगुलयो यस्य तस्मै तस्य अनिलयाय निवासाय हृयते ओहुतौ
संज्ञया आह्वानं कुर्वाणो वृक्षस्यितयेत्स्येक्षा शाखिने वृक्षाय खगकुलानि पक्षिसंघा आकुलाः संभ्रमुला गिर इत्यमूद्भागम्यत इति
निमस्तु तथा शादुरिव इत्यनुरागादुत्प्रेक्षा ४

Jagannath Bhattarai Collection. Nagarjun-7; Kathmandu, Nepal

मा० टी०
२

उपसन्ध्यमिति ॥ ॥ उपसंध्यं सन्ध्यायाः समीपे समीपार्थेऽव्ययीभावेन पुंसकत्वाद्ह्रस्वः । तं अशीतरुचः उष्णांशोस्तनुकरजालं तनुकरजालं तस्मि
न्नेव तत्क्षणं तस्मिन्नेपी सूर्य्यः अस्तं च न संयोगे द्वितीया सानुमतोद्रेः शिखरेषु आस्त अतिसूक्ष्मं आसेः कर्त्तरि लिट् सतामस्तसमये नाथस्य मपेक्ष्य
तरमेव पदमुच्चैः स्थानमेवोचितं खलु अर्थान्तरन्यासः ॥ ५ ॥ प्रतिकूलतामिति ॥ विधौ दैवे प्रतिकूलतामुपगते सति बहुसाधनतावलम्बनं केसा
धनवता विफलत्वमेति महान्त्यपि साधनसंपत्तिर्निःफलैवेत्यर्थः तथा हि पतिष्यतः आसन्नपातस्य दिनभर्त्तुः करास्त्रं प्रभावोहस्तोऽप्यवलिस्तो

उपसन्ध्यमास्त तनु सानुमतः शिखरेषु तत् समम् अशीतरुचः करजालमस्तसमयेऽपि सतामुचितं खलु उच्चतरमेव पदम् ॥ ५ ॥
प्रतिकूलतामुपगते हि विधौ विफलत्वमेति बहुसाधनता । अवलम्बनाय दिनभर्तुरभून्न पतिष्यतः करसहस्रमपि ॥ ६ ॥
नवकुङ्कुमारुणपयोधरया स्वकरावसक्तरुचिराम्बरया । अतिसक्तिमेत्य वरुणस्य दिशा भृशमन्वरज्यदतुषारकरः ॥ ७ ॥

९२

श्रयः करात्सहस्रमपि अवलम्बनाय आवष्टंभनाय नाभूत् अतो दैवमेव प्रबलमिति भावः विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः
॥ ६ ॥ नवेति ॥ अतुषारकरः उष्णांशुः नवकुङ्कुमवदरुणा मेघा या अन्यत्र नवकुङ्कुमवदरुणा कुचा यस्याः स्वकरावसक्तरुचिराम्बरया स्वकिरणाक्रा
न्तरुचिराकाशया अन्यत्र स्वहस्तलग्नरुचिरवस्त्रया दिशा सहेत्यर्थः करुणासंबन्धात्परांगनात्वं गम्यते वृद्धो यूनेति सोऽमादेव प्रयोगात्सहार्थे
ना तृतीयापि सहयुक्ते प्रधाने इति सहार्थे तृतीया अतिसक्तिमतिसक्तिकर्षं अत्यासक्तिं च एत्य प्राप्य भृशमन्वरज्यत् नूनं लोहितोरक्तश्चाभवत् रं
जेर्दैवादिकात्कर्मकर्त्तरि लङ् । कुमिरज्ञो प्राचां श्यन् परस्मैपदं चेति कर्मकर्त्तरि वा श्यन् चयाद्दर्शी दिनकरमदिमे वनयो ज्योरभावप्रतीतेः समासोक्ति

कि० टी० ९ ॥

राम
२

९१

CC-0. Digitized by eGangotri and MIDF- Delhi

गतवति ॥ जपाकुसुमस्तवकद्युतौ लोहितवर्णे दिनकरे ऽवनतिं अस्ततां गतवति सति लंवमाने सतीत्यर्थः दिग्वलयं दिङ्मडलं
कंकणं च अन्यत्रे वहुलानुरागैः सान्द्ररागैः कुरुविन्ददलैः पद्मरागखण्डैः प्रतिवद्धः प्रत्युप्तो मध्यो पस्य तदिव राजत इत्युत्प्रेक्षा कुरुवि
न्दस्तु मुक्तायां कुल्माषव्रीहिभेदयोः हिंगुदे पद्मरागे च मुकुलेपि समीरित इति विश्वः ८ ॥ द्युतेति द्युतं तपनीयं यत्भूषणं तत्कुंभं तपनीयं शा
तकुंभमिति सुवर्णपर्यायेष्वमरः तेन सदृशं तन्निभमिति नित्यसमासः पयसि समुद्रोदके अर्द्धं यथा तथा मग्नं वपुर्यस्य तस्यांशु

गतवत्यराजत जपाकुसुमस्तवकद्युतौ दिनकरेवनतिम् वहुलानुरागकुरुविन्ददलप्रतिवद्धमध्य
मिव दिग्वलयम् ८ द्युतशातकुंभनिभमंशुमतो वपुरर्धमग्नवपुषः पयसि रुरुचे विरिंचिनखभि
न्नवृहज्जगदण्डकैकतरखण्डमिव ९

मतोर्कस्य वपुर्मंडलं विरिंचेर्ब्रह्मणो नखेन विभिन्नस्य द्विधा विदलितस्य वृहतो महतो जगदंडकस्य जगदण्डकोशस्य ब्रह्मा
ण्डस्यैकतरखंडमन्यतरद्दलमिव रुरुचे रराज अत्रोपमानस्य पुराणप्रतिद्धत्वादुपमालंकारः ॥ ९ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

३
मो॰ टी॰
३

अनुरागवन्तमिति ॥ अथ परि दिकूपश्चिमास्येव गणिकावेश्यावारस्त्री गणिका वेश्या पेसमरः अनुरागो लौहित्यं अभिलषश्च तद्वन्तमि
विलोचनयोः सुखयति सुखं सुखकरं शान्तत्वात् स्मितरूप्यं च दर्शनीयं वपुर्दधतमपीति अतापककरणमतो स्मारशठत्वाख्य संताप
कारित्वात् सुखस्पर्शवान् तथाप्येनवसुं नीरा अतिनिर्दग्धं चंद्रवेमे देनिले रश्मी वसूत्ले यत्ने वस्तु त्वमसः इस विट आगम्यते विपरीकाश
मेवालयोग्यहं तस्मात्तिरस्कारकारणयत् निः काम्रितवनी यनपराहि वेषणानि गुणामपि यत्ति कं आसर्वस्वहरणादन्यनुरक्तयद
नुवर्तने गुणवन्तमपि हृ सर्वस्वं निर्वासयं तिमसमूढवेतिभावः अस्तगतो कद्रुनिश्लोकार्थः श्लेषेपि तद्दुस्थापितत्वाद्नुरागरूपवानु

अनुरागवन्तमपि लोचनयोर्दधतं वपुः सुखमतापकरम् । निरकाशयद्रविमपेतवसुं वियदालयादपरदिग्गणिका ॥१०॥
अभितिग्मरश्मि चिरमाविरभूद्वपॊतरवल्लमनिमेषतया विगलन्मधुव्रतकुलाश्रुजलं न्यमिमीलदब्जनयनं नलिनी ॥११॥

रागोवसूत्रव वसूनीति रूपकपर्यवसितरूपवत्तेयं अत्र विपदालयादपरदिगणिकेत्येकदेशरूपणाद्वे विटत्वरूपणावग
मादेकदेशवर्तिरूपकं ॥१०॥ अभीति ॥ नलिनी मितिस्मरश्मिसूर्या भिमुखं चिरमाविरभूत्तस्मयादनिमेषतया अपक्ष्मपातपाटलसंकों
संवानिमेषः अथ यथानेनाभिमुखावस्थानतिर्दग्धनरविन्नमलसं अतरूपविगलन्तिः स्रवन्तमधुव्रतकुलमेवाश्रुजलंयस्मात्तदन
मेवनयनं नमिमिलत् मीलयतिस्म: भाजभासम्लावसादिना विकल्पान्लोपधाहूस्वः अतरूपवनाभ्यासदी घीः अनुरक्ताहि कान्ताकान्ते

वर
रामः
३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अविभाव्येति ॥ अविभाव्यतारकमलक्ष्यनक्षत्रं अदृष्टंहिमद्युतेरिन्दोर्बिम्बं यस्मिंस्तत् अप्राप्यानुदितचन्द्रतारकमित्यर्थः अस्तमि
त्यदर्शनेऽयं अस्तमितोऽस्तंगतो भानुर्यस्मिंस्तत् एतावता निर्गुणमुक्तं अयमिति दोषमाह अवसन्नतापं अकान्तिमयातु प्रशान्तस
न्तापं अतएव अमनुदिताभ्यकरं नभः अन्तरिक्षमभात् भातिस्म भाते स्मेऽङ् निर्गुणस्य काशोभेति वाच्यं निर्दोषतया अपि गुणत्वादि
त्यर्थान्तरन्यासेनाह विगुणस्यादि ... विगुणस्य गुणहीनस्यापि दोषनाशित्वमेव गुणः अतो गुणवत्या शोभा भावु
का इति कार्यसमर्थनरूपोऽर्थान्तरन्यासः ॥५२॥ रुचीति ॥ रुचिधाम्नि तेजोनिधौ सूर्ये भर्तरि स्त्रौ परलोकं देशान्तरं समुपगते प्राप्ते स

५२

अविभाव्यतारकमदृष्टहिमद्युतिबिम्बमस्तमितभानु नभः । विरतोरुतापमतमि समभाद पदोपनैव विगुणस्य गुणः ५२ रुचि
धाम्नि भर्तरि भृशं विमलाः परलोकमभ्युगते विविक्षुः ज्वलनं त्विषः कथमिवेतरथा सुलभोन्यजन्मनि स एव पतिः ५३ ५५

ते च सति भृशं विमलाः शुद्धास्त्विषोऽज्वलनं विविक्षुः अग्निं वा दिव्यः स्वयं प्रविशन्ति इति श्रुतौ शिति भावः अन्यत्र मतेऽस्य एतया नारी सा
स्त्रीत्वेऽर्पयति व्रतेति स्मरणादिति भावः अग्निप्रवेशफलमाह इतरथा ज्वलनाप्रवेशेऽन्यजन्मनि जन्मान्तरे प्रातः स सूर्य एव पतिः अ
न्यत्रनुयोस्मिं जन्मनि पतिः स एव कथं सुलभः न कथंचिदित्यर्थः उचितं वा दिव्यमग्निरतुसमाहितेतिनपुनः तेनैवं सह सोदन इति स्म
रणाद्वेति भावः अतोऽग्निप्रवेशो युक्त इति समर्थनाद्वाक्यार्थहेतुकं काव्यलिंगमलंकारः ॥५३॥ श्री ५ ...

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा·टी·६ अथ सन्ध्याप्रादुर्भावमाह ॥ विहितेति ॥ जनतया जनसमूहेन ग्रामजनेत्यादिना समूहार्थे तल्प्रत्ययः विहिताञ्जलिः कृतप्रणामेत्य
४ र्थः विकसत्कुसुम्भकुसुमवदरुणतां दधती · राजसत्वादिति भा[व]ः नह्युक्ते सर्गावसरे रजसोपबृंहितमिति · प्रसूत इति प्रसूर्मा
ताजननी प्रसूर्मातेत्यमरः पितॄणां प्रसूः पितृप्रसूः स्त्रियां संध्यारूपिणी आत्मभुवो ब्रह्मणस्तनूर्चिरमुज्झितापि त्यक्ता

विहिताञ्जलिर्जनतया दधती विकचत्कुसुम्भकुसुमारुणतां चिरमुज्झितापि तनुरौज्झदसौ न पितृप्रसूप्रकृतिमा
त्मभुवः १८

पितृप्रकृतिं स्वभावं जगद्वन्द्यत्वादिति निजधर्ममित्यर्थः नौज्झत् न विससर्ज उज्झ उत्सर्गे लङ् विसर्गे लिङ् आडजादी
नामित्याडागमः आटश्चेति वृद्धिः भूतपूर्वोऽपि महाजनपरिग्रहः कलनीति भावः पितामहाः पितरस्तेषां प्रसूर्जननी तामुत्ससर्ज मात्रः
सायमागत्य सेव्या रूपेण पूज्यत इति आदिभविष्यसुराणामत्र प्रमाणीकृत्य तननुसारेण पकारेण पृथ्वीमावेपि प्रकृत्यागमरू श्रीरामः
पकार्यानुरूपं द्विशेषोक्तिरलंकारः तस्मात्तमस्य मनुभूति विशेषोक्तिर्निमित्त इति लक्षणात् ॥ १८ ॥ ❀ ❀ ❀ ❀ ६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ओं येति ॥ अथसन्ध्योदयानन्तरं सान्ध्याये सान्ध्याः सान्ध्यायांभवाः सन्ध्यवेलानक्षत्रेभ्यो ऽधिकत्वरा शून्ययः तै किरणैरुकरुद्धितमक
रा कृतं अन्तरु वविरहात्सोविरहक्यापदादलतोदीर्घमालाद्रू दयान् स्रुतेनक्षुभितेनासक्जा द्रूषिरेणानुलिप्तमिवस्थितमित्युत्प्रे
क्षारंरे विक्लोरैर्निरायुधं चक्रमित्यर्थः तस्यहृतिर्नोमयस्मिनूपततोः पत्रिणोः पतत्रिपत्रिपतगपतत्पत्ररथाण्डजा इत्यमरः मिथु
धा२ नं चक्रं कदम्बमित्यर्थः पृथग्भागेनोत्पातानडीयत ॥पू॥ निलयइति ॥ यज्जलेजत्पयस्यनज्जलज्जत्जलजमेनदेवसततंश्रियोनि
लयस्थानयहृतिप्रसिद्धंनिकाय्यनिलयालयाइत्यमरः । नदपितित्यनिवासभूतमपीत्यर्थः तथाश्रियादिवसात्ययेसायंकालेमुक्तंत्य

अथसान्द्रसान्ध्यकिरणारुणितं हरिहेतिहिंतु हूतिमिथुनं पततोः पृथगुत्पपातविरहार्त्तिदलद्धृदयं स्रुतासृगनुलिप्तमिव ॥ १५ ॥
निलयः श्रियः सततमेतदितिप्रथितं यदेवजलजन्मनीया दिवसात्ययेनतदपिमुक्तमहोचपलाजनंप्रतिनचोद्यमदः ॥ १६ ॥ छ ॥

कं स्महोदेवानामपिकृतप्रभुत्वं यदायदिमहेयकारिणास्त्यागहृत्याध्रुर्यअथवाचपलाच्चापलवतिस्त्री कमलाकचचपलाकमलाविद्युत्पुंश्च
लीप्सुचेतिविश्वः सैवजनश्चपलाजनः आतेश्व संज्ञापूरणयोश्चेतिचोभयत्रापिपुंवद्भावप्रतिषेधः तंप्रतितस्मिन्नित्यर्थः अदइदंकृत
घ्नत्वंचोद्यंचोदनीयंकथंदृत्याक्षेपनूचपलत्वान्नास्त्रैर्पहृतिअर्थः स्त्रीचापलेषुचाकियदेतदितिभावश्चेषमूलातिशयोक्तिअनुप्राणितोय
यमार्थान्तरन्यास ॥१६॥ छ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दिवसइति। दिवसोवासरः पुमानितिभावः मित्रंसूर्यंसुहृदंचानुमित्रेणसहेत्यर्थः तृतीयार्थइत्यनोः कर्मप्रवचनीयत्वात्द्वि
मा·टी·६ तीयामित्रंसुहृदिमित्रोर्कइतिविश्वः विलयंनाशमगमत्अनुगतः गमेर्लुङिपुषादित्वात्च्लेरङादेशः अबलयास्त्रियामयारुचिभर्तु
स्तेजोनिधेः प्रेमास्पदस्यपत्युश्चार्कस्यविरहाधीगमात्ल्यब्लोपेपंचमीविरहंप्राप्येत्यर्थः इहास्मिन्लोकेकिमास्यते
५

दिवसोनुमित्रमगमद्विलयंकिमिहास्यतेबतमयाबलया·
रुचिभर्तुरस्यविरहाधिगमादितिसन्ध्ययापिसपदिव्यगमि १७

किमर्थंस्थीयतेआसेर्भावेलट्वतेतिखेदेइतित्वंअलोच्यैवेत्यर्थः अतएवगम्योत्प्रेक्षा। संध्ययापिसपदिव्यगमिआगामीत्यर्थः ग
मेःस्वार्थण्यन्ताद्भावेलुङिमित्वाद्ध्रस्वः ण्यन्तत्वादुपधावृद्धिर्नास्त्येवस्याद्गुनमणिचि· तस्मात्स्वार्थेणिजुत्पाद्यो·मितांह्रस्वोयतोऽस्त्येव रामः
न्· विगमयत्वर्थंकरोतिइतिण्यन्ताल्लुङिइतिकेचन्।।१७।। ५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथास्यान्धकारं वर्णयति ॥ पतितेति ॥ पतङ्गोर्क एव मृगराजः सिंहः इति रूपकं समासः नलीनजे न प्रतिविंबेन रोषिते कोपितरचेत्यु
त्प्रेक्षा · स्वप्रतिसिंहभ्रमात्कोपितइतिभावः अत एवांबुनिधौ पतितैस्मितितज्जिघांसयेति भावः भावलक्षणे सप्तमी अथ पतनानन्तरं नागयूथा
निकरिकुलानि विमलिनानि स्थामानि उपमानानि सामान्यवचनैरिति समासः तमांसि जगद्व्योकं परितस्तरिस्तरे आच्छादयामासुः स्त
णातेः कर्तरि लिट् ऋतश्च संयोगादेर्गुणः अत्र यद्यपि नागयूथमलिनानि तमांसीत्यत्रानुशासनमिद्धो यमानानुमासन्यतं गमृगराजी
त्यत्राप्युपमितसमासाश्रयणेनोपमेयाचिन्तादुत्प्रेक्षायाः पतङ्गेऽसंभवात् सिंहे संभवाच्च रूपकमेव युक्तं तथा च रूपकानुप्राणितोत्
प्रेक्षेयमुपमेति शंकरः तत्रोत्प्रेक्षया मालिमानुरूपया रूपकं च व्यज्यत इति अलंकारेणालंकारध्वनिरिति संक्षेपः ॥१८॥ व्यसरादिति ॥ वहल

पतिते पतंगमृगराजि निजप्रतिविंवरोषित इवांबुनिधौ । अथ नागयूथमलिनानि जगत्परितस्तमांसि परितस्तरिरे ॥१८
व्यसरत्तु भूधरगुहान्तरतः पटलं वहिर्वहलपङ्करुचि । दिवसावसानपटुनस्तमसो वहिरेत्य वाधिकमभंजगुहा ॥१९
किमलंवतो वरविलग्नमधः किमवर्द्धतोर्द्धमवनीतलतः । स्वमसारतिर्यगथ दिग्भ्य इति प्रचुरीभवन्न निरधारि तमः ॥२०

पंकरुचि सान्द्रकर्दमच्छवि दिवसावसाने दिनान्ते पटुनः समर्थस्य तमसः पटलं भूधरगुहानामन्तरतोऽभ्यन्तरादेत्यागत्य वहिर्व्यसरत्प्रवहे शेव्यस
रत् विसृतं तथा वहिर्देशः प्रदेशादेत्य गुहा अधिकं यथा भवति तथाभञ्जन्नमिति किं पुनर्वि च इत्यर्थः भजते लुङ् तङ् लोऽङ्लीतिसकारलोपः अत्र व्या
पकत्वसादृश्यात्तमसोऽन्तर्वहिरणान्तकत्वसंदेहात्संदेहालंकारः ॥१९॥ किमिति ॥ प्रचुरीभवद्बहुलीभवत्तमः कर्तृ किमलंवतवरविलग्नमाकाश
स्थं सत् अधोभूतं सत्प्रवृत्यलंवतास्रंसत किमिव अवनीतलतो भूतलादूर्ध्वमुपरिष्टादवर्द्धत स्वमथ दिग्भ्यस्तिर्यग्विससार विस्तृतमिति न निरधार्
धारि · अथालंवतो दीनामन्यतमेनावधारितमित्यर्थः धारयतेः कर्मणि लुङ् अत्रापि पूर्ववत्संदेहालंकारः ॥२०॥ ३ ॥ ४ · ४ ६७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी
८

स्थगितेति॥ स्थगिते तिरोहिते अंबरक्षितितले येन तस्मिन् तिमिरे परितो जनस्य दृशम् अस्थयति न्यत्वं कुर्वति सुदृशः स्त्रियोऽपूर्वं तु
जनं रसांजनं रसो तर्गीवांजनं तिरुं जनं च दयिते ददृशुः अतो हेतोः प्रियवेश्मवर्त्म ददृशुः अत्र रसांजनवाक्यार्थेन प्रियवेश्मदर्शन
समर्थनाद्वाक्यार्थहेतुकं काव्यलिंगमलंकारः तेन हि द्रुतमंजनधारणेन तिर्थादिन्सुपमाध्वननादलंकारेणालंकारध्वनिः॥२१॥
अवधार्येति॥ सान्द्रतमं घनतमं व्यापकं तमः भिन्न कंतमसं तमासमित्यमरः अवसमन्धेभ्यस्तमस इति समासान्तः तत्काल सुत
नोः तयोः दयितो यं मे प्रियाभिसरणे कार्यगुरुतां संभोगकार्यस्यावश्यकत्वं अवधार्य निश्चित्य भयायतनाभवत् स्तनौ च कुचौ च तनुः

स्थगितांबरक्षितितले परितस्तिमिरे जनस्य दृशमस्थ्यति । दयिते रसांजनमपूर्वमतः प्रियवेश्मवर्त्म सुदृशो ददृशुः २१
अवधार्य कार्यगुरुतामभवन्न भयाय सान्द्रतमसं तमसं । सुतनोः स्तनौ च दयितोपगमे तनुरोमराजिपथवेपथवे २२ ददृशेऽपि
भास्करकराचौहिनयः सततमीनमोभिरभिगम्यतनां । पुहिमस्य हौ द्रुहगरोलपवः प्रकटीभवन्ति मालिनाप्यपतः २३ श्ली

ष्टो वो रोमराजेः पंथा रोमराजिपथो रोमराजिपथो मध्यभागः तस्य वेपथवे कंपाय॥ द्वितोयुजितिप्रथत्वपः नाभानां इतिविभक्ति
विपरिणामेनानुषंगः कार्यस्य कस्य नथापि कामुकस्य कुतोभयं क्लेशगत्वाते शुभावः अत्र संततमसं कुचभारयोः कामिनि निमित्ते भयकंपानुद
ये कार्यगौरवावधारणहेतुकत्वोक्त्रे स्वगणादुत्प्रेक्षायमके नसंसृज्यते २२॥ ददृशेऽपीति॥ योग्य दगरोहनिसवितुस्त्विखान दृष्टेन लाक्षितः
सकृद्गताः तमोभिस्तनां व्याप्तां नम्यातिश्रय्यामिति निमीलितांराजिरंजनी यामिनीतमी तमस्र इत्यमरः अधिगम्य प्राप्य सुहिमग्रहीतुः यहे
इति हौर्वक्षतवाहिलपवो ल्वाः विच्छिद्दे ल्वे लक्षुदि निश्रमरः मलिनाप्युपातोति कुत्साप्यपत्नातु प्रकटीभवन्ति अर्थान्तरन्यासः॥ २३॥ ॥ राम

८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अनुलेपनानीति॥ तेनसमयेनप्रदोषकालेनकर्त्रानुलेपनानि कुंकुमचन्दनादीनि कुसुमानि मालत्यादीनि तथा पतिषु कृतमन्यवः कृतकोपाः अब
लाः स्त्रियः तथा दीपशिखा दीपज्वालाश्चैतानि सर्वाणि चिरं सुप्तस्य पूर्वं स्तब्धस्य मनोभवस्य कामस्य बोधनमुद्दीपनं यस्मिन् कर्मणि तद्यथा त
था नम्पूर्वकमित्यर्थः इतरथा ऽनुलेपनादिबोधकस्य वैफल्यं संभवाच्चेति भावः समंदैवाबोधितबोधिता निवृत्ता देयं सा त्कर्मणि लुङ् अनगं अ
माल्यसंपादनस्त्रीमनःप्रसाददीपशिखोत्या दनानामबोधितबोधने त्वेकेन प्लिष्टशब्देनाभिधानात्तुल्ययोगितामेदः अवयवकानियो कृतिरेकान्तयानु
पममनोभवबोधनमिति क्रियाविशेषणसामर्थ्यात् समतिति योगपद्यानिमानात्रमनोभवेतरबोधनयोः कार्यकारणभूतयोः तद्विपर्ययरूपा चान्यान दुल
पापेक्षा पाग्ध्यमाल्यादीनां वस्तूनां नानाम्बबोधनस्यैकधर्मसंबन्धात्तुल्ययोगितामेदश्चेति संकरः॥ २८॥ अथ चन्द्रोदयवर्णनमारभते॥ वसुधेति॥ अ

अनुलेपनानि कुसुमान्यबलाः कृतमन्यवः पतिषु दीपशिखाः। समयेन तेन सुचिरं शयितप्रतिबोधितस्मरमबोधिषत॥ २८॥ ॥
वसुधान्तनिःसृतमिवाहिपतेः पटलं फणामणिसहस्ररुचाम् स्फुरदंशुजालमथ शीतरुचः ककुभं समस्कुरुत माघवतीं २९॥ ॥
विशदप्रभापरिगतं विबभावुदयाचलव्यवहितेन्दुवपुः मुखमप्रकाश्यदशनं शनकैः सविलासहासमिव शक्रदिशः॥ ॥ २९॥ ॥

अथ ततः प्रसंजनानन्तरं वसुधान्ते नभूप्रान्ते निनिःसृतं बहिर्निर्गतं अहिपतेः शेषस्य फणामणिसहस्ररुचां फणाभाः पटलं स्तोमइवेत्युत्प्रेक्षा शीतरुचेश्चन्द्रस्य
सवन्धिस्फुरदुत्स्फुरदंशुजालं मघोनइन्द्रस्य माघवती मां ~~अनुलेपनानिकुसुमान्यब~~लाः मघा यावहुलमिति विकल्पात् त्वादिशः ककुभं दिशं समस्कुरुत अभू
पं२ षयत् प्राच्यां दिशि चंद्रकिरणजालमलक्ष्यतेत्यर्थः संपर्युपेभ्यः करोते भूषणे इति काल्पूर्वः सुडागमः अभ्यासव्यवायेतिनियमात्॥२९॥ विशदेति॥ विशदप्रभाप
रिगतं सुश्रकान्तिव्याप्तं उदयाचलेनोदयपर्वतेन व्यवहितं इन्दुवपुश्चिन्दुमण्डलं यस्मिन्तत् शक्रदिशः प्राच्याः मुखमग्रभागः वक्त्रं च पत्नी पतेन दन्ते
नान्ये दर्पते व्ययकाश दशनम लक्ष्यदन्तं सविलासहासं सविलास [illegible] स्मितमिव शनकैर्मन्दं विबभौ॥२९॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा० टी० कलयेति ।। पुरः प्राच्यामग्रभागे वा तुषारकिरणस्येन्दोः कलया किरणेन स्त्रैत्रोपलक्षितं परिमंदम् अल्पं भिन्नाः विदलिताः तिमिरौघाः एव जटाः यस्य तत् नूतनगगनं तस्य शरण्याधिपतेः प्रमथाधिपतेरीश्वरस्य गणाः प्रथमसंख्याधाः कृतिवेजयन्ती मूर्तिरिजनैः क्षणमभ्यपद्यन गगनमष्टानां शिवमूर्तीनां अन्यतममिति निपतत्सत्त्यभिपल्लवित्यर्थः कलामात्रोदितश्चन्द्र इति फुल्लितार्थाः रूपकालंकारः ।।२७ नवेति ।। नवचंद्रिकाभिरेव कुसुमैः प्रकीर्णं मरुवककवरीकेशपाशः जातपदेत्यादिना ऽपूर्णां विभक्तीनितरूनो हरेर्नोदिशो मुखमग्रभागरूपमुखं वक्त्रमितिश्लिष्टरूपकं तस्य ललाटं च कुरि मनोहरेर्हिमरश्मिदलमिन्दुखंडं मलयजेनवै दन्तेन दिव्यमिव ददृशे धावत्याहितिभावः नवचन्द्रिकाकुसुमेत्यादानेक देशवर्तिरूपकमहिम्ना

कलयातुषारकिरणस्यपुरः परिमन्दभिन्नतिमिरौघजटं क्षणमभ्यपद्यत जनैर्न मृगाङ्गगनं गणाधिपतिमूर्तिरिति २७।।
नवचंद्रिकाकुसुमकीर्णतमः कबरीभृतो मलयजार्द्रमिव ॥ ददृशेललाटतटहारि हरेर्हरितो मुखस्य हिमरश्मिदलं २८।।
प्रथमं कलाभवदथार्द्रमथो हिमदीधितिर्महदभूदुदितः ०।। दधति ध्रुवं क्रमत एव नतु प्रथितो जसोपि सहसोपचयम् २९।।

ला१ हरिवधूं प्रती नौ नत्स्म हकृतस्त्रे यावगेनैयक्षभेदाध्यवसितस्तुरवसंवन्धप्रसादत्वादितल्लाटत्वोपमोज्जीवनेनेन्दुदलस्यानुपातनिजधाव ल्यगुणनिमित्तमलयजाद्र्रत्वगुणस्वरूपकोत्प्रेक्षेति संकरः ।।२८।। प्रथममिति ।। हिमदीधितिः चन्द्र प्रथमं कला कलामभवत् कर्त्तुर्जोऽधोऽथोमा गइत्यमरः अथार्धमभवत् अथोऽनन्तरं अथोऽथेत्यमरः उदितः साकल्या पुष्पितः सन् अत्र महान् संपद्यमानो भूत महदभूत अभूततद्भावे च्विः हल लोपात् कार्यान्तरप्राप्तिः तथाहि स्तुतिशालिनोपिते जिष्टाश्च क्रमशः क्रमेणैव उपचयं वृद्धिं दधति सहसा झटिति न तु दधति ध्रुवेसामान्ये विशेषणा ०ला म० समर्थनरूपोऽर्थान्तरन्यासः ।।०।।४ २९

CC-0. Digitized by eGangotri and MIDF- Delhi

उदमज्जीति ॥ अपनिद्रपाण्डुरसरो[ज]रुचा विकचपुण्डरीककान्त्या तुहिनद्युतिना चन्द्रेण प्रथमं हृदेः पूर्वं प्रबुद्धया अन्यथानुपद
पत्तेरिति भावः नदराजसुतायाः सिन्धुकन्यायाः श्रियो वदनेन्दुनेव वक्त्रचन्द्रेणेव कैटभजितो हरेः शयनात् समुद्रादित्यर्थः उक्तोत्प्रेक्षा
सा भावनाय॰ इत्यानि दृश्यन्ते उदमज्जि उन्मग्नं उत्थितमित्यर्थः ॥ ३०॥ अथेति ॥ अथोदयानन्तरं लक्ष्मणा लाञ्छनेन लक्ष्मणेन सौ
मित्रिणा चानुगतमनुसृतं कान्तं वपुर्यस्य सः लक्ष्मणानुगतकान्तवपुः शशिदाशरथिः श्लेषः वस्तुतः शशिकदम्भे इत्यार्थे तद्रूपभासे पिजत्वकः

उदमज्जि कैटभजितं शयनादपनिद्रपाण्डुरसरोजरुचा प्रथमं प्रबुद्धनदराजसुतावदनेन्दुनेव तुहिनद्युतिना ॥ ३०॥
ऋक्षलक्ष्मणानुगतकान्तवपुर्जलधिं व्यतीत्य शशिदाशरथिः परिवारितः परित ऋक्षगणैस्तिमिरौघराक्षसबलं बिभिदे ॥ ३१॥

रवदेकशा व्यत्यतीति तैः परितः समन्तादृक्षगणैर्नक्षत्रगणैर्जाम्बवदादिभल्लूकसमूहैश्च इत्यर्थः श्लेषः एकनालोबलं विफलं रूपकं ददरवं डेकरा
दार्थद्वयप्रतीतेः न० ऋक्षं नक्षत्रं नभं तारा० अच्छाभल्लभल्लुका इति चामरः परिवारितः सर्वपेवराक्षसाः दशरथपुत्रो रामः अनयोर्जल
धिं विलङ्घ्य निशौघ० रूपराक्षसकुलं तमिस्रौघं विदारयामास भिदेः कर्मणि लिटि श्लेषसंकीर्णो वस्तुवर्णिसाव रूपकालंकारः ॥ ३१ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

न०टी० उपजीविनितिः॥ अंसमांनिविनुः समुद्रोवशिगीवसन्ततंपरिमुग्धतां सौन्दर्यं अन्यत्रमौग्ध्यं व्यवहारानभिज्ञत्वमिति यावत् मुग्धः सुन्दरमूढयो
८ रित्यमरः दधतीदधानस्य घनानां वीथी घनवीथिरन्तरिक्षं सा वीथि पणवीथिरिवेत्युपमितसमासः नामवतीर्यवतः प्रतीतिष्ठवतः उडु
पतेर्नक्षत्रनाथस्य नक्षत्रनायकस्य कस्यचिद्धनी कवणिज इव कलाः षोडशांशानुमूलं धनं वृद्धिश्च कलास्यान्मूलजे वृद्धौ शिल्पादि
३२ ष्वंशमात्रे षोडशांशे विधुखण्डे स्यादिति विश्वः उपचयापचयौ वृद्धिक्षयौ समृद्धये चोपजीविति स्म सेवते स्म अन्यत्र लभते स्मेत्यर्थः यथा
कश्चित् कुशलो लब्धकुशलात् स्वहीनलाभमाप्नोतीति न दृष्टितीभावः श्लेषसंकीर्णोपमा उपमासंकीर्णश्लेष इत्यन्ये॥ ३१॥

उपजीविनि स्म सन्ततं दधतः परिमुग्धतां वणिगिवोडुपतेः श्रद्धा॥ घनवीथिवीथिमवतीर्णवतो निधिरंभसामुपचयापचयकलाः ३२
रजनीमवाप्य रुचमापशशी स पदिव्यभूषदसावपितां अविलंवितक्रममहो महतामितरेतरोपकृतिमच्चरितम्॥ ३३॥ श्रद्धा॥

रजनीमिति॥ शशी रजनीमवाप्य रुचिं शोभामापश्च सोऽप्यपि तां रजनिं भूषयत् तथाहि महतां सतां चरितं अविलंवितक्रमं
अविलंवितप्रकारं यथा तथा इतरेतरोपकृतिमत् अन्योन्योपकारवत् अहो इत्यविलंवादाश्चर्ये अत्र रजनीशशिनोर्मिथः शोभाकरत्वा
दन्योन्यालंकारः तदन्योन्यं मिथो यत्रोत्पादकता भवेदिति लक्षणात् समर्थकश्चायमर्थान्तरन्यासः इत्यंगांगिवेन संकरः॥ ३३॥ रामः

८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अनवर

CC-0. Digitized by eGangotri and MIDF- Delhi

दिवसमिति ॥ मृगधरस्य चन्द्रोदिव संदिवसे इत्यर्थः अत्यन्तसंयोगे द्वितीया । मम मुखं हृषीकेशस्यांशोः पादेनांशुनां किरणाच पादस्य शर्म्यं चि
नुर्योश इत्यमरः हतां ताडितां अनवरतं विछिन्नैरालिहृतैरुदतीकां रुदतीमिव श्वसितां कुमुदिनी वनिनां अश्रुग्राणि चतेकर इत्यमरः न
समासइतिवामनः तैरश्चकरैरयांशुभिरश्रुहतैर्मुहुरामृशन् स्पृशन् उदपि स्वसन् अश्रुक्षामयति स्म परा वस्त्र स्तांशावतिमिराश्वसती यता
दितिभावः श्वसिधातोर्णो चश्चुपधाया हस्वः ! अत्र पादरूपपादस्तैर्हतामिति हननसाधितश्लिष्टरूपको त्यापितेयमलिहृतैरिति अधि
करणपरिणामगंभीरो दनो स्वेक्षासापेक्षयमुखुसतोसकोविजातीयसंकरः । तथा करैरेयकरैः कुमुदिनी वनिते ति श्लिष्टा श्लिष्ट रू

दिवसंभरशो हृचिवादहतोरुदतीमिवाननवरतालिहृतैः मुहुरामृशन्मृगधरो यकरैरुदसिस्वसत्कुमुदिनीचनितामृ० ॥३४॥
प्रतिकामिनीतिदृश्य अकिताः स्मरजन्मघर्मपयसोपचिता सुदृशोभिभर्तृशशिरश्मिगलज्जलबिन्दुमिन्दुमणिदारुवधूः ३५॥

परण मृगधर व इत्यन्न मतप्रतीतेरेकदेशविवर्तिरूपकं तस्यापि श्लेषं उदपि स्वस दितिगम्योत्प्रेक्षोत्यपरो विजातीयसंकरः सोदनोत्प्रेक्षासापे
क्षेय मुखुसतोत्प्रेक्षे च मुखुसतोत्प्रेक्षेयसजातीयसंकरोपि ॥ ३४ ॥ प्रतीति ॥ सुदृशो रंगनाअभिभर्तृ भर्तारमभि लक्षणेनाभिप्रति
आभिमुख्ये इत्यव्ययीभावः शशिरश्मिभिर्गलं क्तः अर्थतोजलबिन्दवो यस्याः सौ इन्दुमणिश्चन्द्रकान्तशिला सैव दारुतस्य वधूस्तन्मयी
वधूः स्त्री प्रतिमा तां स्मराज्जन्म यस्य तेन स्मरजन्मना घर्मपयसा स्वेदोदकेनाउपचितां व्याप्तां स्विन्नवतीमित्यर्थः प्रतिकूला कामिनी प्रतिकामि
सपत्नी इति भ्रान्त्येव चकिता भीता दृश्य अत्र चन्द्रशिलापुत्रिकायाः सादृश्यं वध्वनपायप्रतिकामिनी भ्रान्त्या भ्रान्तिमदलंकारः ३५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शि०व० ९ सत्येति ॥ ओषधिपतिरेव ओषधिपतिश्चन्द्रो वैद्यश्च इति श्लिष्टरूपकं अस्मात् मम मे वा अस्तमोपधी विद्योतः तेन द्रवैरार्द्रैः करैर्हस्तैः किरणैर्हस्तैश्च अब्जदृशां
अपमार्गमगदयि मार्ज्जनं विदधत् कुर्वन् परितो विसर्पि सर्वव्यापि सर्पि परितापि सन्तापकारि मानः कोपः स एव विषं तत् तनुवपुषः शरीरादवतारयति स्म
अवरोपितवान् । अत्र वसाव यद्रूपकं योषधिलिहन्तां गलिक हस्तसंस्पर्शादिपमिव निकरकरस्पर्शादेवाङ्गनानां वपुषि रोषो नष्ट इत्युपमा व्यज्यते
॥३६॥ अमलेति ॥ अधिकमवभासिता प्रकाशिता दिशो याभिस्ताः सा मिन्दुरुचो निकरो ऽमलात्मसु निर्मलमूर्तिषु तरुणीनां ये कपोलाः फलका
नीव तेषु प्रतिफलितो मुहुः प्रतिफलनात् संक्रामन् सान्द्रतरं प्रचुरतरं विससार दर्पणसंक्रमणादिति भावः अत्रेन्दुभासां कपोलसंक्रमे ऽपि संक्रमोक्तेरसं

अमृतद्रवैर्विदधदब्जदृशामपमार्गमोषधिपतिः स्म करैः । परितोविसर्पि परितापिरुषं वपुषोऽवतारयति मानविषम् ॥३६॥
अमलात्मसु प्रतिफलन्नभितस्तरुणीकपोलफलकेषु मुहुः । विससार सान्द्रतरमिन्दुरुचामधिकावभासितदिशां निकरः ॥३७॥
उपगूढवेलमलघूर्मिभुजैः सरितामचुक्षुभदधीशमपि । रजनीकरः किमिव चित्रमदो यदि रागिणां गणमनंगलघु न ॥३८॥

त्येसंबोधात्केरुपात्निश्चयोक्तिः ॥३७॥ उपगूढेति ॥ रजनीकरश्चन्द्रः अलघुभिरूर्मिभिरेव भुजैरुपगूढा वेला येन तं सागरं सरितामधीशमपि ।
भावः सरितामधीशं समुद्रमपि स्वभावादक्षोभ्यमपीति भावः अचुक्षुभत् क्षोभयति स्म क्षुभ्यतेर्णौ चङ्युपधाया ह्रस्वः अनंगेन लघु गतसारं यद्
वह रागिणां तेषां गणं अचुक्षुभदित्यदः किमिव चित्रं न किंचिदित्यर्थः अत्रा क्षोभ्यमब्धिं क्षोभयतश्चन्द्रस्य दंडापूपिकया या दवक्षोभकत्वोक्तेरर्थां राम ९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

॥भवनेति॥ परिमंदतया स्वकान्तित्यादस्समर्थनया भवनोदरेषु स्फाटिकं तरेषु शयितः सुप्तो मदनो जालकमुखोपगतान् गवाक्षविवरप्रविष्टान् अतएव बलस्फु
टिकयष्टीनां हरिगिवरकृशोभायेषां तान् स्फटिकसन्निभान् इन्दुकिरणान् अवलंब्याश्रित्य उदितिस्तत् उत्थितः । अत्रोद्बोधोत्थापनयोरभेदविवक्षया उ
दोनूर्द्ध्व कर्मण्णी परस्मैपदमिति । एतदेवाभेदाध्यवसायमूला तिशयोक्ता स्फटिकयष्टिरुचश्चन्द्रस्त्युपमयासह कृतया अवलंबेस्यत्रावलम्बेस्यानुत्था
पनस्यावलम्बहेतुकत्वोत्प्रेक्षाप्रत्यापत्त्येतासामूहनेकः ॥३९॥ अविभावितेति॥ मदनोपिप्रथमं चन्द्रोदयात् प्राक् तमसा अविभावितोऽलक्षितः इन्दुवि
षयो वायालक्ष्येन ससोभवन् नूनमित्युत्प्रेक्षायां यस्मादयमेध्याम्निशीन करेउदिते दिशः प्रकरषति सति अमुना मेनेन धनुरपकृष्टे स्थाकृष्टं चन्द्रस्
यमर

भवनोदरेषु परिमन्दतया शयितो लतास्फटिकयष्टिरुचः अवलंब्य जालकमुखोपगतानुदतिष्ठदिन्दुकिरणान्मदनः ॥७९॥
अविभावितेषु विषयः प्रथमं मदनो नूनमभवत्तमसा उदिते दिशः प्रकटयत्यमुनायदध्याम्निधनुराचकृषे ॥ ८० ॥ ॥
अयकाशमाशुहृदयेषु दृशां गमिते विकाशमुपयाति शिनः कुमुदे च पुष्पधनुषोः धनुरप्यलिनः शिलीमुखगणो लमभत ॥८१॥

वमतानुद्दीपको मदनस्याभूदिति भावः॥८०॥ अवकाशमिति ॥ पुष्पधनुः पुष्पधन्वा वासंत्तायामितिनिविकल्पान्तानङ् । इतः तस्य धनुः पुष्पचापं पुष्पान्तरं तस्मात्
वितो तिः स्तनः शिलीमुखं स्तुयेवेयो निशिलीमुखावाणा अलयश्च अलिवाणोशिलीमुखाविश्वमरः तेषां गणाः शशिनउदयात् विकाशं प्रोत्सुक्यउन्मीलनं चगमितेषा
पितेषु दृशां हृदयेकुमुदकामिनिहृदयपोर्द्वयोरपिप्रकृतयोः शिलीमुखपदवेनलक्षणौकधर्मयोगादेपम्यानुल्पयोगिता एकधर्मत्वं चात्र शिलीमुखत्वेनिस्लेष

कुमुदेच अवकाशमाश्वाशमलभत पुष्पधनुधनुरपिलब्धवानितप्यर्थः अत्र वंद्रोदये[illegible]उ

CC-0. Digitized by eGangotri and MIDF- Delhi

मा० टी० ककुभामिति॥ ककुभां दिशां मुखानि सहसा झटिति उज्ज्वलयन् उद्भासयन् रतये सुरतायाधिकमाकुलत्वमौत्सुक्यं दधत् पुष्णन्निति शेषः अन्यत्र
६० रतये कामदेव्यै आकुलत्वं भयविह्वलत्वं दधत् अपरोऽत्रिमुनेर्नयनप्रभवः अत्रिनेत्रसमुद्भूत इति पुराणात् त्रिनयनप्रभवो न भवतीत्यत्रिनयनप्रभ
वः अपरः त्रिनयनप्रभवादस्योदहनो ऽग्निरिन्दुः कुसुमेषुं काममदीदिपत् दीपयति स्म दीप्यतेर्णौ चङि भ्राजेत्यादिना विकल्पादुपधाह्रस्वः अ
त्र कृतेऽकुसुमेषोर्दीपनं नाम प्रवर्द्धनं तस्य तत्र प्रतीयमानेन प्रज्वलनेनाभेदाध्यवसायात्तन्निमित्तमिन्दोर्दिदुखोद्भासनादिधर्मसंबन्धाद्दपरो
पं दहन इत्यपरशब्दप्रयोगसामर्थ्याद्दहनत्वोत्प्रेक्षानरूपकमिति रहस्यं चन्द्रोदयात्कामो ववृधे इति तात्पर्यं॥८१॥ एवं चन्द्रोदयाख्यमुद्दीपनविभा

ककुभां मुखानि सहसोज्ज्वलयन् दधदाकुलत्वमधिकं रतये अदिदीपदिन्दुरपरो दहनः कुसुमेषुमत्रिनयनप्रभवः०॥८२॥
इति निश्चितप्रियतमागतयः सितदीधितावुदितवत्यबलाः प्रतिकर्म कर्तुमुपचक्रमिरे समये हि सर्वमुपकारि कृतं०॥८३॥

वनमुक्त्वा तत्फलमाह॥ इतीति०॥ इत्येवं सितदीधितावुदयवतीति सत्यबलाः। स्त्रियो निश्चिता प्रियतमानामागतिरागमनं याभिस्ताः सत्यः प्रतिकर्मप्र
साधनं कर्तुमुपचक्रमिरे प्रतिकर्मप्रसाधनं कर्तुमुपचक्रमिरे प्रतिकर्म प्रसाधनमित्यमरः चन्द्रोदयात्प्रियागमनं निश्चित्यालंकर्तुं प्रक्रान्ता इत्य
र्थः तथा हि समये कार्यकाले कृतमनुष्ठितं सर्वं सकलं कर्म उपकारि उपकारकं भवति अन्यथा विफलमेवेति भावः अतो निश्चित्य प्रवृत्तिरुक्ता
पुरस्तात्यर्थान्तरन्यासः॥८३॥ श्रीराम

राम ६०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ प्रसाधनमेवप्रपंचयति॥ समम्मिति॥ सुतनोः स्त्रियाः उरोजतटी सुकण्ठ्यास्यमेकमेव हारं नेव हारमेव भूषणं संसं मे वेषम्बेण दधातु। सं तेन तथा संश्लिष्टत्वात्याक्रम
त्वे नवजनितौ निविवरत्वां निरन्तरत्वं चदधतोरिदं सभामापि स्यमेव घटते स्मृत्वमैतन्नानाया हि विषयोपभोगाः कुचयोः स्तनभावास्तथोहार धारणं यु
क्तमितिभावः॥५४॥ कदलीति॥ वधूः कदलीवत्काण्डरुचिरोरुं भात्सं भगं भारउरुस्येव तत्करुवंस्थन वृक्षो यस्मिन् अथ कदलीवत्काण्डस्य सोदर्यभाग्योपनत्वात्त्वं वंध ८
नयोग्यवृक्षया चिनातरुद्धे नपुनरुक्तिः महति जघनस्तलेव परिसरः प्रदेशस्तस्मिन् रसनाकलापके एव बगुलस्तेनमकरध्वजो मदनः स एव द्विरदस्त
माकलयदवद्गान् रशनावन्धेन जघनमपि विमदनोद्दीपकमासीदित्यर्थः समस्तवस्तुवर्तिसावयवरूपकं॥५५॥ अधरेति॥ सुहृदश्यामधरेष्ठो

समममेकमेवदधातु सुतनोर्गुरुहारभूषणमुरोजतटी घटते हि संहततया जनितान्तिमिदमेव नितिविवरत्वां रहनोः॥५४॥
कदलीव काण्डरुचिरोरुतरोर्जघनस्थलीपरिसरे वृहति रसनाकलापकगुणेन वधूर्मकरध्वजद्विरदमाकलयत्॥५५॥
अधरेष्वलक्तकरसः सुहृशां विशदं कपोलभुवि रोध्रुरजः नवमञ्जनं नयनपंकजयोर्विभिदेन तत्र विनिहितान्यपसः॥५६॥

हे सुअलक्तकरसो लाक्षाद्रवः तथा कपोलभुवि गंडस्थले विशदं सुध्रं रोध्रुरजः तथा नयनपंकजयोर्नवमंजनं च तं तत्र विनिहितान्यपसः श्रोत्रान्तविभिन्नं
कर्मर नाभूत् के तैरि लिहृ अधरादिनिहितं लाक्षारागादिकं यं तत्र विनिहितं श्रीरवत्सायत्यो दास्यतो मे वेदेन कुर्यहमभूदित्यर्थः अत्र यदेन तदधरालक्तकमादिकं तेन तं
त्वनिहितं श्रीरमित्येकवाक्यं तथा वाक्यार्थयावाक्यार्थसमातायाः दसंभवदुत्प्रेक्षसंवन्धो वा क्यार्थनिष्ठो निदर्शनालंकारः तेनाधरालक्तकादीनां गुणानक्तत्वरू
पः सामान्यो लकारो गम्यते। सामान्यं गुणसाम्येन यत्र वस्त्वंतरैकतेतिलक्षणात्॥ ॥५६॥ ॥ ७ ७ ७ ७ ७ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी० स्फुरद्दीतिति। भ्रमदालिश्रियः स्फुरन्त उज्ज्वलन्त उज्ज्वला नोऽमला अरुणोष्ठा एव दला नि पत्राणि येषां तैः परितो विकसन्तो दशनानां मकुलो
१० दंतकान्तय एव केसरभराः किंजल्कपुंजा येषां तैः धृतानि सुगन्धानि गंडा एव फलकानि कर्णिका येषां तैः विकसद्विशास्यकमलैर्विचसुः अत्रा
स्यकमलैर्दिनतुं अत्रास्य कमलैरिति रूपणात् भ्रमदा एव सा भ्रमदालिस्तस्या एकदेशविवर्तिसावयवरूपकं आस्यकुसुमैरिति पाठे कुसुमस्य मुखो
पमानत्वं कविसंमतमिति विस्तरमित्येकावली अलंकारः ॥५७॥ भजत इति। अधिकेन प्रवस्ते न जितो विदेशं देशान्तरं भजते अथवा कुशलश्चेत्तद

स्फुरदुज्ज्वलाधरदलैर्विलसद्दशनांशुकेसरभरैः परितः धृतसुगन्धगंडफलकैर्व्यरुचन् विकसद्विशास्यकमलैर्भ्रमदा ॥५७॥
भजते विदेशमधिकेन जितस्तदनुप्रवेशमथवा कुशलः। मुखमिन्दुरुज्ज्वलकपोलमतः प्रतिमाछलेन सुदृशामविशत् ॥५८॥

नया१ नुप्रवेशं भजनमेव शरणं नु प्रविश्य जीवतीत्यर्थः अतो हेतोरिन्दुरुज्ज्वलौ कपोलौ यस्य तदिति मुखस्य विंबग्रहणं तोक्तिः पदार्थहेतुकं काव्यलिं
गं सुदृशां मुखं प्रतिमाछलेन प्रतिविंबव्याजेनाविशत् योग्यप्रविष्टः साक्षाच्चन्द्र एवायं न प्रतिमा चन्द्र इति छलशब्दात् प्रतीतेः अपह्नुतिरत्र त्व
प्रतिपादनरूपोऽपह्नुत्यलंकारः पूर्वोक्तकाव्यलिंगसापेक्ष इति संकरः तेन कपोलमोलयोर्लोकान्तरं लावण्यं दर्पणोपमं व्यज्यते इत्यलंका
रेण वस्त्वलंकारध्वनिः ॥५९॥

राम
१०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



ध्रुवमिति। मदनेषवो महति कठिने कचतले प्रतिहतिं प्रतिघातमागताः प्राप्ताः कथंभूतस्य मदनस्य रिपुणा निजभारेण ग्लपितं कर्षितमवलग्नं म
ध्यं येन तदिदं कुचतटमितरांगेणातुल्यमितरांगवत्तले तनुत्वं मिवर्तितु कथंभूतं ननु तां कार्श्यं नाशमगमत् नाभजत् पुनः पादिसूत्रेणाल्लेर ओदेश्यांत
तमदनेषुपातात्कुचातिरिक्तमंगमनाम संगं कृशमासीदित्यर्थः अत्र काठिन्यस्य प्रतिहतिं तुल्यात्काव्यलिंगेन दयेक्षया कुचयोः कार्श्याभावनिमि
त्तान्मदनेषुप्रतिघातोत्प्रेक्षणात् काव्यलिंगसंकीर्णगुणाभावनिमित्ता क्रियास्वरूपोत्प्रेक्षा॥ ४९॥ नेति॥ प्रियतमे मम हमे व्यतिसति हृ

ध्रुवमागताः प्रतिहतिं कठिने मदनेषवः कुचतटे महति । इतरांगवन्न यदिदं अरिम ग्लपितावलग्नमगमत्तनुताम्॥ ४९॥
न मनोरमास्वपि विशेषविदां निरचेष्ट योग्यमिदमेतदिति॥ रहमेव्यतिप्रियतमे सुदृशां वसनांगरागसुमनः सुमनः॥ ५०॥

रणोत्स्वः समेति शब्दादेशः। विशेषविदां तारतम्यवेदिनीनां विवेकिनीनामपीत्यर्थः सुतनवः सुदृशां सम्यग्दर्शिनीनां स्त्रीणां मनः कर्तृ मनो
रमास्वपि वसनांगरागसुमनस्सु वस्त्रगंधमाल्येषु इदमेतदिदं पुते वर्ति वस्तु एतदिति वसनमिति अनुलेपनमिति सुमनस इति विशेषाका
रेण न प्रायोग्यमस्माकं धारणार्हमिति चर्नैरीरवेष्टनति रथारयतू प्रियागमननहर्षात् कादिकर्तव्यतामूढमभूदित्यर्थः चित्तानेर्लुङि ऽः स्वि
द्वृसार्वधातुकार्द्धधातुकयोरिति गुणः हर्षात्र संचारिनिश्चयसंदेहाद्योक्तेरतिशयोक्तिः सुमनसः सुमन इति यमकविशेषश्चेति संसृ
ति
ष्टिः॥ ५०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मिपः १

मा० टी० वपुरिति॥ वधूः स्त्री परिरंभसुखव्यवधानभीरुकतया आलिंगनसुखविच्छेदभीरुत्वेन अंशुकमपि वस्त्रमपि क्षमपि क्षमत इति कुकमुत्पत्ययः वपुर्लग्नं

११ सनात्तु लिप्तवती· अंगरागमात्रव्यवधानमपि न सहत इत्यर्थः लिंपतेः कर्त्तरि लुङि तङ् न च आहि अस्य तेव पुः प्रियसंगमेषु अनवलेपम

नमगर्वं चेति यत्र अवलेपस्तु गर्वे स्यात् लेपने भूषणेऽपि चेति विश्वः इ ममत्वलेपत्वमेवास्य वधुः वा चाऽंगरागसंयुक्तं तेन मानुषालितो व

मर्थान्तरन्यासः॥५०॥ निजेति॥ अपरा स्त्री निजपाणिपल्लवतलस्यसत्वलनादभिधाना इति नासिकाविवरं नासारन्ध्रं प्रलुत इत्यनिले रास्य

कमलस्य श्वसनैः मुखमारुतैर्मुखवासं नं सुखवासना शालकैः परिहस्य मुमुदे इयं यामकसज्जिका नायिका॥५१॥ विघ्नत इति॥ दिवा श्री

वपुरन्वलिप्त परिरंभसुखव्यवधानभीरुकतया न वधूः॥५०॥ क्षम मस्य वा क्षमिदमेव हि यत् प्रियसंगमेष्वनवलेपवपुः ५१

निजपाणिपल्लवतटस्खलनादभिनासिकाविवरमुत्पतितैः॥ अपरा परीक्ष्य शनकैर्मुमुदे मुखवासमास्यकमलश्वसनैः॥ ५२

विघ्नते दिवा समवयसा वपुरः परिपूर्ण मंडलविकासमन्वति ॥ हिमधाम्नि दर्पणतले च मुहुः स्वमुखश्रियं मृगदृशो ददृशुः॥ ५३

काथेन समवयसा सवयस्यया च वपुरोऽयविघ्नते विधारिते परिपूर्णमंडलविकाशं विंबशोभां विभर्त्तीति तद्रूपेण हिमधाम्नि चंद्रे दर्पणतले च स्व

मुखश्रियं स्वमुखश्रियं पूर्वं उपमानभूतामुत्तरत्र उपमेयभूतां चेत्यर्थः मृगदृशः ददृशुः अत्रौपम्यपरीक्षार्थं मितिभावः अन्यान्यश्रियोऽन्यत्रासंभवा

च्चन्द्रेऽन्यस्य दृष्टौ मिति सादृश्याक्षेपादसंभवद्वस्तुसंबंधात्मिदर्शनानां तथा चन्द्रदर्पणयोर्मुखसदृशौ शोभाश्रयथासंख्यमन्वया दृष्यासंख्यालंकारश्च

तदुभयापेक्षया चन्द्रदर्पणयोर्मुखश्रीदर्शनस्थानत्वेन वस्तुतयोरेवोपम्यस्य गम्यत्वात्तु ल्ययोगितेति संकरः॥५३॥ श्रीमहदेवाय

राम

११



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिज्ञान्विति ॥ नमाति कपोलार्पणाय प्रह्वीभवति करः पद्म इव पाणिपद्मे इवेऽर्पितं निहितं कपोलतलं गण्डस्थलं यस्य तं बाहुमभिज्ञानुज्ञा
नुनिविभ्रमस्यैव्ययीभावात् उपधाय निधाय कूर्परेण जानुमावद्धभ्येत्यर्थः कंठे परिवर्त्तनं इति कंठपरिवर्त्तिनं तनुमुखो चारितमित्यर्थः
कलम च क्रम चुरंसृहीनं तारत्वो निभृतं पंच सु दिनकामि व्यक्ति मृन्यं हीनं वाप्नतं नस्यर्यात कामक पामंद कंठनैवावगीत येत्यर्थः
कालक्षेपार्थमिति भावः अय चोत्कंठानुभावः अपरयास्त्रिया उदकं कंठितं कंठितं प्रियतमनो त्सुकयास्थितमित्यर्थः भागोलुडितिवित्ताल्
के अपकालमहिमत्वलक्षणामौत्सुक्यानिबन्धनाप्रेयोलंकारः परत्यापरयोः तिपमक विशेषणेतिसंसृष्टिः एवापाविरहोत्कंठिताम्

अभिज्ञानु बाहुमुपधाय नमत्करपद्मवार्पितकपोलतलं उदकंठिकं परिवर्त्तिकलस्वरशून्यगानयरयाऽपरमा ॐ ॐ ॥५४॥
प्रणयप्रकासनविदोमधुराः सुनरामभीष्टजनचित्तहृतः । प्रजिघाय कांतमनुमुग्धतरस्तरुणीजनो दर्शयाथ सखीः ॥५५॥

येकृतमयिकेतियिरसोत्कंठितोन्मना इति लक्षणात् ॥५४॥ प्रणयेति ॥ अथ प्रसाधनानंतरं मुग्धतरोत्यतं कामसमोहितः तरुणीजनः
प्रणयप्रकाशनविदोऽनुरागसंज्ञ चतुरा इत्यर्थः मधुरा मधुरभाषिणीः अन्यत्र रम्याकृतिः सुतरामभीष्टजनस्य चित्तहृतो मनो
हारिणीः सखीः दृशाद्भुवकांतमनु प्रियजनं प्रति प्रजिघाय प्रेषितवान् हिनोतेर्लिट् दूत्येन सहसमासवचनात् दृशाइवेति समासः पूर्णोपमा तदास
खिनामा प्रत्यांतरंगत्वकार्यदर्शित्वादिव्यंजनादलंकारेणावस्तुद्भुतिः ॥५५॥ नोवर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी० तथा काचिन्नायिका दूतीं वाचिकमनुशास्ति ॥ नचेति ॥ समेदयितो यथा मयि करुणां कुरुते यथा लघुना मत्यन्तीच मा का गच्छति न गम्यते कृतं
१२ दयितमुपगम्य प्राय्यतया निपुणां वदेः विश्वरथ्थार्थ सो वा लिङ्दूती त्थं काचिन्नायिका ऽसि दूति समिलक्षरो ऽप्यथी भावेन प्रेसकरुत्स्वत्वं तं
दिदिशे संदिष्टवती कर्त्तरि लिट् स्वरितेत्यात्मनेपदं नायिकानुकलरान्तरिता॰ केनात्मानं परान्गुष्यपश्चात्तापसमन्वितेति लक्षणं
तु ॥५५॥ दयिताप्यति ॥ मानपरयो ऽसि मानवत्या ऽनएवा परयानायिकया ऽगदिता दयितमानयेत्यनुक्तापि सखि दयिता यदर्थ्यं मानेनु न७

नवमेव गच्छति यथा लघुनां करुणां यथा कुरुते समयि   निपुणां तथैनमुपगम्य वदेरसि दूतिका चिदिति संदिदिशे ॥ ७ ॥ पू०
दयितापमानपरया परयात्वरितं यथा वगदितापि सखी०।   किमु चोदिताः प्रियहितार्थकृतः कृतिनो भवन्ति सुहृदा ॥ ७ ॥ पू० ७ ॥
सुहृदः

किमर्थोपपस्य चकमेणिस्यानिमत्ततिवतुर्थ्या त्वरितं शीघ्रं यथो ऽत्र्यन्यथा मरणार्थं कथेतिभावः तथाहि शोभनं हृदयं येषां ते सुहृदः तानि
त्रारिण॰ सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातः चोदिताः सन्तः सुहृदां प्रियो हृद्यः हितः श्रेयस्कार्थयोर्थस्तं कुर्वन्तीति प्रियहितार्थकृतः कृ
तमेवामस्तीति तेनः कृतकृत्या भवन्ति॰ किमु किन्तु चोदनां विनैव कृत्वा कृतिनः कृति भावः अर्थान्तरन्यासः नायिका च पूर्ववत् ॥ पू० ७ ॥ राम
३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ काचित्कलहान्तरिताकान्तं प्रति निमित्तीकृत्य सन्दिश्याति ॥ धनिमित्येस्यति ॥ अपराधकृतमागस्कारिणं कान्तं प्रति निमित्ता निराकृत्य पु
नर्मयैवास्यानुवृत्तिरनुसरणं क्रियते यदि तावत् दुश्चितैवं पतति बुतानां थापोस्वराचित्तानुवृत्ते ऊर्म्मेत्यादिनिभावः किं तु हेसखि तनोनुवृत्ते मे मया नमन
सम्मानमानहि नाचितीकत्यपेक्ष्यत ॥ ५८ ॥ तन्मानापवादविरुद्धे एवस्वीयतां तत्राह ॥ अधीरेति ॥ धैर्यकलिताकलित धैर्या समनिवाहिता
स्मादित्यादि तिनिवायाः परतिपातः दयितमवधीयेति रक्तोऽन्यतेन सहविरोधं विदधे करोमीति चेत् दधाने कर्तरि तङ् प ॥ हेसखि तव किमि
व गोप्यते निगुह्यते न किंचिदित्यर्थः किंचिदित्यः कोन्तु कथ्यते एवेति कथयति · सनचमह मावलेन यं न्नत इति साहसिकी · अथोजनसंहोम प्रावेन तङ्
प्रतिप्रिय कान्तं पराधकृतं यदि तावद्दस्य पुनरेव मया सुष्ठु नेनुवृत्ति रुचितैव नतः कलये द मानमननमेमारिवेमाम् ५८
अथ धीर्यधैर्यकलिता दयितं विदधे विरोधमथ तेन सह न वगोप्यते किमिव कर्तुमिदं न सहास्मिसाहसम समाहसिकी ५९
नतु पेत्यमास्मतमुपात्तमथा नहि दोषमस्यकि लविमवयं इति संप्रधार्य दयिता मवधूर्वि हिंनागसोपाविसमर्जोसरवी मु ६०
तिच कुमी नभवति इत्य साहसिकी अहमिति दोषः इदं साहसं विरोधाचरणस्वरूपं साहसं कृत्यं कर्तुमशक्य पेत्यादिनानुसंधान इति सहासमर्थो पचावेचूना
स्मिन्न्या साहसिकत्वस्य विशेषणागत्या चासहने हेतुकत्वोक्तेः पदार्थहेतुकं काव्यलिंगं ॥ ५९ ॥ तर्हि किमत्र कार्यमत आह ॥ नदिति ॥ तत्तस्मान्नवद्दत्र मनु
वेत्यमास्मोपालभथाः नोपालभथाः नोपालभथाः नोपालभस्वतदोषं नगणयेत्यर्थः स्मो तरेलङ् स्येनुवाङ् पूर्वोस्मे र्लङ् नमाङ्योग इति लङ् धातिवेधः
मनुतापपराधः कथं नोपालभ्यस्तत्राह एवमस्य दोषमपराधं न विद्मः किल अज्ञानात्तत्त्वति हासन्नत्यर्थः कार्यार्थिनः कुतो गर्व इति विहोलटो वेतरणलादेशः इ
ति संप्रधार्य निनिश्चित्य वधूर्नायिका विहिनागसे कृतापराधायापि रमणाय प्रियसेक्रियायरहणायानुधीमसखीं विसमर्जे प्रजिघाय विरहासहिष्णुतयेति

४०

सा०प०टी०नलिवेति॥ ननु संदिश आस देशं ब्रूहीत्युदिता यादूत्या कथितया सुदृशा नायिकया त्रपया हेतुना किंचन नाभिदधे नाभिहितं खलु॰ किंतु निजमैक्षि
मितैरशरीरशरैरनंगवाणैरनिशं कृशितं कृशीकृतं॰ कृशा शरीरेण कृशोऽतिशयाल्लत्कर्मशीलत्वः सा विलपन्त्यापि वैशतो हृलोदस्त्रे घोरस्य का
रस्मारे पाद देशः निजं शरीरं मंदमैक्षिर्दृक्षितं॰ स्थापि कलहान्तरितामध्या च॰ त्रपया निजहृदयानभिधानान्निजनिरीक्षणेन स्वावस्थानिवे
दनो॰ नतु हस्तसंज्ञोस्मरत्वावगमादिति इयं च पंचमी कार्योत्पाकामावस्था हदूनः संगसंकल्पो जागरः कृशता रतिः॰ह्रीत्यागोन्माहमूर्छा

ननु संदिशेति सुहृदोदितया त्रपया न किंचन किलाभिदधे निजमैक्षि मंदमनिशं निशितैः कृशितं शरीरमशरीरशरैः॥ ८१॥
ब्रुवते स्म ताः समुपसृत्य नरान्लरवन्मुगल्भमतिगर्वगिरः सुहृदर्थमीहितमजिह्मधियां प्रकृतेर्विराजति विरुद्धमपि॥ ८२॥

नाद्गुत्यतं गदशा दश॥ ८१॥ इत्थं नायिकामिरूपिपादिश्य दूत्यः किमकुर्वन्नत आह॥ ब्रुवत इति॥ प्रगल्भाः धृष्टाः मतिगर्भाः प्रतिभामा
गर्भगिरो यासां ताः दूत्यो नरान्पुरुषानुपसृत्य नरवत् नरैस्तुल्यमेतेन तु ॰ स्त्रीक्रियाः वे द्विति रीतिवतिप्रत्ययः ब्रुवते स्म न चैतावतावैयात्यं
पुरुषान्प्रार्थयन्त्यास्मे नाह॰ सुहृदर्थमितितथाहि॰ अजिह्मा कुटिला बुद्धिर्येषां तेषां सुहृदामपि सुहृदर्थमित्यार्थे अर्थेन सह नित्यसमासः स
र्वलिंगता चेति वक्तव्यं ईहितं चेष्टितं प्रकृतेर्विरुद्धमपि स्वभावविपरीतमपि विराजति शोभते तस्मात्प्रगल्भ्यादोषइत्यर्थः॥ ८२॥ ८२॥ राम

शुद्धि

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ काचिद्दूतीकं चित्प्रियं प्रति सखीभिः प्रार्थ्यते ॥ ममेत्यादि । यो भुवि ममरूपकीर्तिसौन्दर्यप्रथममहरत् त्वयं त्वत्प्रियात दनुप्रसक्त
हृदया तस्मिन्नासक्तचित्तेति हेतोस्त्वयि मत्सरादिव मदनो नि[...]रस्तदयो निःक्रियः सन्नूनं त्वत्प्रियां सुतरां क्लेशयति क्षपयति खलु ।
एतेन कार्श्यावस्था कान्यत्र त्रसा क्षान्ता भति पक्षभूतनायकपीडासमर्थस्य मदनस्य तत्कीयनायिकपीडनोक्त्या प्रत्यनीकालंकारः सच
त्वयि मत्सरादिवेति हेतूत्प्रेक्षोत्थापितश्चेति संकरः वलिनः प्रतिपक्षस्य प्रतिकारे सुदुष्करे । यस्तदीयतिरस्कारः प्रत्यनीकं तत्
दुच्यते दृ[...]ेति ॥ सा त्वत्प्रियात नवकथासु गुणकीर्तनेषु मुहुः अंगुलीमुखेनांगुल्यग्रेण श्रवणं श्रोत्रविवरं निघट्टयति स्फालयति तिघट्ट[...]धुयति श्रवणे

ममरूपकीर्तिमहरद्भुवि यस्तदनुप्रविष्टहृदयेयमिति ॥ त्वयि मत्सरादिव निरस्तदयः सुतरां क्लिशाति खलु तां मदनः ॥ ६३ ॥
नवसा कथासु परिघट्टयति श्रवणं यदंगुलिमुखेन मुहुः ॥ घनतां ध्रुवं नयति तेन भवद्गुणपूरितेन पूग[...]पूरितमस्य तया ॥ ६४ ॥
उपताप्यमानमलघूष्मभिः स्वसितैः सितेतरसरोजदृशः ॥ द्रवतां ननेतुमधरं क्षमते नवनागवल्लिदलरागरसः ॥ ६५ ॥ ध्रुवं ॥

नवसि परिघट्टनेन भवद्गुणपूगपूरितं श्रवणामन्तःस्थिताः भवद्गुणस्य हरोलासं तु ध्रुवमा घनतां नयति । बहुतेऽद्गुलमानर्थं प्रस्यादित्र दूतयो गुणपावेश यस्ते नवती स्य पः श्रु
वणिस्तु प्रेक्षायां श्रवणकंडूविनोदनार्थं श्रोत्रघट्टनेन घनतानयनं तूत्प्रेक्ष्यते ॥ ६४ ॥ उपेति ॥ अप्रेयसी रक्ताः संतापाद्धिक उष्णमा उष्णत्वं येषां तैः स्वसितैः निस्वासैः उ
पताप्यमानं ति तेन सरोजदृशो नि लोत्पलाक्ष्या अधरं नवनागवल्ली दलानां रागरसो रंजकद्रवोद्रवतां मार्दवं नामेतुं न क्षमते न शक्नोति एतेन ज्वरावस्थोक्ता द्रवत्वं सं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

श्री०४० दधतीति ॥ रतिपतेरिषवः शितत्वं तैक्ष्ण्यं दधति स्फुटमित्युत्प्रेक्षा यस्मान्निरन्तरं नीरंध्रं बृहत्कठिनं च यत् स्तनमण्डलं तदेवावरणं वर्म यस्य तत्तदपि उत्पल
१५ पलाशदृशः उत्पलाक्ष्याः हृदयमभिदन् भिन्दन्ति स्म भिदेर्लुङि रूपमिति नो वेत्ति वेद्युरेकदेशः सा वरतामपि भिन्दामिति विशेषो व्यापितं स्मरशरैरेव क्षिप्त्वा
उत्प्रेक्षा। तथा च रन्ध्रान्वेषिणा कामेनेति पीड्यमानायास्तस्यास्त्वद्विरहेणाजीवितसंशयमापादयतीति वस्तु ध्वन्यते ॥ ६५ ॥ कुसुमादिति ॥ अस्मि
न दृशः स्मरदृष्ट्याः अङ्गं कुसुमादपि सुतरां सुकुमारमित्यनेनाकुमारकोमलमिति हृदं न परथा अन्यथा न । किन्तु सत्यमेवेत्यर्थः । यद्यस्मात् कुसुमे
षुरकरुणो निःक्रिपः सन्निजैर्विशिखैर्बाणैः पञ्चत्वं प्राप्ता विशिखा स्मरः कुसुमैरेवेत्यर्थः करुणां दीनं यथा तं यथा निशमुत्तपति तापयतीत्यर्थः

दधति स्फुटं रतिपतेरिषवः शिततां यदुत्पलपलाशदृशः । हृदयं निरन्तरबृहत्कठिनस्तनमण्डलावरणमप्यभिदन् ॥ ६६ ॥
८ कुसुमानि विस्मितदृशः सुतरां सुकुमारमङ्गमिति नापरथा । अनिशं निजैरकरुणः करुणां कुसुमेषुरुत्तपति यद्विशिखैः ॥ ६७ ॥
विषमां तां निबोधितमपरि यथा समुपैति सर्वमिति तन्मदः । अमृतांशुनापि विरहाद्भवतो यदमूं दहन्ति हिमरश्मिरुचः ॥ ६८ ॥

तपतिरयं सौवादिकः सकर्मकः कुसुमाधिकसौकुमार्यभावे कुसुमैः पीड्यत इति कुसुमाधिकसौकुमार्यगुणोत्प्रेक्षा नापरथेति व्यंजकप्रयोगादूत्प्रेक्षा ६७ विद
विषमतामिति ॥ अपरिचयादिविपरीतप्रयोगेणानिबोधितमुपयुक्तं सर्वं अमृतमपीति भावः विषमतां विषवद्दहितत्वं समुपैति इत्यदर्दं चेत्त्वं तत्त्वं ध्रुवं अमृतांशु राम
नोऽपि शुभ्रतेः किंपितु कर्हि मरश्मिरुचः चन्द्रपादाः भवतो विरहाद्धेतोः त्वया विनाऽसंगमादित्यर्थः अमूं त्वत्प्रियां दहन्ति पा... पूर्वं त्वया सहसेवनादाह्ला १५
दयन्तीति भावः एतेन विषयविद्वेषरूपाऽवस्थोक्ता । विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ६८ ॥ ०.० ० ० ० ० ० ०

CC-0. Digitized by eGangotri and MIDF- Delhi

उदितमिति॥ प्रियां वृत्ति प्रियामुद्दिश्य हृदयस्येदं हार्दं प्रेम प्रेमाना प्रियतमा हार्दं प्रेम स्नेह इत्यमरः तस्येदमित्यण् प्रत्ययः हृदयस्य हृल्लेख यदण्लासे
से वितिहृदयस्य हृदादेशः सहार्दं सस्नेहं मितं स्तुदितं वदेः कर्मणि क्तः वचिस्वपीत्यादिना संप्रसारणं वचो इति वाक्यं प्रियतमे[illegible]न प्रद्धी यतविश्व ॥७०॥ [illegible]
सितं दध्यौ तेः कर्मणि ल्यङ् श्रद्धन्तरोरुपसर्गवद्वचनात् अत्र ध्यं ल्यपाः कप्रयोगः हियस्मन्युः पूर्वमेव विदितेऽङ्गे तो विदित परासिप्राये जने इङ्गितं हृदङ्गो
भावइतिसज्जनः इतीरिता उक्ता गिरः सपदिलगंतिखलु त्वयं प्रियाहृदयवेदित्वात्स्वबुद्धेः संवादेन इतिकाथितं प्रियाविरह दुःखं विप्रलम्भासेत्यर्थः
मांप्र१

उदितं प्रियेति सहार्द्रमिति प्रदधीयतप्रियतमेन वचः विदितेङ्गिते हि पुरएव जने सपदीरिताः खलु लगंति गिरः इति सतमिदं
दयिता हृतस्य युवभिर्मनसः परिमृष्टतामिव गतैः प्रथमं उदितेततः सपदि लब्धपदैः क्षणदाकरेनुपदिभिः प्रययेऽ ॥७०॥

८२
अर्थान्तरन्यासः क्षणाकलहान्तरिता श्रत एवमानख्योविप्रलंभश्रृंगारः पूर्वानुरागमानाख्य प्रवासकरुणात्मकं विप्रलंभाभिधानो यं शृंगारः स्याच्चतुर्विध
इति॥६८॥ दयितेति॥ प्रथमं चन्द्रोदयात्प्राक् परिमृष्टतामिति जमनो वहन्ते मार्गो न मित्त्रतामुपगतैः ततः पश्चात् क्षणदाकरे उदिते सति सपदि लब्धपदैर्द
ब्धचोरपदचिह्नैः अतो दयितानामिहृतस्याकृष्टस्यापहृतस्य च मनसोनुपदिभिरन्वेष्टुभिरन्विष्यद्भिरिवेत्यर्थः अतएवगम्योत्प्रेक्षा प्राबल्यं वित्त धैर्यत्यागस्तिमि
ताश्चनुपदन्वेष्टतिनिपातः अन्वेष्टानुपदीत्युक्त इति वैजयन्ती युवभिः प्रययेप्रयातं यातेर्भावे लिट् अनेन कपदान्वेषणोत्प्रेक्षावापूर्तां चोरस्याहि मिरूपनाम्ब

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी० अथ सूत्रांगं हरप्रीतार्तं कृत्तान्तं वर्णयति ॥ निपपातेति ॥ संभ्रमभृतः प्रत्युत्थानसंभ्रमयुक्तायाः सम्भिन्नभुवो गलितायाः श्रवणाग्रगलितालिकुलं गुञ्जदलिपुं

९६ जं उपसर्गात् समासेऽपि णोपदेशस्येति णत्वं वारिरुहं अवरोप्य संदयितावलोकेन विकसतो विस्तारं गच्छतो नयनस्य प्रसरेण प्रसारेण प्रणुन्नमिव पृथं

पृथक्त्वं निपपात । तथा संभ्रान्तमित्यर्थः । अथ संभ्रमहेतुकस्य कर्णोत्पलपातस्य नयनप्रसारहेतुकत्वमुत्प्रेक्षाने रूपा च हस्ता ॥७१॥ उपनेतुमिति ॥ सहसा वेगतो

९६ हर्षादागतः कश्चन युवा तरसा वेगेन रभसोत्थितामत एव वक्ष्यन्ति मन्तां कुचयोर्युगेन कुचयुगलेन करणेन गुरुं दिवमाकाशमुपनेतुमिव ऊर्ध्वं प्रापयितुमिवेति

कलोत्प्रेक्षा उत्थाननिमित्तोन्नत्यगुणनिमित्ता तरसा वेगेन कलितां व्याप्तां वधूं प्रियां परिरभ्यारुधत् रुद्धवान् उपवेष्टितवान् कुत्रचित्पतितात् पातितवानिति वा

निपपात संभ्रमभृतः श्रवणादसितं सुवः प्रणदितालिकुलं । दयितावलोकविकसन्नयनप्रसरप्रणुन्नमिव नीरुरुहम् ॥७१॥

उपनेतुमुन्नतिमतेव दिवं कुचयोर्युगेन तरसा कलिताम् । रभसोत्थितामुपगतः सहसा परिरभ्य कश्चन वधूमरुधत् ॥७२॥

अनुदेहमागतवतः प्रतिमां परिणायकस्य गुरुमुद्वहता । मुकुरेण वेपथुमतो नितरामपपाति न वधूकरतः ॥७३॥

व्यार्थः ॥ रुधेर्लुङि इरितो वेति च्लेर्विकल्पादङादेशः रूपा उत्प्रेक्षा रोमांचिता चानुभाववती च ॥७२॥ अनुदेहमिति ॥ अनुदेहं देहस्य पश्चात् अव्ययं विभक्तीत्या

दिना पश्चादर्थेऽव्ययीभावः आगतवतः परिणायकस्य परिणेतुः वोढुरित्यर्थः नयतेस्तृच्प्रत्ययः उपसर्गादसमासेऽपीति णत्वं गुरुं पूज्यं भारवतीं च प्रतिमां प्र

तिबिंबमुद्वहता पश्चात्स्थितस्यापि तत्संनिधिमुखत्वादिति भावः मुकुरेण दर्पणेन कर्त्रा दर्पणो मुकुरादर्शावित्यमरः वेपथुमतो नितरां कंपमा

नादतिमात्रं भरो यस्य तस्मात् दतिभरात् प्रतिबिंबगतमुकुरस्थादरणादिति भावः वोढायाः करतः पाणितलात् नापपंच स्मात्तमिलूक अपिनापाति न पतितं मह ०राम

ताप्रपलेनावधारितमित्यर्थः भावे लुङ् रूपा च मुग्धा अत्र वधूकर्तृकस्य भारासंबन्धेऽपि तत्संबन्धोक्तेरतिशयोक्तिः गुरुमिति श्लेषोत्थापितेति संकरः ॥७३॥ ९६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवनस्येति॥ अवनस्य गाढमुपगूढवता आश्लिष्टवता अनेन वक्षसि निमग्नकुचद्वितयेन दयितेन तत्क्षणोच्चलन्नूपुरगच्छद्रसनायाः कलः किंकीणीरवो यस्मिन् कर्मणि तद्यथा तथा वध्वः उदासि उत्क्षिप्तः॥ ७४॥ करेति॥ दयितोपगमे त्वराविरहिता सनया उत्थितयेत्यर्थः कयाचिदिति शेषः अनत एव गलितं स्रस्तं अत एव करेरुद्धनीविकं स्खलितं वंध्यनं वसनं क्षणाद्दृष्टा हाटकशिलायां दृशी हेमभित्ति प्रतिमा स्फुरन्ती । ऽरुभित्तिरुद्धे शोभारिमन्क मेशीन यथा तथा हिरण्यं हेमहाटकमित्यमरः वव से आच्छादिते वसे आच्छादने आत्मकर्मणि लिट्उरुभित्तिरिवेत्युपमितसमासः अत्रोपमा ॥ यो संस्सृष्टिः॥ ७५॥ पिदधानमिति॥ नवेधूते वोढाऽन्वकस्मात् उपेत्य दृशौ पिदधानमाच्छादयन्तं प्रियं दक्षिसादकः कः वदत्निभुवते एवं तेजनाय गिरा वाचाऽभिधातुं नाध्यवससे न स्फुते जयेनि भावः अध्यवपूर्वात् साहतेः कर्त्तरि लिट् किन्तु पुलकैरेव गदन् अत्र प्रियज्ञानरूपस्यार्थस्य लज्जयाऽसंलक्षितस्य पुलकैः प्रकाशनात् स

अवनस्य वक्षसि निमग्नकुचाद्वितयेन गाढमवगूढवता दयितेन ततक्षणोच्चलद्रसना कलकिंकिणीरवमुदासि वध्वः॥ ७४ ॥ ०॥
कररुद्धनीविदयितोपगतौ गलितं त्वराविरहितासनया क्षणदृष्टहाटकशिलासदृशस्फुरदूरुभित्तिवसनं ववसे॥ ७५ ॥ ०॥
पिदधानमन्वगुपगम्य दृशौ भुवतेजनाय वदकोयमिति अभिधातुमध्यवससे न गिरा पुलकैः प्रियं नववधूरगदत्॥ ७६ ॥
उदितोरुसादमतिवेपथुमत्सुदृशोभिभर्तृ विधुरं त्रपया वपुरादरातिशयशंसिफलः प्रतिपत्तिमूढमपि बाढमभूत्॥ ७७ ॥



क्ष्मालंकारः अर्थलक्षितम् क्ष्मार्थप्रकाशः सूक्ष्मउच्यते इति तल्लक्षणात्॥ ७६॥ उदितेति॥ अभिभर्त्तृ समक्षं लक्षणेनाभिप्रतीत्याभिमुख्यइत्यव्ययीभावः उदितउत्पन्न ऊरुसाद ऊर्वोर्निश्चेष्टता यस्य तत् अतिवेपथुमत् अतिकंपवत् अति एतेन विशेषणद्वयेन प्रस्तुत्या नालिंगविशेषिणैस्तंभवेपथुसात्विका वुक्तौ त्रपया विधुरं विलक्षणं एतेन लज्जासंचारिणाप्रियवाक्कृतत्वेभुक्तं एवं प्रतिपत्तिमूढमपि इतिकर्त्तव्यतामूढमपि सुदृशो वपुर्बाढमत्यर्थमादरातिशयशंसि सुखरागादिलिंगैरादरविशेषव्यंजकमभूत्सत्यादरेकिमुपचारै रिति भावः॥ ७॥ ७॥ ७॥ ७॥ ७॥ ७॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

भा०टी०
१७
७८
परि ति॥ प्रमदा अधिवेश्मनिजवेश्मनि पत्युरुपचारविधौ अभ्युत्थानादिकर्मणि अलघोर्महतः उरुभरात् भरिमं भराभिरलसाभिरनुपदं पदे पदे स्खलिता
भिस्ताभिरपि गतिभिः प्रणयातिभूमिं प्रेमप्रकर्षमगमन् प्रमास्पदीभूता अभूवन्नित्यर्थः अभ्युत्थानादपि स्खलितगमनमेव पत्युः प्रीतिकरमभूदिति भावः
स्त्रीणां स्खलनं पत्युः प्रीतिकरमिति विरोधाभासोलंकारः॥७८॥मधुरेति॥ मधुरं मनोहरं यथा तथोन्नते उद्घलिते भ्रुवौ यस्मिंस्तन्मधुरोन्नतभ्रु गोलि
योरुपसर्जनस्येति ह्रस्वत्वं॰ दृशोः ललितं नयनचेष्टा च सकरप्रयोगं हस्ताभिनयसहितं च चतुरं वचश्च सुतनोः स्त्रियाः प्रकृतिस्थमपि स्वभावसिद्धं॥
मेवसदपि यदनिपुणेनानिपुणागमितं मनुभाषितमतः स्फुटं प्रथितं यन्नाट्यं तस्य लीलेव लीला यस्य तत्तथोक्तमभवदिति निदर्शनालंकारः तथा

परिमन्थराभिरलघूरुभरादधिवेश्मपत्युरुपचारविधौ स्खलिताभिरप्यनुपदं प्रमदाः प्रणयातिभूमिमगमन् गतिभिः॥७८
मधुरोन्नतभ्रुललितं च दृशोः सकरप्रयोगचतुरं च वचः प्रकृतिस्थमप्यनिपुणागमितं स्फुटनाट्यलीलमभवत्सुतनोः॥७९
तदयुक्तमङ्गनवयौवनस्य जानकृतं यदीक्षणास हसितं प्रकटीकृतो जगति येन खलु स्फुटमिन्द्रजालमपि गात्रमिदं॥८०
यथ नविभावयन्ति निशमादृशिगतामपि मां भवानतिसमीपतया हृदयस्थितामपि पुनः परितः कथमीक्ष्यते बहिरभीष्टतमां॥८१॥

नर्तक्युपमागम्यते॥७९॥ अथ कस्याश्चित्सपत्निनामग्रहणेनाहूतायाः कान्तोपलम्भं त्रिभिः कुलकेनाह॥तदिति॥ हि॥ अंगे त्वाम नूतनोन्मिषत्सज्जा विधा
ज्ञात वर्द्धिष्णुलसमुत्सम्भूत॰ सख्या यामत्र वयवेन यपूर्णनकृतं न स्फुटमिति यत्तदयुक्तं कुतः येन कारणेन मयि विषये स्फुटं प्रत्यक्षमेव गोत्रभिदा नाम भेदिना
द्विभेदिना च॰ गोत्रं नाम्नि कुले चाद्रावपि वादवः त्वयेति शेषः अयमिन्द्रजालं जगति प्रकटीकृतार्थवत्तु स्वगोत्रभिदेति श्लेषानुप्राणितमसंभाव्यमिन्द्र
जालत्वं॥ भावान्तरभिव्यक्तिस्नेहप्रचयमुत्प्रेक्षते॥८०॥ नेति॥ अनिशमक्षिगतां चक्षुःसन्निकृष्टामपि दृष्ट्वा॥ मिवेति गम्यते॥ दृष्ट्वेत्यक्षिगतपुरुस्मरःमा
मतिसमीपतया यथा न विभावयति॰ दोषेप्रथम इति प्रथमपुरुषः॥ नविभावयते॥८०॥ न्द्रियसान्निकृष्टामपि न लक्षयतीति विरोधाभासनार्थोऽपि शब्दः॥
परमार्थस्तु दृष्ट्वा दति सामीप्याद्वा विभावनं न चित्रमिति भावः अभीष्टतमां पूर्णहृदयास्थितां हृदयादनपेतामपि अन्तर्हितामिवावगम्यते॰ अत एव
६२
राम
१७

CC-0. Digitized by eGangotri and MIDF- Delhi

माघ महाकाव्य चतुर्थ सर्ग:

॥ श्री:१तुरीयसर्गोयम्माघस्य ॥
श्रीविश्वेशोवतु श्रीहरिः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF - Delhi



श्रीगणाधिपतयेनमः॥ निःश्वासेति· नीलोपलैरिन्द्रनीलमणिभिः स्यूताः प्रोताः विचित्रा नानावर्णा धातवो गैरिकादयो यस्मिंस्तं
अत एव रत्नभाभिर्मणिप्रभाभिः सह भूमिं भित्वा उत्थितं उद्गतं निर्गतं उरगाणां निःश्वासधूमं यत्फूत्कारवाष्पमिवस्थितं रैवताख्यं गिरिं असौ ह
रिर्ददर्श· स्यूतेतिसीव्यतेः कर्मणि क्तः·· च्छ्वोः शूडनुनासिकेचेत्यूठादेशे यणादेशः·· अत्र गिरेर्दिशि दृष्ट वर्णनीयत्वेन विशिष्टधूमवत्वो
त्प्रेक्षणात् गुणनिमित्तजातिस्वरूपोत्प्रेक्षा· तयोश्चित्रानाद्यन्तानितत्रास्वावष्टाद्योपजातयस्तल्लक्षणं तूक्तं· अतीतानन्तरमासर्गसमाप्ते
र्गिरिवर्णनमेव·॥१॥ गिरिं ददर्शेत्युक्तं कीदृशमित्याकांक्षायामेकान्वयेनाष्टाभिर्विशिनष्टि· गुर्वीरिति· गुर्वीर्महतीर्दृषदः शिलास्तटीरित्यर्थः॥

श्रीः॥ निःश्वासधूमं सहरत्नभाभिर्भित्वोत्थितं भूमिमिवोरगाणां॥ नीलोपलस्यूतविचित्रधातुमसौ गिरिं रैवतकं ददर्श·॥१॥ ॥
गुर्वीरजस्रं दृषदः समन्तादुपर्युपर्यम्बुमुचां वितानैः॥ विन्ध्यायमानं दिवसस्य भर्तुर्मार्गं पुनारोद्धुमिवोन्नमद्भिः॥२॥ ॥ ॥

पाषाणप्रस्तरग्रावोपलाश्मानः शिलादृषदित्यमरः॥ उपर्युपरि दृषदां समीपे उपरिप्रदेशे इत्यर्थः·· उपर्यध्यधसः सामीप्ये इति द्विर्भावे तद्योगाद्द्विती
येति यथाह वामनः·· उपर्यादिषु सामीप्ये द्विरुक्तेषु द्वितीयेति समन्तादजस्रं समुन्नमद्भिः देशकालाद्व्यवच्छेदेनोन्नतद्भिरित्यर्थः·· अत एव तैरम्बुमुचां वितानैर्मे
घवृन्दैर्भित्वा दिवसस्य भर्तुः सूर्यस्य मार्गं पुनारोद्धुं विन्ध्यायमानमिव विन्ध्यवदाचरन्तं तद्वद्वर्धमानमिवस्थितमित्यर्थः·· आचारक्यङन्ताच्छानजादेशः·



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्रान्तमिति · पुनः नवानि प्रभाजालानि विभ्रतीति नवप्रभाजालम् । ततः तेषां मणीनां संबन्धिना कान्त्र नवप्रभाजा स्वर्णसानुप्रस्थ तथा दृश्यादीप्ता क्रान्तं व्याप्तं पुनः शिलानां
भेदकोपलानां इन्दुनीलानां वश्यामलतया श्यामलिम्ना भिरामं तथा भमन्त्रित षट्पदाभिः अकान्दपूरितत्वात् स्वादूतं भृङ्गाभिः ताभिः श्रितं व्याप्तं इतः पर्यन्त
रमेकं यमकं · तत्तदेवालंकारः · अर्थालंकारस्तु पुनश्च यदिति यथासंभवमूह्यं यमकलक्षणं त्वावार्यदण्डिनोक्तम् · अव्यपेतव्यपेतात्मा यावृत्तिर्वर्णसंहितेः · यमकं तच्च
पादानामादिमध्यान्तगोचरम् · एकद्वित्रिचतुष्पादयमकानां प्रकल्पना · आदिमध्यान्तमध्यान्तमध्याद्यन्त सर्वतः · अत्यन्तं बहवस्तेषां भेदाः संभेदयोनयः
सुकरादुष्कराश्चैव दृश्यन्ते तत्र केचनेति · ॥३॥ सहस्रेति · सहस्रमिति संख्या येषां तैः सहस्रसंख्यैः शिरोभिः शिरस्त्रैः उर्वीधृत्रगगनं तथा ततसंख्यैः पादैः पुनस्तप
र्वैतैश्च रश्मिश्च भुवं व्याप्य वितिष्ठमानमवतिष्ठमानं · समवप्रविभक्तस्य दृश्यात्मनेपदं · विलोचनयोर्वस्थानं योगपदेशस्तत्सुधारश्मिनिशाकरौ यस्यतं · अन्य

क्रान्तं रुचा कांचनवप्रभाजां नवप्रभाजालभृतां मणीनाम् ॥ श्रितं शिलाश्यामलताभिरामं लताभिरामं श्रितषट्पदाभिः ॥३॥ सहस्रसंख्यैर्गगनं शिरोभिः पादैर्
भुवं व्याप्य वितिष्ठमानम् · विलोचनस्थानगतोष्णरश्मिनिशाकरं साधु हिरण्यगर्भम् ॥४॥ क्वचिज्जलापायविपाण्डुराणि धौतोत्तरीयप्रतिमच्छवीनि ॥
अभ्राणि बिभ्राणमुमाङ्गसङ्गविभक्तभस्मानमिव स्मरारिम् ॥५॥ छायां निजस्त्रीचटुलालसानां मदेन किंचिच्चटुलालसानाम् · कुर्वाणमुत्पिंजलजातपत्रै-
र्विहंगमानां जलजातपत्रैः ॥६॥

अनेत्रीकृतार्केन्दुमित्यर्थः ॥ अतः साधु सत्यं हिरण्यगर्भं ब्रह्मरूपाणामित्युत्प्रेक्षा · सहस्रशीर्षेत्यादिश्रुतेरिति भावः · हिरण्यगर्भो विधिगर्भश्च ॥४॥ क्वचिदिति · पु
नः क्वचिदेकदेशे जलानामपायेनापगमेन विपाण्डुराणि शुभ्राणि · अतएव धौतं क्षालितं यदुत्तरीयं तत्प्रतिमा तत्समा छविर्येषां तानि · अभ्राणि बिभ्राणं ध
धानं अत्रः कर्तरि शानच् · अतएव उमायाः पार्वत्या अंगसंगेन गाढालिंगनेन विभक्तमेकभागस्थापितं भस्म यस्य तं स्मरारिं हरमिव स्थितमित्युपमालंकारः ॥५॥ छायामि-
ति · पुनः निजस्त्रीणां वदनेषु प्रियवचनेषु लालसा
लोलुपाः · लोलुपो लोलुभो लोलो लंपटो लालसो
पि चेति यादवः · तेषां निजस्त्रीचटुलालसानां मदेन
किंचिच्चटुला चपलास्ते च ते अलसाश्च विशेष
विशेषणविशेष्यभावविवक्षया विशेषणसमासः · तेषां चटुलाल
सानां विहंगमानां हंसादीनां उत्पिंजलानि आतानि उत्पिंजलजाता
नि पूर्ववत्समासः · तानि पत्राणि येषां तैः उत्पिंजलजातपत्रैः · अतएव
वातेनि पिंजरीभूतजलैरित्यर्थः · एतयोरभेदः · जलजैरेवातपत्रैश्छाया
कुर्वाणां स्तनेन महती कमलसंपत्तिर्यदुर्पते · यमकरूपकयोः संकरः ॥६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कन्धेति· पुनः स्कन्धप्रकाण्डमधिरूढा उज्ज्वला नीलकण्ठा मयूरा येषां तान् अन्यत्र स्कन्धाधिरूढाः असंस्थिताः नीलाः कण्ठाः येषां तान् अंसप्रकाण्डे पीः स्कन्ध इति विश्वः· अहीन्द्रैः श्लिष्टतनून् सर्पैर्वेष्टिततनून्· रुद्रपक्षे वासुकिप्रभृतिभिरलङ्कृतान् अन्यत्र तरुपक्षे लताभूषणानाम् अश्लिष्टत्वात्· अत्र सर्पा इव लता इति भावः· प्रवर्त्तिताः अनेकलता नाम एव भुजाग्रा नीलता नाभिव बभुजाग्राणि यैः तान्· अतः एव अनन्तानसंख्यान् रुद्रानिव स्थितानिति उत्प्रेक्षा· उर्वीरुहो वृक्षान् धारयन्तमुद्वहन्तं ॥ ७ ॥ विलम्बीति· विलम्बिनो नीलोत्पलान्येव कर्णपूराः कर्णावतंसा यासां ताः लोध्रेण लोध्रपुष्परजसा गौरीः रवच्छाः ताः· षिद्गौरादिभ्यश्चेति ङीष्· कपोलभित्तीः स्त्रीणां गण्डस्थलीरिव स्थिताः· उपमान्तरमाह· उत्पलाः वज्रवल्ल्युत्पलानि उत्पलपावल्वजाः प्रोक्ताः· नवैस्तैरलंकृता सैकतान्यासां ताः पुलिनानि यासां ताः

स्कन्धाधिरूढोज्ज्वलनीलकण्ठानुर्वीरुहः श्लिष्टतनूनहीन्द्रैः ॥ प्रवर्त्तितानेकलताभुजाग्रान्रुद्रानेकानिव धारयन्तम् ॥ ७ ॥ विलम्बिनीलोत्पलकर्णपूराः कपोलभित्तीरिव लोध्रगौरीः ॥ नवोत्पलालंकृतसैकताभाः शुचीरपः शैवलिनीर्दधानं ॥ ८ ॥ राजीवराजीवशलोलभृङ्गं मुष्णन्तमुष्णं ततिभिस्तरूणाम् ॥ कान्तालकान्ता ललनाः सुराणां रक्षोभिरक्षोभितमुद्वहन्तम् ॥ ९ ॥ कुतलकम्· मुदे मुरारेरमरैः सुमेरोरानीय यस्योपचितस्य शृङ्गैः ॥ भवन्ति नोद्दामगिरां कवीनामुच्छ्रायसौन्दर्यगुणा मृषोद्याः ॥ १० ॥

कुतः शुचीः शुद्धाः शैवलिनीः शैवलवतीः आपो दधानं· अत्र चित्रशैवलत्वात् आसां बिंबप्रतिबिंबभावेनोपमाद्वयम् ॥ ८ ॥ राजीवेति· पुनः राजीवराजीनां पद्मपंक्तीनां वशा अधीना लोलाश्चपला भृंगा यस्मिंस्तं राजीवराजीवशलोलभृंगं तरूणां ततिभिः संघैः उष्णमातपं मुष्णन्तं हरन्तं कान्तारम्याः अलकान्ताः चूर्णकुन्तलाग्राणि यासां ताः कान्तालकान्ताः· अलकास्तु कुन्तलाः स्त्रियः सुराणां ललनाः स्त्रियो अप्सरसो रक्षोभिः राक्षसैः रक्षोभितं अनभिभूतं यथा तथा उद्वहन्तं ॥ ९ ॥ ननु अल्पीयान् पर्वतः गिरिलोच्चयः कथमेवं वर्ण्यते इति शंकां निरस्यति· मुदेति· मुरारेर्मुदे हर्षाय अमरैः कर्तृभिः सुमेरोः शृंगैः करणैः राशीयोपचितस्य वर्द्धितस्य यानीतैः शृंगैः दृष्टोत्पन्नस्य पृथुप्रदेशो विशेषः संयोजितत्वात् नावयवः· रैवतकशृंगानां संबन्धेऽपि असंबन्धवर्णनात् अतिशयोक्तिः ॥ १० ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यत इति· लोकः परार्ध्यानि श्रेष्ठानि अनूनैर्महद्भिः भूरिभिः प्रभूतैः· प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु इत्यमरः· प्रस्थैः सानुभिः मानविशेषैश्च
प्रस्थो स्त्री सानुमानयोरित्यमरः· भृतानि संभृतानि मितानि च उच्छिखानि उद्रश्मीनि च अमितानि अपरिमितानि रत्नानि यतः शैलात् आढ्याद्धनि
कात्· इभ्य आढ्यो धनी स्वामी त्यमरः· प्रपणो व्यवहारः प्रयोजनमस्यास्तीति प्रापणिकः वणिक् तदस्य प्रयोजनमिति ठक्· पण्याजीवाः प्राप
णिका वैदेहा नैगमाश्चोच्यन्ते· वणिज इति वैजयन्ती· तस्माद्दिवाजस्रं मुहुर्जग्राह उपमालंकारः ॥११॥ अविद्यतेति· आसन्नमोऽन्ते त्यासन्नि(हि)

यतः परार्ध्यानि भृतान्यनूनैः प्रस्थैर्मुहुर्भूरिभिरुच्छिखानि ॥ आढ्यादिव प्रापणिकादजस्रं जग्राह रत्नान्यमि
तानि लोकः ॥११॥ अविद्यतासन्नमुदस्यतापं रविं दधानेप्यरविंदधाने ॥ भृंगावलिर्यस्य तटे निपीतरसा न
मन्तामरसा न मत्ता ॥१२॥

तं· अतएवोदस्यतापं दुःसहातपं रविं दधानेप्यरविंदधान इति अरविंदधान इति विरोधः· अरविन्दानां धाने निधाने इति धीयते यस्मिन्निति धानं·
अधिकरणे ल्युट्· शब्दश्लेषमूलो विरोधालंकारः· यस्य गिरेस्तटे निपीतरसा नितरां पीतमकरन्दा न मन्तितामरसानि पंकेरुहाणि भारभूतयाऽय
यासा न मन्तामरसा पंकेरुहं तामरसमित्यमरः· अतएव मत्ता भृंगावलिर्नाविद्यत न विन्ना विद्यते दैवादिकात्कर्तरि लङ्· अत्यन्तसूर्यसन्निधानेपि अरवि
न्दाकरविहारात् मधुकरास्तापं न प्रापुरित्यर्थः ॥१२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टी·च·
३

यत्रेति· यत्र शैले रजतस्य विकारो राजतः· प्राणिरजतादिभ्योऽञ् इत्यञ् प्रत्ययः· स चासौ गंडशैलश्च गण्डशैलास्तु च्युताः स्थूलोपला गिरेरित्यमरः· उन्निद्राणि विकसितानि पुष्पाण्यक्षीणीवेत्युपमितसमासः· तेषां सहस्रं भजतीति तद्भाजा· अधिरूढेन उच्चैर्महीरुहा वृक्षेण सुराधिपेन देवेन्द्रेणाधिरूढो यो

यत्राधिरूढेन महीरुहोच्चैरुन्निद्रपुष्पाक्षिसहस्रभाजा।
सुराधिपाधिष्ठितहस्तिमल्ललीलां दधौ राजतगंडशैलः॥१२॥

हस्तिमल्ल ऐरावतस्तस्य हस्तिमल्लस्यैरावतस्य लीलां शोभां दधौ· ऐरावतस्येवाधवल्यादिति भावः· हस्तिमल्लोऽभ्रमातंगे हस्तिमल्लो विनायक इति विश्वः· अत्र लीलामिव लीलामिति सादृश्याक्षेपान्निदर्शनालंकारः॥१२॥ टी:१
३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभिन्नेति॰ गरुडाग्रजेनारुणेन विभिन्नवर्णाः अन्यथाकृतवर्णाः अरुणिमानमापादिता इत्यर्थः॰ सूर्यस्य संबन्धिनो रथं वहन्तीति रथ्या रथाश्वाः॰ तद्वह
तीति रथ युगप्रासंगमिति यत्प्रत्ययः॰ पद्मेलेवंशकरीरनीलैर्वंशांकुरश्यामैः रत्नैर्मरकतैरित्यर्थः॰ वंशांकुरे करीरोस्त्री त्यमरः॰ वंशशब्दस्य म्लानताहे
तोरल्पनतायाः प्रतिपत्त्यर्थत्वाद्दोषो न हि कांश्चन एवैकार्थपदमप्रयोज्यमिति तु तन्मल्लीदिकलभकर्णावतंसादिष्टप्रतिपत्तिविशेषकरो पुनर्दोषस्त्वाह
वामनः॰ नविशेषश्चेदिति परितः स्फुरन्त्या रुचा स्वप्रभया करणेन पुनः स्वां रुचं निजां हरितवर्णमेवानिन्यिरे आनीताः॰ नयतेर्द्विकर्मकात्प्रधानेकर्मणि

विभिन्नवर्णा गरुडाग्रजेन सूर्यस्य रथ्याः परितः स्फुरन्त्या।
रत्नैः पुनर्यत्र रुचा रुचं स्वामानिन्यिरे वंशकरीरनीलैः॥ २४॥

लट्॰ प्रधानकर्मण्याख्येये स्यादिना द्विकर्मकानामिति वचनात्॰ अत्र विभिन्नवर्णा इत्येकस्तद्गुणः रथ्यानां स्वगुणत्यागेन गरुडाग्रजगुणग्रहणात्पुनस्त
त्यागेन मरकतगुणग्रहणादपरस्तद्गुणः तदुपजीवीति स्वजातीययोः संकरः॰ तेन गिरेः सूर्यमण्डलान्तमोन्नत्यं वस्तु व्यज्यते॰ तद्गुणस्वजातीययोः संकरस्तेन गि
रेस्तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणग्रहः॥ २४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा॰टी॰व॰ ४ यत्रेति· यत्र शैले समुन्नमद्भिः समुत्पतद्भिः अम्बुवाहैरुज्झिताभिः अद्भिश्च मुहुः समुन्नं सम्यगुन्नं क्लिन्नं सिक्तमित्यर्थः· उन्दी क्लेदने इति धातोः कर्मणि क्तः· नु
दविशेदन्नेत्यादिना निष्ठानत्वं विपन्नगा विगतसर्पा न भवन्तीत्यविपन्नगाः सपन्नगा इत्यर्थः· तेषामविपन्नगानां नगानां वृक्षाणां वनं विषपावकः स्थावि
षाग्निसमुत्थाविपदापन्नं न ववाधे नित्यं वर्षानुषंगाद्विषाग्निर्द्रुमोभीवृक्षाणामकिंचित्कर इति भावः॥१५॥ फलद्भिरिति· यः शैलः उष्णांशुकराभिम भि॰टी॰३

यत्रोज्झिताभिर्मुहुरम्बुवाहैः समुन्नमद्भिर्न समुन्नमद्भिः। वनं ववाधे विषपावकोऽथ विपन्नगानामविपन्नगानाम्॥१५॥ फलद्भिरुष्णांशुकराभि
मर्शात्कार्शानवं धाम पतंगकान्तैः। शशंस यः पात्रगुणाद्गुणानां संक्रान्तिमाक्रान्तगुणातिरेकाम्॥१६॥

र्शात् अर्ककरसंपर्कात् कृशानोरिदं कार्शानवमा
ग्नेयं धाम तेजः फलद्भिर्निष्पादयद्भिः अर्ककरसामर्थ्याभिव्यंजकैरिति भावः· पतंगकान्तैः सूर्यकान्तैर्दृष्टान्तभूतैरिति भावः· गुणानां संक्रान्तिं अन्यत्र संक्रमणमा
क्रान्तगुणातिरेकामित्यर्थः· पात्रगुणादाधारगुणसहकारादाक्रान्तः प्राप्तो गुणातिरेकः कार्यगुणविशेषाधानरूपो गुणोत्कर्षो यया तामाशशंस प्रतिपादया
मास अर्कत्विषां सर्वत्र संक्रमणाविशेषेऽपि सूर्यकान्तेष्वेव ज्वलनजननदर्शनात्सर्वत्रापि संक्रमकारिणां गुणानामाधारगुणसहकारात्कार्यविशेष
विधायकत्वमिति निश्चयोऽत्रैव जायत इत्यर्थः॥ ततश्च सहकारशक्तिविरहिणी सहजशक्तिरनुपकारिणीति भावः· छेकानुप्रासोऽलंकारः॥१६॥ ॥ श्रीहरिः ४

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृष्टोपीति· मुहुर्दृष्टोपि शैलः मुरारेः अपूर्वेणादृष्टपूर्वेण तुल्यमपूर्ववत्· तेन तुल्यं क्रिया चेद्वतिः· विस्मयमाततानऽतिरमणीयमिति भावः·
तथाहि· क्षणे क्षणे प्रतिक्षणम्· वीप्सायां द्विर्भावः· नवतामपूर्वत्वं यदुपैतीति यत्तन्नवत्वोपगमनमेव रमणीयताया रूपं स्वरूप
लक्षणमित्यर्थः· अत्र रमणीयत्वलक्षणस्य वाक्यार्थस्य विस्मयहेतुत्वसमर्थनाद्वाक्यार्थहेतुकं काव्यलिंगमलंकारः॥१७॥ उच्चारणज्ञ इति·
अथ हरिर्विस्मयानन्तरं गिरां वाक्यानामुच्चारणं जानातीति उच्चारणज्ञः उक्तिकुशलः· आतोनुपसर्गे क इति कप्रत्ययः· इगुपधेत्यादिना

दृष्टोपि शैलः स मुहुर्मुरारेरपूर्ववद्विस्मयमाततान· क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः॥१७॥ उच्चारणज्ञो
थ गिरां दधानमुच्चारणत्पक्षिगणास्तटीस्तं·॥ उत्कंधरं द्रष्टुमवेक्ष्य शौरिमुत्कंधरं दारुक इत्युवाच·॥१८॥ १८॥ १८॥ १८॥ ॥·

कारात्· अनुपपद्यकर्मोपपदे भवतीति विप्रतिषेधेनेति वचनात्कः· कसस्मारथिरद्या उच्चतारणान्तः पक्षिगणा यासु ताः रणत्पक्षिगणास्तटीर्द
धानं तं धरतीति धरं पर्वतं पचाद्यच्· अहार्यधरपर्वता इत्यमरः· द्रष्टुमुत्कं उत्सुकं उत्क उन्मना इति निपातः· उत्कंधरमौत्सुक्यादुन्नमितकंधरं शौरिं वीक्ष्य इ
ति वक्ष्यमाणप्रकारेणावाच मुखावनहीं ज्ञितज्ञो वसतेः वसीदृतीति भावः॥१८॥ इतः प्रभृति यमकानन्तरं श्लोकेषु वसन्ततिलका वृत्तं नियमेनाह· आच्छादिते
ति· आच्छादितान्यायतानि आयतानि दीर्घाणि दिशां वराणि अम्बराणि येन तं· अन्यत्र आच्छादितं वसितमायतं दिशो वांवरं वासो येन तं तथोक्तं· उच्चैः उन्नतं

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गां भुवमाक्रम्य व्याप्य संस्थितं तथा उदग्राः उन्नतानि विशालानि च शृंगाणि शिखराणि यस्य तेन उदग्रैः उन्नतं गां वृषभमाक्रम्याधिष्ठाय स्थितमित्यर्थः
शृंगं विषाणे शिखरे गोः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः अर्जुनो नेत्रादिष्वालम्भूर्वाग्वारिषु गोमते ति विश्वः मूर्द्धि शिखरे अन्यत्र शिरसि स्फुर(
न्ती तुहिनदीधितेः इन्दोः कोटिः रश्मिः कला च यस्य तमेनं नगेशं नगश्रेष्ठं रैवतकं कैलासनायकमीश्वरं वा वीक्ष्य भुवि को न विस्मयं तनुते इत्यर्थः नेयं तुल्ययोगि(

आच्छादितायतदिगंबरमुच्चकैर्गामाक्रम्य संस्थितमुदग्रविशालशृंगम् । मूर्द्धि स्फुरत्तुहिनदीधितिकोटिमेनमुद्वीक्ष्य को न भुवि
विस्मयते नगेशं ॥२५॥

ता प्रकृताप्रकृताविषये तु उत्थानात् नापि समासोक्तिः तस्या विशेषणसाम्यजीवितात् नापि श्लेषः उभयश्लेषे विशेष्यश्लेषयोगात् तस्मात्स्वमालि
कार्थमात्रपर्यवसिताभि[धा]व्यापारेणापि शब्देनार्थान्तरधीर्ध्वनिरेव तदुक्तं काव्यप्रकाशे अनेकार्थस्य शब्दस्य वाचकत्वे नियन्त्रिते संयोगाद्यैरवा
च्यार्थधीकृद्व्यापृतिरंजनमिति ध्वनिलक्षणं क्रमः उक्तो वसन्ततिलका तभजाजगौगः इति ॥२५॥ श्रीहरिहरपादाभ्यां नमो नमः ॥ ॥ ॥



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अ ग

उदयतीति · विततावूर्ध्वाश्च रश्मयो रज्जव इव यस्य तस्मिन्विततोर्ध्वरश्मिरज्जौ अद्रिमहत्त्वो सूर्ये उदयत्युदयत्युदयमाने यतावितिस्वरितेतं केचिद्दिकुन्ति ·
ततः शतरि सप्तमी · तथा विततोर्ध्वरश्मिरज्जौ हिमधाम्नि चन्द्रे वास्तं याति अस्तमयमाने याते शतरि सप्तमी · अयं गिरिर्विलंबिना घंटाद्वयेन परिवारितस्य वेष्टु
तस्य वारणेन्द्रस्य लीलां लीलां आभावहति · अवलीलामिव लीलामिति सादृश्याक्षेपान्निदर्शना तथा सूर्याचन्द्रमसा व स्य कुक्षिसमानकक्षां वियतावितिमहत्त्वे

उदयति विततोर्ध्वरश्मिरज्जावहिमहत्त्वौ हिमधाम्नि याति वास्तं · वहति गिरिरयं विलंबिघंटाद्वयपरिवारितवारणेन्द्रलीलाम् ॥२०॥
वहति यः परितः कनकस्थलीः सहरितालसमाननवांशुकः · अचलएष भवानिव राजते सहरितालसमाननवांशुकः ॥२१॥

नसंयुज्यते · पुष्पिताग्रा वृत्तं · अयुजि नुयगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा ॥२०॥ वहतीति · लसमानादीप्यमानानवांशवो यस्य स लसमाननवां
शुकः नौ धिकप्रत्ययः · सोचलः सहरिताः सदूर्वाः हरितेति वहन्त्यां हरिद्वर्णान्यवहितिविभ्व: कनकस्य स्थलीः सुवर्णभूमीः आन पदे त्यादिना अकृत्रिमार्थेङी
प् · परितो वहति · सएषोचलो हरितालेन कर्बुरेण समानं नवं मंशुकं वासो यस्य स हरितालसमाननवांशुकः पीताम्बरो भवानिव राजते · द्रुतविलंबितं वृत्तं · द्रुतविलंबि

समासहस्तेश्रीमयाधिविलासमहारः ॥ ॥

मा॰टी॰व॰
६

पाश्चात्येति॰ इह हिमाद्रौ सानुषु सन्निषण्णाः स्थिताः अ[illegible]नाः शान्तमलं कलङ्को यस्य पुरो वर्त्तित्वान्निष्कलङ्कं अत एव सान्द्रतरमंशुजालं यस्य तं परिपूर्णं लब्धप्रा
दुर्ललनालपनोपमानं स्त्रीमुखसादृश्यं येन तं॰ आननं लपनं मुखमित्यमरः॰ कुतः उत्सङ्गसंगि हरिणस्य अङ्कः अथ मृगस्य मृगाङ्का मृगाधिरूढा

पाश्चात्यभागमिह सानुषु संनिषण्णाः पश्यन्ति शान्तमलसान्द्रतरांशुजालीं।
सम्पूर्णलब्धललनालपनोपमानमुत्सङ्गसंगिहरिणस्य मृगाङ्कमूर्त्तेः॥ ११॥

श्रीहरिः
६

मूर्त्तिर्यस्य तस्य मृगाङ्कमूर्त्तेश्चन्द्रस्य पश्चाद्भवः पाश्चात्यः॰ [illegible]पश्चात्पुरस्सत्यक॰ स चासो भागश्च तं पाश्चात्यभागं पृष्ठभागं पश्यन्ति पाश्चा
त्यभागं दर्शनातीतिभावो ज्ञाताद्गोन्नत[illegible]धनिः॰ वसन्ततिलकावृत्तं॥ ११॥

CC-0. Digitized by eGangotri and MIDF- Delhi

श्यन्तीति· अत्राद्रौ निर्झरौघाः गिरिनदीप्रवाहाः· प्रवाहो निर्झरो झरः इत्यमरः· वृत्तश्चेत्यादिवत्सामान्यविशेषभावाद्दोषो न· तत्पुंवत्पुंभिस्तुल्यं तेन तुल्यम्
मिति वतिप्रत्ययः· उच्चैर्भृगुभ्यस्तटेभ्यः· प्रपातस्तु तटो भृगुरित्यमरः· ग्राव्णां शिलानां मूर्ध्नि पातं कृत्वा पतित्वा जर्जराः शकलीभूताः द्यामाकाशं प्रत्यु

कृत्वा पुंवत्पातमुच्चैर्भृगुभ्यो मूर्ध्नि ग्राव्णां जर्जरा निर्झरौघाः ।
कुर्वन्ति द्यामुत्पतन्तः स्मरार्तस्वर्लोकस्त्रीगात्रनिर्वाणमत्र ॥२३॥

त्पतन्तः स्मरार्तानां स्वर्लोकस्त्रीणां खेचरीणामप्सरसां गात्रनिर्वाणमङ्गनिर्वृत्तिं कुर्वन्ति· अनुष्ठानासमर्थस्य वानप्रस्थस्य जीर्यतः·
भृग्वग्निजलसंपातैर्मरणं प्रविधीयते· इति विहितभृगुपातिनां पुंसां स्वर्लोकगामिनामिहोपमानत्वं मालिनीवृत्तं मालिन्युक्ताम्तौ
तगौ गोब्धिलोकैः ॥२३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा·टी·व·
१

स्थगयन्तीति·इहाद्रौक्वचिदमूर्जगतीर्भूमीः·जगतीभुवनेभूमाविति विश्वः·शमिताश्चातकानामार्त्तस्वरायैस्ते शमितवातकार्त्तस्वराः·सर्वंसहाप्यतित
मंवुविषंवातकानामितिभूमिगतस्यपयसः·तेषांविषत्वाद्यसोमामंवुदानेनोज्जीवयन्तीत्यर्थः·तडिद्भिस्तुलितान्युपमि[illegible]निकान्तानिकार्त्त
स्वराणिसुवर्णानियैस्तेतडित्तुलितकान्तकार्त्तस्वराः·तडित्स्फुरणेतेषामपितद्वत्स्फुरणादितिभावः·तेजलदाः·स्थगयन्तिआच्छादयन्ति

स्थगयन्त्यमूः·शमितवातकार्त्तस्वराः·जलदास्तडित्तुलितकान्तकार्त्तस्वराः·
जगतीरिहस्फुरितचारुचामीकराः·सवितुःक्वचित्कपिशयन्तिचामीकराः·॥२४॥·

स्थग·आच्छादनेचौरादिकः·क्वचित्स्फुरितान्युच्छ्रितानिचारूणिचामीकराणिसुवर्णानियैस्तेस्फुरितचारुचामीकराः·अमीसवितुःकराः·१
आतपाश्चकपिशयन्तिकपिशाःकुर्वन्तिक्वचिद्दृष्टिः·क्वचिदातपश्चेतिमहदाश्चर्यमित्यर्थः·शाक्वरपथ्यावृत्तं·संपुतांशरैर्जसवतीतुपथ्यालगौ·
॥२४॥·

श्रीहरिः·
१

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्क्षिप्तमिति॰ उच्छ्रिताः उत्क्षिप्ताः सितांशोश्चन्द्रस्य कराः अंशवो हस्ताश्चावलंबो येषां तैः उत्तंभितान्युडूनि यैस्तैः उडूनि वावष्टभ्येत्यर्थः॰ शिरो-
भिः शिखरैरस्य कैलासस्यातीवतरां भृशं तरं अतीव शृ [redacted] शार्थाद्व्ययादाम्प्रत्ययः॰ उक्षिप्तं उद्यम्य धृतमन्तरिक्षं श्रद्धेयः साहश्याद्विश्वसनीयो नि-
र्झरजलमिति व्यपदेशो व्यवहारो यस्य तत्तद्दृढतरां निर्झरजल[redacted]धियं कुर्वदित्यर्थः॰ अस्याद्रेस्तटेषु विष्वक्समन्तात्पतति स्फुटं सत्यं इन्दुकरानुडूनि वाव-

उत्क्षिप्तमुच्छ्रितसितांशुकरावलंबैरुत्तंभितोडुभिरतीवतरां शिरोभिः।
श्रद्धेयनिर्झरजलव्यपदेशमस्य विष्वक्तटेषु पतति स्फुटमन्तरिक्षम्॰॥२५॥

ष्टभ्य शिरोभिर्ध्रियमाणमपि दुर्धरत्वाद्भ्रश्यदन्तरिक्षमेवेदं न तु जलं सादृश्यात्तु व्यपदेशो दुर्वार इति सर्वतः पतितनिर्झरजलं प्रेक्ष्योत्प्रेक्ष्यते तेनोत्सेधविस्ता-
रावस्य व्यज्यते॥२५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टी॰व॰

एकत्रेति॰ एकत्रैकस्मिन्भागे स्फटिकस्य यत्तटं तस्यांशुभिर्भिन्नं नीरं यासां ता भिन्नोदकाः शुभ्रजला इत्यर्थः॰ अपरत्रापरस्मिन्भागे नीलाश्मनामिन्द्रनीलमणीनां
द्युतिभिर्भिदुराणि मिश्राण्यम्भांसि यासां ताः नीलसलिला इत्यर्थः॰ इहाद्रौ सरितः कलिन्दस्याद्रेरपत्यं स्त्री कालिन्दी यमुना कालिन्दी सूर्यतनया यमु-

एकत्रस्फटिकतटांशुभिन्ननीरा नीलाश्मद्युतिभिदुराम्भसोऽपरत्र॰ ।
कालिन्दीजलजनितश्रियः श्रयन्ते वैदग्धीमिह सरितः सुरापगायाः ॥२६॥

ना शमनस्वसेत्यमरः॰ तस्याः जलैर्जनिता श्रीः शोभा यस्यास्तस्यास्तत्संगताया इत्यर्थः॰ सुरापगायाः गंगायाः वैदग्धीं शोभां श्रयंते भजन्ति विदग्धस्य भा-
वो वैदग्धी ब्राह्मणादित्वात् गुणवचनेत्यादिना ष्यञ्प्रत्ययः॰ षिद्गौरादिभ्यश्चेति ङीष्॰ सौपीत्वबाहुलकत्वादिह विकल्पः॰ अत एव ष्यञः षित्कारण-
ङीकारो बहुलमिति वामनः॰ अत्र सितासितमणिगणग्रहणात्सरितां यमुनासंगतगंगाशोभासादृश्याक्षेपात् गुणात्ध्यापिता निदर्शना प्रहर्षिणी वृत्तं॰
श्रीश्रीगंगाविश्वेशपतिः पूर्णहर्षिणी यमम्॰ ॥२६॥

श्रीहरिः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्त्रिय२ मान२

रिति॰ मेरोः समानवप्रेतुल्यप्रस्थे॰ अतएवाऽस्मिन्नद्रौइतस्ततो मणिसानुरागाः रत्नतटकान्तयो विलसन्तिप्रसरन्ति॰ किंच नवं प्रेम यस्मिन्नवप्रेमणिप
त्योः अनुरागेण सह वर्त्तत इतिसानुरागाः सुरसुन्दरीभिः समाः सदृशाः स्त्रियश्च इतस्ततो विलसन्ति क्रीडन्ति अन्योन्य सानुरागिणीभिः रूपाद्यैः इह विलासिन
स्तदनुरूपाणि विहारस्थानानि सन्तीति भावः॥२७॥ उच्चैरिति॰ इहाद्रौ सान्द्रया सुधया लेपविशेषेण तेन वा सवर्णा सवर्णा ज्योतिर्जनपदे

इतस्ततोऽस्मिन्विलसन्ति मेरोः समानवप्रे मणिसानुरागाः॥ स्त्रियश्च पत्योः सुरसुन्दरीभिः समा नवप्रेमणि सानुरागाः॥२७॥ उच्चैर्महा
रजतराजिविराजितासौ दुर्वर्णभित्तिरिह सान्द्रसुधासवर्णा॥ अभ्येति भस्मपरिपाण्डुरितस्मरारेरुद्वह्निलोचनललाममललाट
लीलाम्॥२८॥

त्यादिना समानस्य सभावः॰ लेपभेदे अमृते सुधेति वैजयन्ती॰ महारजतविराजिता काञ्चनरेखाशोभिता असौ पुरोवर्त्तिनी उच्चैरुन्नता दुर्वर्णभित्तिः॰
दुर्वर्णं रजतं रौप्यं महारजतकाञ्चने इत्यमरः॰ भस्मना परिपाण्डुरितस्य स्मरारेरुद्वह्निउद्गतार्चिर्लोचनमेव ललामं भूषणं यस्य तस्य ललाटस्य ली
लां भालशोभां अभ्येति भजति निदर्शनालंकारः॰ ललामं पुच्छपुण्ड्राश्वभूषाप्राधान्यकेतुष्वित्यमरः॥२८॥ २८॥ २८॥ २८॥ २८॥ २८॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अयमिति॰ अयं गिरिः अतिजरठाः अतिकठिनाः अतिजरतीश्च॰ जरठः कठिने जीर्णे इति वैजयन्ती॰ प्रकामं गुर्वीः श्रेष्ठाः स्थौल्याद् दुर्धराश्च प्रकामगुर्वीर्गुरु
स्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्धरे इति [illegible]दार्णवः॥ विस्पष्टं च व्युदस्त्रसयूरथ्यं सकादयश्चेति समासः॰ अलघुभिर्गुरुभिर्विलंबमानैश्च पयोधरैर्मेघै
स्तनैश्च उपरुद्धाः॰ स्त्रीस्तनाभ्रौ पयोधरावित्यमरः॥ सततं सर्वदा असुमतां प्राणभृतामगम्यरूपाः अमुन्नतत्वात् दुरारोहस्वरूपाः॰ अन्यत्र दुरु
त्वात् उन्मनानर्हविग्रहाः॰ त्यजेद सकुलोत्पन्नां वृद्धां स्त्रीं कन्यकां त्यजेत्॰ तयोक्तिगमननिषेधादिति भावः॰ परिणताः तिर्यग्दन्तप्रहारिणो दिक्करिणो

अयमतिजरठाः प्रकामगुर्वीरलघुविलंबिपयोधरोपरुद्धाः। सततमसुमतामगम्यरूपाः परिणतदिक्करिकास्तटीर्बिभर्ति॥
॥२९॥ व्योमस्पृशः प्रथयता कलधौतभित्तीरुन्निद्रपुष्पचणचंपकपिंगभासः। सौमेरवीमधिगतेन नितंबशोभामेतेन भा
रतमिलावृतवद्विभाति॥३०॥

दिग्गजा यासु ताः परिणतदिक्करिकाः॰ तिर्यग्दन्तप्रहारस्तु गजः परिणतो मत इति हलायुधः॰ इनः स्त्रियामिति समासान्तः कप्रत्ययः॰ अन्यत्र परिण
ताः किरणीभूताः दिशो दन्तक्षतविशेषाः॰ कारिकाः नखव्रणाश्च यासां ताः॰ दिदृक्षं वन्तुलाकारं करिकां नखैरालिकेति यादवः॰ तटीर्बिभर्ति अत्र प्रकृत
तटीविशेषणमाह॰ अत्र श्राध्कृतवृद्धांगना प्रतीतेः समासोक्तिः॰ पुष्पिताग्रावृत्तं॰ २९॥ व्योमेति॰ व्योमस्पृशो भ्रंकषाः उन्निद्रैर्विकसितैः पुष्पैर्विताइतिउ
न्निद्रपुष्पचणाः॰ तेन वित्तश्चुंचुपचणपाविति चणप्प्रत्ययः॰ ते च ते चंपकाश्च तद्वत्पिंगभासः पिंगवर्णाः॰ कलधौतभित्तीः कनकतटीः॰ कलधौतं रूप्य

स्तं दक्षिणान्तेन हैमवतं नाम परेष्ठवं मेवान्नयेत॰ इलावृतं सौमेरवं सुमेरुपार्श्वतो हि तादिति वैजयन्ती॥३०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

धूमेति॰ इहाद्रौ पुरोग्रे वर्णेनाग्नेः सदृशि समानेग्निसमानवर्णे इत्यर्थः॰ सौवर्णे सुवर्णविकारे तटे कुसुमसमूहे हेलीनां स्थितानां ल्वादिभ्यश्चेति
निष्ठातकारस्य नत्वं॰ अलीनां भृंगानां श्रेणीमालीविभ्राणाः॰ अतएव श्यामीभूताः अमी तरवो धूमाकारं धूमसाम्यं दधतीत्वं पश्य अग्निवद्भाति॰ स्वर्णतटेप्या(

धूमाकारं दधति पुरः सौवर्णे वर्णेनाग्नेः सदृशीतटेपश्यामी ॥
श्यामीभूताः कुसुमसमूहेऽलीनां लीनां श्रेणीमिह तरवो विभ्राणाः ॥ ३१ ॥

मास्तरवो धूमवन्तीत्युत्प्रेक्षा॰ उपमा जलधरमाल्कृतं धुर्यंगैः स्याज्जलधरमालाम्नो स्यादिति लक्षणात्॰ ॥ ३१ ॥ रुचिरेति॰ असौ गिरिः रुचिरे रुज्वले श्चित्रे॰
णीनावर्णैस्तनूरुहै र्लोमभिः ज्वलन्त इति तथोक्तैः परितः प्रचलितैः प्रसरद्भिः प्रियकाः कम्बलभक्षतयो मृगविशेषाः॰ प्रियकोरोमभिर्युक्तो मृदुत्वकमसृणोग्धेनोरिति

अर

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



वैजयन्ती· तेषां वृन्दैः समूहैः जंगमतां गतैः विविधरत्नमयैरवयवैरंगैरिव प्रतिभान्ति उत्प्रेक्षा· स्फुरविलंवितं वृत्तं· ३२॥ कुशेशयैरिति· अत्राग्रे जलाश्र
योषिताः जलाशयेषु ह्रदेषु उषिता वसन्तः· गत्यर्थाकर्मकेत्यादिना वसेः कर्तरि क्तः· संप्रसारणं मतिबुद्धिपूजार्थेभ्यश्चेति चकारात् वर्त्तमानार्थता· कलं भाषितं श्रा

रुचिरचित्रतनूरुहशालिभिः प्रचलितैः परितः प्रियकव्रजैः॥ विविधरत्नमयैरभिभात्यसाववयवैरिव जङ्गमतां गतैः॥ ३२॥ कुशेशयैरत्र
जलाशयोषिता मुदा रमन्ते कलभा विकस्वरैः॥ प्रगीयते सिद्धगणैश्च योषितां मुदा रमन्ते कलभाविकस्वरैः॥ ३३॥ श्रीकृष्णायनमः॥ ॥

हर्षकाः· करिणां स्त्रियः हर्षयन्तु कलभ इति वैजयन्ती· विकस्वरैर्विकसनशीलैः स्थेसभासापिसकस्योवरः· कुशेशयैः शतपत्रैः मुदा प्रीत्या रमन्ते क्रीडन्ति (
करिविहारिणां कमलाकराणां अयमाकर इति भावः· किं च कलाव्यक्तमधुराः विकारो मानसो भावः तत्प्रयोजनमेषां भाविका उद्दीपका इत्यर्थः॥
कलभाविकाश्च स्वराः स्वङ्गाद्यो येषां तैः कलभाविकस्वरैः सिद्धगणैः सुरसंघैः योषितां स्त्रीणां मन्ते समीपे उदारमुच्चैः प्रगीयते च· भूः स्वर्गाय (स्वर्गायितेत्यर्थः॥



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आसादितस्येति॰ इतरग्रावमूर्महौषधयः नियतेर्नियोगादस्मिन्काले अस्तमय इति दैवशासनात्तमसान्धकारेण तत्प्रायेण व्यसनेनवासादित
स्याक्रान्तस्य पुनरपक्रमणेन पुनरावृत्त्या कालं समागमकालमाकांक्षतः पुनरागमसंगान्तुमिच्छत इत्यर्थः॰ त्विषांपत्युः सूर्यस्य परैस्तेजो
न्तरैः पुरुषान्तरैश्चानभिभूतमतिरस्कृतमनुपहतं वकलत्रस्थानं कलत्रभूतानां त्विषां स्थानं स्थितिं निर्वहन्तीत्यर्थः॰ स्त्रीणां स्त्रीष्विव रक्ष

आसादितस्य तमसा नियतेर्नियोगादाकांक्षतः पुनरपक्रमणेन कालं॥
पत्युस्त्विषामिह महौषधयः कलत्रस्थानं परैरनभिभूतममूर्वहन्ति॥२८॥

णं कार्यमिति भावः॰ यथा केनचिद्दापद्गतेनासीकृतानि कलत्राणि संरक्ष्य कालान्तरे साध्व्यस्तस्मै प्रयच्छन्ति तद्वदौषधयोपि त्विषांपत्युः अर्पयन्तीत्यर्थः॰
रात्रौ तासां सूर्यास्तसमये प्रज्वलनादुदये विपर्ययाच्चोपवर्ण्यते॰ अत्र विशेषणसामर्थ्याद्दर्कादीनामापन्नादिसाम्यं प्रतीतेः समासोक्तिरलंकारः॥२८॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा·टी·व· वनस्पतीति·अत्राद्रौवनस्पतयोवृक्षाःवनस्पतिर्वृक्षमात्रेविनापुष्पफलद्रुमइतिविश्वः·पतयश्चस्फुरन्तितेषांस्कन्धेषुप्रकाण्डेष्वंसेषुवानिषण्णाःस
क्ताःबालप्रवालाबालपल्लवाहस्ताइवयासान्तास्तथोक्ताःमधूनिव्रतयन्तिभुंजन्तइतिमधुव्रतामधुपास्तेषांव्रातेनवृन्देनव्रतैर्भृतैःअतएवलं
११

वनस्पतिस्कन्धनिषण्णबालप्रवालहस्ताःप्रमदाइवात्र·॥
पुष्पेक्षणैर्लम्भितलोचकैर्वामधुव्रतव्रातवृतैर्व्रतत्यः॥२५॥

भिताःप्रापिताःलोचकास्तारकाणिकज्जलानिवयैस्तैःवातैरिवास्थितैरित्युत्प्रेक्षा·इवार्थोवाशब्दःतदुत्प्रेक्षायांचप्रयुक्तः·लोचकोमांसपिंडे
स्यादक्षितारेचकज्जलइतिविश्वः·पुष्पैरीक्षणैरिवपुष्पेक्षणैरुपलक्षिताःव्रतत्योलताःप्रमदाइवलक्षन्तइतिशेषः·नचप्रसिद्धक्रियाध्याहा श्रीहरिः
रेदोषइत्याहवामनः·लिंगाध्याहारंवक्षिति·२५॥· ११

विरुतानीति· कदम्बैः सुरभिः सुगन्धिस्तस्मिन्कदम्बसुरभाविहास्त्रे विहगाः पक्षिणोनुक्षणं प्रतिक्षणं अनेके बहुविधालयाः विहृत्य यस्मिन्कर्मणि
तद्यथा तथा गाः वा वः शब्दानित्यर्थः कलयन्ति· अर्जुनी नेत्रस्निग्धाणभूवाग्वारिषु गो मेतेति विश्वः· किंच धूतानि कंपितानि नवानि नीपव
नानि कदम्बकाननानि येन सः धूतनवनीपवनः· नूलं वनीपप्रियकं कदम्बाः स्तु हलिप्रिय इत्यमरः· अयं पवनः मुहुरभ्रमेघं भ्रमयन्नुपैति·॥
प्रमिताक्षरावृत्तं· प्रमिताक्षरा सजससैरुदितेति लक्षणात्·॥२६॥ दिदृक्षिरिति· दृषाद्धिः श्रेयान् श्रेष्ठो द्विजातिर्ब्राह्मणाद्यधा१

विहगाः कदम्बसुरभाविहगाः कलयन्त्यनुक्षणमनेकलयं·॥ भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः॥२६॥
विदद्भिरागमपरैर्विवृतं कथं विहृतां पि दुर्ग्रहमनिश्चितधीभिरन्यैः॥ श्रेयान्द्विजातिरिव हन्तुमघानि दक्षं गूढार्थमेष निधिमंत्रगणं बिभर्त्ति·॥२७॥

गमो निधिक स्मौ मंत्रशास्त्रं वसस्य वपरं प्रधानं येषां तैरागमपरैर्विदद्भिर्निधीनां मंत्राणां च साधनविधानज्ञैः कथं विहितं स्वरूपतः प्रकाशितं१
नास्ति निश्चितं इदमित्थमिति निश्चयात्मिका धीर्येषां तैरनिश्चितधीभिरन्यैरज्ञानज्ञैः· अत्यापि दुर्ग्रहं निधिरस्तीदं कुमहिमा सो मंत्र इति वा प्र२
सुखादाकर्ण्यापि दुर्ग्रहं दुःसाधनं अघानि दुःखान्येतान्यपि वहन्तुं दक्षं समर्थं दुःखेनाप्यसनेष्वघमिति वैजयन्ती· गूढः संवृतो र्थो धनमभिधेयं

१ वयस्मिन्नं गूढार्थं निधयो मंत्राद्वाप्यत्र निधयश्च
२ मंत्राश्चैतेषां गणं बिभर्त्ति दधत्युपमार्थः· द्विजातिर्मंत्र
गणमिव निधिगणं पर्वतमेष बिभर्त्तीत्यर्थः॥२७॥

मा॰ब॰टी॰
१२

विंबोष्ठमिति॰ इहाद्रौ तुरंगस्य वक्त्रं यस्य सः तुरंगवक्त्रो देवयोनिविशेषः॰ मुखस्य उपमानपूर्वपदस्य बहुव्रीहिरुत्तरपदलोपश्चेत्युष्ट्रमुखवत्समासः॰ विंबवद्र॰
क्तः ओष्ठो यस्याः तां विंबोष्ठमित्युपमालङ्कारः॰ ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यमित्योकारः प्रियायाः मुखं चुंबन्तं किन्नरं मानुषमुखमश्वांगं
देवयोनिविशेषं बहु गुरु यथा तथा मनुते बुध्यते॰ तुरंगवक्त्रस्य चुंबनासंभवादिति भावः॰ इतरः किन्नरोऽपि उत्तुंगेन स्तनभारेण यो भंगस्तस्माद्भी

विम्बोष्ठं बहु मनुते तुरंगवक्त्रश्चुंबन्तं मुखमिह किन्नरं प्रियायाः। श्लिष्यन्तं मुहुरितरोऽपि तं निजस्त्रीमुत्तुंगस्तनभरभंगभीरुमध्याम्॰
३८॥ यदेतदस्यानुतटं विभाति वनं ततानेकतमालतालम्॰ न पुष्पितात्र स्थगितार्करश्मावनन्ततानेकतमालतालम्॰ ॥३९॥ ३९॥

रुर्मध्यो यस्यास्तां निजस्त्री स्वस्त्रियं वांशास्मारिति विकल्पादियङादेशाभावः॰ मुहुः श्लिष्यन्तं मानुषांगत्वादालिंगन्तं तुरंगवक्त्रं बहु मनुते तुरंग
वपुषः किन्नरस्याश्लेषासंभवादिति भावः॥ दुर्लभं प्रियं भवतीति रहस्यं मध्यस्य भंगेऽपि भंगाभावेऽपि रतिशयोक्तिः॰ उपमासंसृज्यते प्रहर्षि
णीवृत्तमुक्तम्॰ ३८॥ यदिति॰ अस्याद्रेरनुतटं तटे तटे विभक्त्यर्थेऽव्ययीभावः॰ तता विस्तृता अनेके बहवस्तमालास्तालाश्च यस्मिंस्तत्त
अनेकतमालतालं यदेतत्पुरोवर्ति वनं विभाति॰ स्थगितार्करश्मौ तिरोहितातपे अनन्ततानेऽपारविस्तारेऽत्र वनेऽकतमा लता अलं अत्यन्तं पुष्पितासं१
जातपुष्पा न भवतीति शेषः सर्वापि पुष्पितेत्यर्थः॰॥३९॥॰

श्रीशोवनु॰
१२

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मीति॰ अस्मिन्नद्रौ रत्नानि कुं आद्यानाञ्च॰ रत्नो निकुंजे द्याने इति वैजयन्ती॰ तै रुज्वला सुरुचिरा सुसद्दलैश्चित्राणि कटकानि सानूनि वलयानि च यासां ताः॰
सुकटकं वलयेसानाविति विश्वः॰ अधित्यका मूर्द्धभूमिषु॰ भूमिरूर्द्धमधित्यकेत्यमरः॰ उपाधिभ्यां त्यकन्नासन्नारूढयोरिति त्यकन्॰ विमलोपला उ॰
ज्वलशिला उज्वलमणयो वा मेखलाः कांच्यो नितम्बभूमयश्च॰ मेखला खड्गबन्धे स्यात्कांचीशैलनितंबयोरिति विश्वः॰ ताभिरन्ता रम्याः॰ मआ
ववसिते रम्ये समाप्तावन्त इष्यते इति शब्दार्णवे॰ दृढ रत्नो नितम्बाः कटिपश्चाद्भागाः शिखराणि च यासां ताः॰ नितंबो रोधसि स्कन्धे शिखरे पि

रत्नोज्वलाः सुविमलोपलमेखलान्ताः सद्रत्नचित्रकटकाः सुदृढनितंबाः॰
अस्मिन्भजन्ति घनकोमलगंडशैला नार्योनुरूपमधिवासमधित्यकासु॰ ॥ ४० ॥

कटेरथ इति विश्वः॰ घनानि विपुलाः कोमला श्लक्ष्णा गंडशैला गंडस्थलानि स्थूलोपलाश्च यासां ताः नार्योनुरूपं स्वसदृशं आत्मसदृशं वाधिवासं भ
जन्ति अत्र नारीणामधित्यकानाञ्च प्रकृतत्वात्केवलमप्रकृतगोचराश्लेषोत्थापिता तुल्ययोगिता अत एवोभयविशेषणानामुभयत्र विभक्तिविपरिणा
मेनयोज्यानि॰ ॥ ४० ॥

Jagannath Bhattarai Collection. Nagarjun-7; Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अनतिविरेति· इहाद्रौविरलंयथातथाविकीर्णावज्रशकलाश्वेतहीरकखण्डानियस्यांसाधौताभ्राकलधौतमहीरजतभूमिर्जलदेनानतिविरोज्झितस्यत

अनतिचिरोज्झितस्यजलदेनचिरस्थितबहुबुद्बुदस्यपयसोऽनुकृतिम्॥
विरलविकीर्णवज्रशकलासकलामिहविदधातिधौतकलधौतमही॥५८॥

कालमुक्तस्यअभ्रस्येतिभावः· चिरस्थिताचिरस्थायिनोबहवश्चबुद्बुदाजलस्फोटायस्मिंस्तस्यपयसोऽम्भसःसकलामनुकृतिंसमग्रसादृश्यंविदधाति· अत्र
मेघोज्झितस्यजलस्यस्थिरबुद्बुदासम्बन्धेऽपिसंभावनयासंबन्धोक्तेरतिशयोक्तिः· कुरीहताहृतंकुरीहतानजभजैर्लागयुगितिलक्षणात्॥५८॥ ॥·



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वर्जयन्त्या इति। हे कान्ततः हे कान्ते रहसीत्यर्थः। कान्ततः कान्तेन प्रियेणेत्यर्थः। उभयत्रापि सार्वविभक्तिकस्तसिः। संगमे सति सुखं तर्कयन्त्या उत्प्रेक्षमाणाया विस्रब्धं
विहारमाकांक्षयेत्यर्थः। अत एव जनैः संगं वर्जयन्त्या कुतः स्मरेणासन्नतापानि प्राप्नुवन्त्यङ्गानि यस्याः सा तया स्मरासन्नतापांगया। अंगं गात्रं कंठप्यश्वे
ति वक्ष्ये मितिङीपो विकल्पादि हृस्वपक्षे टाप्। सन्नताव पांगो यस्याः सा तथा सन्नतापांगया स्मरतापाकुलितनेत्रा तया। अनेकया योषया अनेकाभिर्योषाभिरित्य
र्थः। जातावेकवचनम्। स्त्री योषिदबला योषा नारी सीमन्तिनी वधूरित्यमरः। हे षोढिः सेव्यते इत्यधिरहस्यानामनीहसन्नीति भावः। ...विराणी हन्तेरेश्च नुभिर्युतास्वि

वर्जयन्त्या जनैः संगमेकान्ततस्तर्कयन्त्या सुखं संगमे कान्ततः। योषयैष स्मरासन्नतापांगया सेव्यतेनेकया संनतापांगया॥४२॥ संकीर्णकीचकवन
स्खलितैकवालविच्छेदकातरधियश्चलितुं चमर्यः। अस्मिन्मृदुश्वसनगर्भतदीयरन्ध्रनिर्यत्स्वरश्रुतिसुखादिव नोत्सहन्ते॥४३॥४३॥ ॥

णीसंमतेति लक्षणात्॥४२॥ संकीर्णेति। अस्मिन्नद्रौ संकीर्णाः मिथः संश्लिष्टाः कीचकाः वेणुविशेषाः। वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धता इत्यम
रः। तेषां वने स्खलितस्यैकवालस्यैकरोम्णो विच्छेदात् कातरास्त्रस्ता धीर्येषां ताश्चमर्यो मृदुश्वसनो मन्दवायुर्गर्भे येषां तेभ्यस्तदीयरन्ध्रेभ्यः कीचकवि
वरेभ्यो निर्यतः निर्गच्छतः स्वनस्य श्रुत्या श्रवणेन यत्सुखं तस्मादिवेति हेतूत्प्रेक्षा। चलितुं नोत्सहन्ते वस्तुवालभियेत्यावादिति भावः। शाकध्वषेत्ता
दिनातु मन्त्रसयः॥४३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मुक्तमिति· इहाद्रावन्तर्लीनानि महानीलदलानि इन्द्रनीलविशेषखण्डानि यासु तासु श्लिष्टं हलस्याकरोद्भूता महानीलास्तु ते स्मृता इति भगवानगस्त्यः· वापीषु दी
र्घिकासु अभ्रैर्मेघैः मुक्तं दत्तं मुक्तागौरं मौक्तिकशुभ्रं अत एव क्षीरमिव स्थितमंभः शस्त्री छुरिका स्याच्छस्त्री चासिपुत्री च छुरिका चासिधेनुकेत्यमरः· वह्न्यादिस्पर्शे तिङ्
प· तद्वच्छ्यामैरंशुभिरन्तर्गतेन्द्रनीलमरीचिभिः आशु तत्क्षणमेव द्रुतं लोलितं शुरितमित्यर्थः· सतनिलीसलिलस्य नील्याख्यौषधिपत्ररसस्य· नीली काली
क्लीतकिकेत्यमरः· अच्छां छायां कान्तिमृच्छति तत्सच्छीं छायां गच्छतीत्यर्थः· अतो निदर्शनालंकारः· सच मुक्तागौरं क्षीरमिव शस्त्रीश्यामैरितित्रिषोपमात्र

मुक्तं मुक्तागौरमिह क्षीरमिवाभ्रैर्वापीष्वन्तर्लीनमहानीलदलासु·॥
शस्त्रीश्यामैरंशुभिराशुद्रुतमंभश्छायामच्छामृच्छति नीलीसलिलस्य·४४॥

येणान्तर्लीनमहानीलदलासु वापीष्विति पदार्थहेतुकं काव्यलिंगेनोत्थापिते नांशुभिर्द्रुतमिति तद्गुणोत्थापित इत्यंगांगीभावेन संकरः॥ क्षीरमिवेत्यनेन इ
न्द्रनीलीनामैश्वर्यं सूचितम्· क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेन्नीलतां व्रजेत्· इन्द्रनीलमिति ख्यातमिति लक्षणसंभवादिति तेनात्र नीलीरसोपमानेनतद्व
र्ण एव सूचितः· नीलीरसनिभाः केचित्शंभुकण्ठनिभाः परे इति आदिना अगस्त्यरत्नशास्त्रे तेषामेकादशविधच्छायाविधानादिति· मत्तमयूरं वृत्तं वे
देरन्ध्रैर्म्तसगा मत्तमयूरं इति लक्षणात्·॥४४॥ श्रीरामः·
१४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यानेति॰ इहाद्यावन्यवधूभ्यःअन्तोऽभ्यः॰ पंचमी विभक्तेरिति पंचमी॰ सारतरं श्रेष्ठतरमागमनं यस्याः सा सारतरागमना ताम् आद्यसंगमेत्यर्थः॰ आयीयतमानं प्राप्ते प्रयत
मानं प्रार्थयमानमित्यर्थः॰ यती प्रयत्ने शानच्॰ प्रियं नयो याति तथा प्रतिकूलापि ह्रीरहस्थेन प्रियेण सह अनायतमानं अदीर्घहेलं यथा तथा रतरागे सुरतामिला
सं विभर्त्ति इयमतिमानवतीरपि उद्दीपयतीति भावः॰ दोधकवृत्तं दोधकवृत्तमिदं भभभाद्गुरुकाविति लक्षणात्॰ ॥३५॥ भिन्नेष्विति॰ इह द्रो इन्दोः किरणेषु उडुंच
अत्रवां वश्चउच्चावचास्तेऽह्युच्चावचैरनेकविधैरित्यर्थः॰ उच्चावचं नैकभेदमित्यमरः॰ मयूरव्यंसकादिषूच्चावचोच्चनीचावचपरावरोच्चावचाकिंचनाकुतीमया
॥३६॥

यानयोः प्रियमन्यवधूभ्यः सारतरागमनायतमानं॰ ॥ तेन सहेह बिभर्त्ति रहः स्त्री सा रतरागमनायतमानम्॰ ॥३५॥ भिन्नेषु रत्न
किरणैः किरणोध्विहेन्दोरुच्चावचैरुपगतेषु सहस्रसंख्याम्॰ ॥ दोषापि नूनमहिमांशुरसौ किलेति व्याकोशकोकनदतां र

मीति तत्पुरुषे निपातनात्साधुः॰ रत्नकिरणैर्भिन्नेषु मिश्रेषु अत एव सहस्रसंख्यामुपगतेषु सत्सु नलिन्यः पद्मिन्यः॰ नलं पद्मं अनलं तत् राप्नोतीति विग्रहः॰ असौ प्रकाशमानो
हिमांशुः किलेति सहस्रकिरणत्वात्सूर्य एवेति संभावनायुध्येत्यर्थः॰ वार्त्तासंभावनयोः किलेत्यमरः॰ दोषापि रात्राववपि सप्तम्यर्थे॰ अयं॰ दिवाह्नीत्यथदोषा
वस्रक्तं चरजनावित्यमरः॰ व्याकोशकोकनदतां विकचपद्मतां दधते॰ नूनमित्युत्प्रेक्षायां॰ अथ रक्तसरोरुहे॰ रक्तोत्पलं कोकनदं व्याकोशविकचस्फुटा इत्यम
रः॰ इहदेवभूमित्वान्नित्यं पद्मनलिन्य इति भावः॰ रत्ननलिनीनां दोषातनविकाशसंभवस्यातिशयोक्तिमूलतया तस्य चन्द्रार्कभ्रान्तिनिमित्तत्वोत्प्रेक्षायां भ्रान्तिमदंका

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



वलिताः

अपशंकमिति॰ अपगतशंकं निःशंकं अंकपरिवर्त्तने उत्संगलुंठने घूर्णिताः परिचिताः पतिं भर्त्तारमुपैतुं पुरोग्रे वलिताः प्रयाताः आत्मजाः स्वसंभवाद्दुहितृत्वमापन्ना निम्नगा नद्यः क
रुणेन दीनेन पत्रिणां पक्षिणां विरुतेन क्रोशनेन निमित्तेन घोडुर्वत्सलतया वात्सल्येन स्नेहेनेत्यर्थः॰ श्रीमान् स्निग्धस्तु वत्सल इत्यमरः॰ वत्सांसाभ्यां कामबल इति वल
प्रत्ययः॰ अनुरोदितीव आक्रोशतीवेत्युत्प्रेक्षा रुदश्च पंचभ्य इति गुणः रुधादिभ्यः सार्वधातुक इतीट्॥१७॥ मधुकरेति॰ मधुकराणां विटपास्तेषां यानं तुंब

अपशंकमंकपरिवर्त्तनोचिताश्चलिताः पुरः पतिमुपैतुमात्मजाः॥ अनुरोदितीव करुणेन पत्रिणां विरुतेन वत्सलतयैव निम्नगाः॥१७॥ मधुकरविटपानमितास्तरुपंक्तीर्बिभ्रतोस्य विटपानमिताः॥ परिपाकपिशंगलतारजसा रोधश्चकास्ति कपिशंगलता॥

नमिताः प्रापिताः इणः कर्त्तरि क्तः॰ विटपैः शाखाविस्तारैः आनमिताः विटपानमिताः॰ विस्तारो विटपोऽस्त्रियामित्यमरः॰ तरुपंक्तीर्बिभ्रतोस्याद्रेरोधो नितं
बो गलता पतता परिपाकेन पिशंगानां लतानां रजः पुष्परेणुः तेन परिपाकेन पिशंगलतारजसा कपिशा पिशंगा सततं चकास्ति॰ मात्रार्ध्नस्ते द्वियमा यागीतिः॰
अष्टगणा अर्द्धे वसुगणा आर्यागीतिरिति पिंगलनागः॥१८॥



Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राग्भागत इति· इहाद्रेः प्राग्भागतः ऊर्ध्वप्रदेशात्· उपत्यकास्वधःप्रदेशेषु· उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यकेत्यमरः· उपाधिभ्यामित्यादिनोपत्यकाद्यान्त्यकन्
पतत् शृंगारः सिन्दूरादिमंडनमस्य संजातः शृंगारितः· शृंगारः सुरते नाट्ये रसे दिग्गजमण्डने इति विश्वः· आयतो दीर्घस्तस्य महेभकरस्याभेवाभा य-
स्य तद्विविधरत्नानां करै रश्मिभिरनुविद्धमनुरंजितमिदमंभः· ऊर्ध्वप्रसारितं यत्सुराधिपचापं इन्द्रधनुः तद्वच्चारु संलक्ष्यते· अत्रेन्द्रचापस्योध्वन्त्वासं-
बन्धेपि संबन्धोक्तेरतिशयोक्तिः· अभूतेयमितिमतान्तरोदिततविवक्षायां तूपमानस्याप्रसिद्धत्वादुपमेवेयम्·॥४९॥ दधतीति· किंवेति वार्थः· अमु-

प्राग्भागतः पतदिहेदमुपत्यकासु शृंगारितायतमहेभकराभमंभः॥ संलक्ष्यते विविधरत्नकरानुविद्धमूर्ध्वप्रसारितसुराधिपचापचारु॥
॥४९॥ दधति च विकसद्विचित्रकल्पद्रुमकुसुमैरभिगुंफितानि वैताः॥ क्षणममलघुविलंबिपिच्छदाम्नः शिखरशिखाः शिखिशेखरा न
मुग्धाः॥५०॥

प्याद्रेरेताः शिखराणि शृंगाण्येव शिखाः केशपाशः· शिखा चूडा केशपाशीत्यमरः· विकसद्भिर्विचित्रैः नानावर्णैः कल्पद्रुमकुसुमैरभिगुंफितान् ग्रथितानि वि-
मि२ स्थितानीत्युत्प्रेक्षा· अलघूनि विलंबीनि लंबमानानि च पिच्छान्येव दामानि स्रजो येषु तान् शिखिनः केकिन एव शेखरानापीडान् क्षणान्दधति· शिखावलः शिखी के-
की शिखास्वापीडशेखरावित्यमरः· अत्र कुसुमगुंफनोत्प्रेक्षा· लिंगेनपिच्छादिनामादिरूपसिद्धिः· तदुत्थापिता चोत्प्रेक्षेति संकरः पुष्पिताग्रा वृत्तं·॥५०॥५०॥५०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा.टी.च. १९ सवधूका इति· अस्मिन्नद्रौ अनवरेन भवन्ती सनवरा श्रेष्ठाः अनवरतमाः श्रेष्ठतमाः मन्दरागतैरमरैः सदृशाः सरूपाः अनवरतममन्दरागतामरसदृशः· अमन्द
रागाण्यतिरक्तानि तामरसानि पंकेरुहाणीव दृशो येषां ते अमन्दरागतामरसदृशः रक्तनेत्राः पंकेरुहं तामरसमित्यमरः· सुखिनो भोगिनः सहवधूभिः
सवधूकाः सन्तः· तेन सहेति तुल्ययोगे बहुव्रीहिः॥ नद्युतश्चेति कप्· रसवत्सानुरागं· गुणरागेद्रवे रस इति विश्वः· नवरतं नूतनसुरतं नासेवन्त इति न किन्त्वासेवं—

सवधूकाः सुखिनोऽस्मिन्ननवरतममन्दरागतामरसदृशः॥ नासेवन्ते रसवन्नवरतममन्दरागतामरसदृशः॥५१॥ आसाद्य पुष्पपटमेव
महान्तमन्तरावर्त्तिभिर्गृहकपोतशिरोधराभैः॥ स्वांगानि धूमरुचिमागुरवीं दधानैर्धूपायतीव पटलैर्नवनीरदानाम्॥५२॥५२॥·९

न्त इवेत्यर्थः· संभाव्यनिषेधनिवर्त्तनौ द्वौ प्रतिषेधाविति वामनः· विशिष्टं सुरतानासेवनस्य सामान्यतः प्रसक्तेरित्युपमालंकारः॥ गीतेयमार्यानीतिः॥५१॥
आसाद्येति· एषोऽद्रिर्महान्तं पुष्पाण्येव पटः इति रूपकं तमासाद्यान्तः पटाभ्यन्तरे आवर्त्तिभिः आभीक्ष्ण्यं भ्रमद्भिः· बहुलमाभीक्ष्ण्य इति णिनिः· गृहकपो
तशिरोधरायाः गृहपारावतकण्ठस्येवाभा येषां ते रिति उपमाः पारावतः कपोतः स्यादित्यमरः· अगुरोः कालागुरोरिमा आगुरवी कालागुरुरगुरुः स्या श्रीहरिः
दित्यमरः· धूमरुचिं धूमकान्तिं तत्सदृशीमित्यर्थः· अत एव निदर्शनाः दधानैर्नवनीरदानां पटलैः स्वांगानि धूपायतीव धूपैरधिवासयतीवेत्युत्प्रे १९
क्षा· रूपकोपमानिदर्शनाभिरंगैः संकीर्यते धूपसन्ताप इति धातोः गुपूधूपविच्छिपणिपनिभ्य आय इत्यायप्रत्ययः॥५२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्योन्येति॰ अमुष्मिन्नद्रौ अन्योन्येषां व्यतिकरेण मिश्रणेन चारुभिः रत्नरूपैर्विविधैर्विचित्रैर्नानावर्णैः रत्नस्यं तस्मान्मदोषेणादुष्यन्तः॰ त्रासो भीमणिदोषयोरित्यमरः॰ वा प्राशेत्यादिना वैकल्पिकः रूपप्रत्ययः॰ तेभ्यो नवप्राणिभ्यो जन्म येषां तैर्मयूखैः आकाशे रचितम् अभित्यमकुड्यं अनाधारमित्यर्थः॰ चित्रं कर्म विचित्रकर्म॰ तत् कर्त्तृ गगनसदः खेचरान् विस्मेरान् विस्मयशीलान् करोति तन्मिकमीत्यादिना प्रत्ययः॰ अत्र मणिमयूखेषु खे चित्रकर्मभ्रान्तिः मतामेवाभित्तिचित्रकर्मेत्यकारणकार्योत्पत्तिवर्णनाद्भ्रान्तिमदलंकारो स्थापिता विभावनेति शंकरः॰ कारणेन विना कार्य्योत्पत्तिः स्याद्विभावनेति प्रहर्षिणी वृत्तमुक्तम्॥ ५३॥ समीरेति॰ समीरेणनमा

अन्योन्यव्यतिकरचारुभिर्विचित्रैरत्रस्यन्नवमणिजन्मभिर्मयूखैः॥ विस्मेरान् गगनसदः करोत्यमुष्मिन्नाकाशे रचितमभित्ति
चित्रकर्म॥ ५३॥ समीरशिशिरः शिरस्सु वसतां सतां जवनिकाम्मसुखिनाम्॥ विभर्त्ति जनयन्नयं मुदमपामपायधवला वला॰॥ ५४॥ हकततीः

त्रिका १ (?)

हतेन शिशिरः शीतल अयं गिरिः शिरःसु शिखरेषु वसतां निकाममुखिनां अत्यन्तसुखितां सतां पुण्यवतां मुदं जनयन्नयामंभसां॰ अपायेनापगमेन धवला वलाहकततीर्मेघपंक्तीरेव जवनिकास्तिरस्करिणीर्विभर्त्ति अनावृत्तेष्वपि शिखरेषु क्रीडतां मेघैरेवावरणं संपाद्य मुदं जनयतीत्यर्थः॰ अत्र वलाहकततीषु आरोप्यमाणानां जवनिकानां मुदं जनयन्निति प्रकृतोपयोगी वर्णनात् परिणामालंकारः॰ आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात् रूपके तूपरंजकत्वमात्रमिति भेदः॰ जलोद्धतगतिर्वृत्तम्॰ रसैर्जसाजलौ द्धतगतिरिति लक्षणात्॥ ५४॥ रामराम हरे राम राम राम हरे हरे॰ हरे राम हरे राम राम राम हरे हरे॰॥॰

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्च३

।।भा·टी·व·।। मैत्र्यादिति· इहाद्येसमाधियोगंबिभ्रतीतिसमाधिभृतोयोगिनोमैत्रीकरुणामुदितोउपेक्षेतिवतस्रश्चित्तवृत्तयः· तत्रप्राणघृक्षुमैत्रीदुःखिषुकरुणासुखिषु
।।७।। मुदिताअनुमोदनंपापिषु ——— उपेक्षामैत्रीत्यादिर्येषांतानिचित्तस्यपरिकर्माणिशोधकानीत्यर्थः· तानिविदन्तिलभन्तइतितद्विदस्तद्भजते·क्षीणानैः
करणमलाइत्यर्थः· अतएवक्लेशप्रहाणांविधायविद्याअस्मितारागद्वेषाभिनिवेशाः पंचक्लेशाः· तत्रानित्येषुनित्यत्वाभिमानोअनात्मनिदेहेन्द्रियादावात्मधीरित्या
दिविभ्रमोऽविद्याऽस्मिताअहंकारः· रागोभिमतविषयाभिलाषद्वेषोअनभिमतेषुरोषः· अभिनिवेशः कार्याकार्येष्वाग्रहः· तेऽपुरुषक्लिश्नन्तीतिक्लेशाः·क्लेशहत

मैत्र्यादिचित्तपरिकर्मविदोविधायक्लेशप्रहाणांमिहलब्धसबीजयोगाः।।ख्यातिंचसत्वपुरुषान्यतयाधिगम्यवांछन्ति
तामपिसमाधिभृतोनिरोद्धुं·।।५५।।

वः· एवविधव· तेषांप्रहाणांक्षयंकृत्वइतिशात्वं· तद्विधायक्लेशानहित्वेत्यर्थः· अतोलब्धःसबीजःसावलंबनोयोगोध्यानंयेषान्तेलब्धसबीजयोगाःसन्तःआ
लंबनमेवबनक्ति· सत्वेतिसत्वपुरुषयनक्ति· सत्वतिसत्वपुरुषयोः प्रकृतिपुरुषयोः अन्यतयाअन्यत्वेनमिथोभिन्नत्वेनख्यातिंज्ञानंवाधिगम्यप्रकृति ।। श्रीहरिः।।
पुरुषोभिन्नाविविज्ञात्वाप्रकृतिपुरुषयोर्विवेकाग्रहणात्संसारःविवेकग्रहणान्मुक्तिरितिसांख्यवदन्ति· अथतांख्यातिमपिनिरोद्धुंनिवर्तयितुंवांछन्ति·दृ
पुरुषोभिन्नाविविज्ञात्वाप्रकृतिपुरुषयोर्विवेकाग्रहणात्संसारःविवेकग्रहणान्मुक्तिरितिसांख्यसिद्धान्तः· नकेवलंभोगभूमिरियंअ ७।।
न्तिहूपांतांनिवर्त्यस्वयंप्रकाशतयेवावस्थातुमिच्छन्तीत्यर्थः· प्रकृतावपरतायांपुरुषस्वरूपेणावस्थानंमुक्तिरितिसांख्यसिद्धान्तः· नकेवलंभोगभूमिरियंअ
पितुमुक्तिक्षेत्रमितिभावः·।।५५।।·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मरकतेति॰ इतन्द्रो मरकतमणी तां विकारा मरकतमय्यस्तासु मेदिनीभुस्त्रियाः पुंवद्भावः॰ तरूणां विटपाः पल्लवास्तेषामन्तरैरवकाशैः
पतन्तीति तथोक्ताः॰ विटपः पल्लवे विंगे विस्तारे स्तंबशाखयोरित्यमरः॰ स्फुरिताश्चाणुरेणवो तां सूक्ष्मरजसां जालानि येषु ते भानोर्मयूखाः अ
वनतस्य नम्रस्य शितिकंठकस्यं मयूरकंधरा याः लक्ष्मीं दधतीति निदर्शनालंकारः॰ पुष्पिताग्रावृत्तम्॰ ॥५६॥ येति॰ अत्राद्रौ असनं कालिमा कार्ष्ण्य
स्याः सा आनतिकालिमा॰ तिरस्या मेत्यर्थः॰ नविद्यते लयो लयनं क्वचिद् यस्था तं यस्याः सा अलया भ्रमन्तीत्यर्थः॰ अनन्त इव सख्येति भावः॰ याः लि

मरकतमयमेदिनीषु भानोस्तरुविटपान्तरपातिनो मयूखाः। अवनतशितिकंठकंठलक्ष्मीमिह दधति स्फुरिताणुरेणुजालाः॥ ५६॥
या बिभर्त्ति कलवल्लकीगुणस्वानमानमतिकालिमालया। नात्र कान्तमुपगीतया तया स्वानमानमतिकालिमालया॥ ५७॥ ५७॥

मालकौशो॰ अन्य मधुरः तस्य वल्लकीगुणस्वानस्य वीणातंत्री शब्दस्य मानमुपमानं बिभर्त्ति तंत्रीव ध्वनतीत्यर्थः॰ उपमालंकारः॰ उपगीतया समीपेन गानं तुष्ट्य
ध्वनन्त्येव न तु पूर्णं गायन्तीति भावः॰ आदिकर्मणि क्तः॰ कर्त्तरि चेति कर्त्तरि क्तः प्रत्ययः॰ तया लिमालया भृंगावल्या स्वानमानं सुखेन न विनुमा कष्टेन का
इषदुरित्यादिना खल्प्रत्ययः॰ कावल्लीकान्तं प्रियं न नमति सर्वाश्रपिमानं विहाय सङ्घः प्रणमत्येव तथोद्दीपकत्वादिति मन्येत्यर्थः॰ रथोद्धतावृत्तं रो नरा
विह रथोद्धता लगाविति लक्षणात्॥ ५७॥ ५७॥ ५७॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टी॰व॰ १८

वप्राः

तायमिति॰ इत्याद्वेश्मनवः॰ वप्राश्चीसानुमानयोरित्यमरः॰ सायंसायाह्ने शशांककिरणाहतेभ्यश्चंद्रकान्तेभ्यो निस्यन्देन प्रस्रविणा नीरनिकरेण जलपूरेण कृताभिषेकाः कृतस्नानाः॰ अह्नि दिवसे अर्कोपलेभ्यः सूर्यकान्तेभ्य उच्छ्वसितैरुत्थितैर्वह्निभिरग्निभिस्तप्ताः सन्तस्तीव्रमुग्रं दुश्चरं महाव्रतं तपश्चरन्तीत्युत्प्रेक्षा॥५८॥ एतस्मिन्निति॰ एतस्मिन्नद्रौ अधिकपयः श्रियं अधिकानां जलसमृद्धिं वहन्त्यः॰ अन्यत्र त्वधिकाः कपयः सुग्रीवादयो वर्णपत्वेन याः श्रुताः॰ अधिकपयः॰ श्रियं गुणालंकारादिशोभां वहन्त्यः पवनाद्भवतीति पवनभूः॰ तेन पवनभुवा वायुजन्येन जवेन संक्षोभं चलनं नीताः॰ अन्यत्र तु जवेन वेगवता जवो जवि निर्वेगे स्यादित्यमरः॰ पवनभुवा हनुमता संक्षो

सायंसशांककिरणाहतचन्द्रकान्तनिस्यन्दनीरनिकरेण कृताभिषेकाः॥ अर्कोपलोच्छ्वसितवह्निभिरह्नि तप्तास्तीव्रं महाव्रतमिवात्र चरन्ति वप्राः॥५८॥
एतस्मिन्नधिकपयःश्रियं वहन्त्यः संक्षोभं पवनभुवा जवेन नीताः॥ वाल्मीकेररहितरामलक्ष्मणानां साधर्म्यं दधति गिरां महासरस्यः॥५९॥५९॥॰॥

भमोन्नत्यं नीताः हनुमद्भगवर्णनया प्रागल्भ्यं नीता इत्यर्थः॰ वाक्यपक्षे सर्वत्र षष्ठीविपरिणामः कार्यः॰ महासरस्यो महासरांसि अरहिताव वर्जितो रामलक्ष्मणौ याभिस्तासां॰ अन्यत्र तु रामो रमणः॰ अरहितरामा अविमुक्तरामा लक्ष्मणाः सारसस्य योषितो याः श्रुताः॰ केचित्तु अरहितरामा अविमुक्तशोभाः॰ लक्ष्मणाः सारसा इति पुंपक्षिपरत्वेन व्याचक्षते॰ तेषां हंसस्य योषिद्वरटा सारसस्य तु लक्ष्मणा॰ लक्ष्मणो पक्षिसारस्योरित्याद्युभयविश्वप्रकाशादिवाक्यगतनियतस्त्र्यर्थताविरोधः तासां वाल्मीकेर्गिरां साधर्म्यं सादृश्यं दधति॰ अत्र पवनभुवा जवेनेत्यत्रैकनालावलंबिफलद्वयवदभंगश्लेषपदगतत्वेनार्थद्वयप्रतीतेरर्थश्लेषः॰ अन्यत्र पदभंगेनार्थद्वयप्रतीतेर्जतुकाष्ठवच्छब्दयोरेव मिथः श्लिष्टत्वाच्छब्दश्लेष इत्युभयसाहित्यादुभयश्लेषोऽयं प्रकृताप्रकृतगोचरः॰ उपमालंकार इति संकरः॰ श्रीरामः १८

॥५९॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इहेति॰इहाद्रौमुदितैरिभविहारसन्तुष्टैः कलभैः करिपोतैः॰ कलभः करिशावक इत्यमरः॰ दिशिप्रतिप्रतिदिशं यथार्थेऽव्ययीभावः॰ अव्ययीभावेश
रत्प्रभृतिभ्यश्चेति समासान्तोऽच्प्रत्ययः॰ कलश्चासौ भैरवश्च कलभैरवो मधुरभीषणः॰ विशेषणयोरपि कुमारिलवदेकस्थिकोपसर्जनत्वविवक्षया विशेषण
समासः॰ रवोध्वनिर्मुहुः क्रियते वनेवनेऽनुवनं च मरीचयः॰ च मरीमृगस्तं घ्नश्च स्फुरतिकिं वकनकरत्नानां भुवस्तासां मरीचयश्च स्फुरन्तिसमुद्भवह
मुवर्णनादुदात्तालंकारेण यमकस्याभ्युदयः॥६०॥ त्वमिति॰ अस्मिन्नद्रौ त्वविसारो येषां ते त्वक्सारावंशाः॰ वंशे त्वक्सारकर्मारत्वविसारतृणध्वजा इत्य

इह मुहुर्मुदितैः कलभैरवः प्रतिदिशं क्रियते कलभैरवः॥ स्फुरति चानुवनं चमरीचयः कनकरत्नभुवां च मरीचयः॥६०॥ त्वक्सारन्ध्रपरिपू
रणलब्ध[redacted]गीतिरस्मिन्नसौ मृदितपक्ष्मलरल्लकाङ्गः॥ कस्तूरिकामृगविमर्दसुगन्धिरेति रागीव सक्तिमधिकां विषयेषु वायुः॥६१॥

मरः॰ तेषां रन्ध्राणि तेषां परिपूरणेन ध्मापनेन लब्धा गीतिर्गानसुखं येन सः॰ मृदितानि संसृष्टानि पक्ष्मलानि लोमशानि रल्लकाणां कवलमृगाणां विमर्दन
संघर्षेण सुगन्धिः शोभनगन्धः॰ यद्यपि गन्धस्येत्वे तदेकान्तग्रहणं इत्युक्तं तथापि निरंकुशाः कवय इत्य[redacted]पर्यनुयोगयोगः॥ अतावेवंभूतो वायूरागिवक
मीव विषयेषु देशेषु इन्द्रियार्थेषु च विषयः स्याद्दिशि पार्थ्ये देशे जनपदेऽपि चेति विश्वः॰ अधिकां सक्तिं व्यासक्तिमेति॰॥६१॥६२॥६१॥६१॥६१॥६१॥६२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रीता इति॰ इहाद्रौ युवतयश्च युवानश्च तेषां यूनां॰ पुमान्स्त्रियेत्येकशेषः॰ प्रीत्यै व्यवहितं तपनात्तिरोहितोर्को अतएव सुरतान्येव क्रीडा स्ताभिरायासो व्यायामस्ते
मा॰टी॰ख॰ नयः श्रमः खेदः श्रमोध्व खेदे रत्यादेरितिलक्षणात्॰ तस्य शमे निवारणे पटवः समर्था जलदाः प्रौढध्वान्तं मेघावरणजातान्धकारं दिवसं दोषा रात्रिमा
१९ त्मानं मन्यत इति दोषामन्यं रात्रिमानिनं विदधति॰ मेघावरणमहिम्ना दिवसः स्वयमप्यात्मानं रात्रिं मन्यते किमुतान्य इति भावः॥ दोषेत्यव्ययं तदुपप

प्रीत्यै यूनां व्यवहिततपनाः प्रौढध्वान्तं दिनमिह जलदाः॥ दोषामन्यं विदधति सुरतक्रीडायासश्रमशमपटवः॥ ६२॥ भग्नो निवासोयमिहा
स्य पुष्पैः सदानतो येन विषाणिनो गः॥ तीव्राणि तेनोज्झति कोपितो सो सदानतोयेन विषाणि नागः॥ ६३॥ श्रीरामराजीवलोचनाय नमः

त्मन्यतेर्धातोरात्ममाने खश्चेति खश्प्रत्ययः॰ इह यूनां दोषावद्दिवापि विस्रंभो विहारः संभवतीति भावः॰ भ्रमरविलसितं वृत्तं म्भौ नौ गः स्याद्भ्रमरविल
सितमितिलक्षणात्॥ ६२॥ भग्न इति॰ इहाद्रौ अस्य नागस्य निवासः आश्रयः सदा पुष्पैरानतो नम्रो यं॰ नगः वृक्षो दानतोये र्मददकैः स
ह वर्त्तते यः॰ तेन सदानतोयेन मत्तेनेत्यर्थः॰ येन विषाणिना दन्तिना भग्नस्तेन विषाणिना कोपितः कोपं प्रापितो सो नागः सर्पस्तीव्राणि श्रीरामः
विषाणि गरलान्युज्झतिवमति परप्रतीकाराक्षमस्य क्रोधः स्वाश्रयमेव व्याहन्तीति भावः॥ ६३॥ १९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रालेयेति॰ ईश्वरः शिवोपि किमुतान्य इतिभावः॰ सान्द्रं यदिभचर्म तदेव वसनं तदेवावरणं छादनं यस्य सः तथा सन्नत्वनावरणो नापि शिथिलावरणइ
तिभावः॥ प्रलयादागतं प्रालेयं हिमं॰ तत आगत इत्यणि केकयमित्रयुप्रलयानां यादेरिय इति यशब्दस्य यादेशः॰ तेन शीतं शीतलं अचलेश्वरं हिमव
न्तमधिशेते तस्मिन्शेत इत्यर्थः॰ अधिशीङ्स्थासां कर्मेति कर्मत्वं सर्वर्तुभिर्निर्वृतिकरे सदासुखकरे इत्यद्रौ निवसन्पुनः नास्ति किंचन यस्येति अ

प्रालेयशीतमचलेश्वरमीश्वरोपि सान्द्रेभचर्मवसनावरणोधिशेते॰॥
सर्वर्तुनिर्वृतिकरे निवसन्नुपैति न द्वन्द्वदुःखमिह किंचिदकिंचनोपि॰॥६४॥

किंचनो निःस्वोपि अवो वचेत्यादिना मयूरव्यंसकादिषु निपातनात्तत्पुरुषः॰ किंचिदल्पमपि द्वन्द्वदुःखं शीतोष्णादिदुःखं नोपैति नित्यसन्निहितानामृतू
नां अन्योन्यदोषनिवारकत्वादितिभावः॰ द्वन्द्वं युग्मं द्विमाध्यादि मिथुनं कलहोरज इति वैजयन्ती॰ अत्रोपमानाद्धिमवत उपमेयस्याधिक्यवर्णनाद्
व्यतिरेकः॥६४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टी·व· नयति· एवञ्चैलो रैवतको नवया नगवनरेखया तद्वनपंक्त्या श्यामो मध्यो मध्यभागो यासां ताभिः आभिः स्फटिकानां कटकभूमिभिः तटप्रदेशैः कर
२० लैः अहिरेव परिकरो गात्रिकाबंधस्तं भजतीत्यहिपरिकरभाजः अहिनाकृतावसक्थिकस्येति भावः भवेत्यादिकोश्रातेपर्यंकपरिवारयोः प्रगाढगात्रिका
बंधविवेकारंभयोरपीति विश्वः भजो ण्विः भास्मनैर्भस्ममयैः विकारिको ण्प्रत्ययः अन्नितिप्रकृतिभावान्नास्तद्धितइतिटिलोपो न· अंगरागैरनु

नवनगवनलेखाश्याममध्याभिराभिः स्फटिककटकभूमिर्नाटयत्येष शैलः॥
अहिपरिकरभाजो भास्मनैरंगरागैरधिगतधवलिम्नः शूलपाणेरभिख्यां॥ ६५॥

लेपनैः अधिगतधवलिम्नः प्राप्तधावल्यस्य शूलं पाणौ यस्य तस्य शूलपाणेरीश्वरस्य· प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ स्तः॥ अभि
ख्यां शोभां अभिख्या नामशोभयोरित्यमरः आतश्चोपसर्गे इत्यङ् प्रत्ययः॥ नाटयति अनुकरोतीति निदर्शनालंकारः मालिनीवृत्तमु टे·टी·
क्तम्॥ ६५॥ २०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दध्याद्गिरिति॰ अत्राद्रौ माधवस्य मे माधवाः यादवाः॰ विकचानि वारिजानि येषु तानि च तान्यम्बूनि येषु यत्नात्तो विकचवारिजाम्बू अभितउभयतस्तटेषु
धड्गिर्नदैः स्मृप्रवाहैः प्राक्ल्पत मानदाः प्रत्यक्षोत मानदाः नर्मदाम्बिनेत्याहुः॰ विनोदितो दिनक्लमो येस्तेन एवं विहारेण अपनीता द्रुक
सन्तापा इत्यर्थः॰ किंच जाम्बूनदस्य विकारैर्जाम्बूनदैः कनकभूषणैः कृतरुचो जनित शोभाः सन्तः रसवत्त्वाद्द्रवत्त्वात् गन्धरसेनास्वादवत्त्वाद्रसो
गन्धरसेनास्वादरतिविभ्रवः॰ कादम्बरीध्युः॰ कादम्बः कलहंसः स्वरारतिविजयनी॰ कादम्बरी उलयोरभेदाद्याति प्रकृतिरेनादत्तरति कादम्बरी

१धड्गिरभितस्तटैर्विकचवारिजाम्बूनदैर्विनोदितदिनक्लमाः कृतरुचश्च जाम्बूनदैः॥ निषेव्यमधुमाधवाः
सरसमत्र कादम्बरीं हरन्ति रतये रहः प्रियतमाङ्गकादम्बरमं॥

॥६६॥

सर्वपानसंप्राक्षमाधूकं स्वार्जूरं तालमैक्षवमिति स्मरणात्॥ आतोनुपसर्गे इति कः॰ मधुमधं एवं च मधुकादम्बरशब्दयोः सामान्यविशेषपरत्वाद्दयोनहः
ज्ञं॰ निषेवणीत्वा॰ सखियाणां पेष्यामेव निषेधादिति भावः॰ रतये सुरतार्थं रहः प्रियतमानां प्रेयसीनामङ्गादेवाङ्गकान्तेराकादम्बरं च रसं हरन्ति॰ यादवाः
श्लेहमधुपानरतो स्वतैर्विलक्ष्यं विरहन्तीति भावः॰ एवीर्थ्तं॰ जसोजसमश्च सावगुरुहयतिश्च पृथ्वी गुरुरिति लक्षणात्॥६६॥ श्रीहरिहराभ्यां नमः॥

सार्थकम्२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा·टी·व· दर्पणेति। हे ह्रीरोरविर्दर्पणवन्निर्मलासु पुरःरौप्यभित्तिषु कांचनकन्दराग्रवान्तरजनसानुषु पतिते संक्रान्ते घनं सान्द्रं यत्तिमिरं तन्मुष्णाति हरती
२१ ति तन्मुषः। क्षिप्तस्मिन् ज्योतिषि स्वतेजसि कांचनकंदरासु मुहुः प्रतिफलति सति सम्मूर्छति रमणीरपहृतवसनास्तरुणीः स्मरनु लोपि कंदरा
नमिस्वत्रोपि व्रीडं त्रपां यद्यपि ग्रोऽह्व हलदिति स्त्रियामप्रत्ययः। अत एव मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जेत्यमरः॥ तथापि तत्र स्त्रीत्वाविवक्षायां वा कुलक

दर्पणनिर्मलासु पतिते घनतिमिरमुषि ज्योतिषि रौप्यभित्तिषु पुरः प्रतिफलति मुहुः॥ व्रीडमसमं
स्त्वापि रमणीरपहृतवसनाः कांचनकन्दरासु तरुणीरिह नयति रविः॥ ६१॥ ६१॥

त्वान्नपुंसकत्वम्। अत एव विधोगरोः स्त्रियां वा कुलविवक्षेति वामनः। नयति प्रापयति नीवह्योर्हरते श्चेति द्विकर्मकता। यस्मिन् सुवर्णकन्दरासु स्त्री
ऽर्थं प्रविष्टाः स्त्रियोऽन्धकार इति कृत्वा पुरुषैरपहृतवसनाः सत्यः पुरःस्थितरौप्यभित्ति तेजसामनन्तः प्रतिबिंबवत्प्रकाशमतिमलज्जा इति श्रीराम·
भावः। अत्र कांचनकन्दराणामसंमुखत्वपुरतोऽर्कज्योतिः प्रतिफलनासंबन्धेपि संबन्धोक्तेरतिशयोक्तिः। वंशपत्रपतितं द्रुतं दिक्षुनिवं २१
शपत्रपतितं परनभनलगौरितिलक्षणात्॥ ६१॥

भगवन्तं वासुदेवमाहुरिति १

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टी॰४ अनुकृतेति॰ असावुद्वैरुन्नतोद्रिः रैवतकस्त्वं पश्यागतेसत्यनुकृताशिखरौघाणां श्रीर्यैस्तैस्तथोक्तैः॰ शिखरौघप्रभकान्तिभिरितिभावः॰ अतएवात्रश्रीरिवश्रीरि
२२ तिनिदर्शनयाप्रान्तिमदलंकारोव्यज्यते॰ द्रुतमरुतास्तीघ्रमाहतेनउपनुन्नैः प्रेरितैरतएवसहेलंसलीलंहर्म्यमहद्भिःस्त्यतद्भिः धारतीतिधरः पचाद्यच्॰ ह
लस्यधरोवलभद्रस्तस्यपरिधानान्यम्बराणिनहृतस्त्रामेरंवुवाहैर्मेघैर्नेनसारभसमभ्युत्तिष्ठतीवप्रत्युत्थानंकरोतीवेतिक्रियानिमित्ताक्रियास्वरूपो

अनुकृतशिखरौघश्रीभिरभ्यागतंत्वां भुवि विसरभसमभ्युत्तिष्ठतीवाद्रिरुच्चैः॥ द्रुतमरुदुपनुन्नैरुन्नमद्भिः सहेलंहलधरपरिधानश्या
मलैरम्बुवाहैः॥६८॥ ॥इतिश्रीशिशुपालवधेमहाकाव्येमाघकृतौरैवतवर्णनोनामचतुर्थःसर्गः॥४॥ श्रीहरिहराभ्यांनमः॥

त्प्रेक्षा॰ विशिष्टमप्योन्नमनक्रियाप्रस्तुतक्रियोत्प्रेक्षाणात्साध्योक्तनिदर्शनानुप्राणितेतिसंकरः॥ शब्दस्तुवृत्यनुप्रासः॰ मालिनीवृत्तमुक्तं॰ श्री॰मा॰
॥६८॥ ॥इतिश्रीपदवाक्यप्रमाणपारावारीणश्रीमहामहोपाध्यायकोलचलमल्लीनाथसूरिविरचितायांमाघव्याख्यायांसर्वंक २२
षाख्यायांचतुर्थःसर्गःसमाप्तः॥शुभमस्तुसर्वदा॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माघमहाकाव्य तृतीय सर्ग

॥ श्रीः॥ तृतीयसर्गोयम्माघस्य ॥ ॥श्री

काव्यस्य रामोराज

माघबोधः

Jagannath Bhattarai Collection, Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टि·त्र·
१

श्रीगणेशाय नमः॥ ॥कौबेरेति· अथो द्धववाक्यश्रवणानन्तरमपेतो युद्धेऽभिनिवेशो आग्रहो यस्य सः शान्त
क्रोध इत्यर्थः· अत एव सौम्यः प्रसन्नोऽत एव कौबेर्या दिग्विभागं उत्तरायणमित्यर्थः· स्त्रियाः पुंवदित्यादिना पुं
वद्भावः· तं अपास्य त्यक्त्वाऽगस्त्यस्येम माग स्त्यं मार्गमवतीर्णो दक्षिणायनगत इत्यर्थः· उष्णांशुरिवास्थितः·८

श्री:॥ कौबेरदिग्भागमपास्य मार्गमागस्त्यमुष्णांशुरिवावतीर्णः॥
अपेतयुद्धाभिनिवेशसौम्यो हरिर्हरिप्रस्थमथ प्रतस्थे॥ १॥ ॥

हरिः कृष्णो हरिप्रस्थमिन्द्रप्रस्थं प्रतस्थे·
अनेन हरेः क्रोधः कार्यवशादाकालमन्तस्तंभितो· न त्वेकान्तो निवृत्त इति सूचितम्· हरिः कृष्णो हरिप्रस्थमिन्द्रप्रस्थं प्रतस्थे· गत्यर्थकर्मणामिति गन्त
इत्युद्दिश्यवन्तोहरितिहलायुधः· समवप्रविभ्यः स्थ इत्यात्मनेपदं· देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणामिति गन्त
व्यस्य कर्मत्वं उपमालंकारः· सर्गेस्मिन्निन्द्रवज्रोपेन्द्रवज्रामिश्रणादुपजातिवृत्तं· स्यादिन्द्रवज्रा यदि तौ जगौ गः·
उपेन्द्रवज्रा जतजास्ततो गौ· अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति लक्षणात्·॥१॥ गणे· ॥

श्रीरामः
१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा.टि.न.३

१

मुकुटगतानां मणीनाम नणीयसीभिर्महतीभिश्चित्राभिरनेकवर्णाभिः॥ भाभिः कान्तिभिः॥ स्युः प्रभारुग्रुचिस्त्विड्भाभाश्छविद्युतिदीप्तयइत्यमरः॥ सान्तपक्षे भोभगोइत्यादिना रोर्यकारे तस्य हलि सर्वेषामिति लोपः॥ अथ नैकै र्धातुभिर्गैरिकादिभिः स्फुरितानां रुचिता नामस्मनां मणीनां रश्मयो यस्य तस्य गोवर्द्धनस्यानुकृतिरनुकारिः॥ अनुकृता॥ तत्सादृश्यमभाजीत्यर्थः॥ पूर्णोपमेयं॥ ४॥ कुरण्लेवद्धत इत्याह॥ तस्यति तस्य हरे हरोवक्षउरस्युन्नमन्त्या कांचनकुंडलाग्रयोः प्रभुम्नानां रविता नां गारुत्मतरत्नानां मरकतमणीनां भासा दीप्त्याउरसि प्रसरन्त्येति भावः॥ बाल्ये शैशवे ग्राम्यगणादिलीलास्वन्वितं तमास्मरं तत्पत्नीलकंठपिच्छैः मयूरपिच्छैरुपलक्षितं न्यायमिति यादवः॥ पिच्छबर्हे नपुंसकमित्यमरः॥ तदेवावबृजामालिकातस्याः कलनामोपावनमवापवे स्तुत्प्रेक्षा यत्रान्यधर्मसंबंधादन्यदेवोपतर्कितं प्रकृतेहिभवेत्त्वाशास्ताम्रुत्प्रेक्षां प्रचक्षते इति॥ ५॥

विभाभिरस्योपरि मौलिभाजांभाविर्मणीनामनणीयसीभिः॥ अनेकधातुस्फुरिताश्मरश्मेर्गोवर्द्धनस्यानुकृतिरन्वकारि॥ ४॥ तस्योल्लसत्कांचनकुंडलाग्रप्रत्युप्तगारुत्मतरत्नभासा॥ अबापबाल्योचितनीलकंठपिच्छावचूडाकलनामिवोरः॥ ५॥ तमंगदे मंदरकूटकोटिव्याघट्टनोत्तेजनयामणीनां॥ बंहीयसा दीप्तिवितानकेन चकासयामासतुरुल्लसन्ती॥ ६॥ निसर्गरक्तैर्वलयावनद्धताम्राश्मरश्मिस्फुरितैर्नखाग्रैः॥ व्यद्योततोद्यापि सुरारिवक्षोविक्षोभजासृक्स्नपितैरिवास्तौ॥ ७॥

तमंगदइति॥ तं हरिं मंदरकूटकोटिव्याघट्टनामंदरावलशिखरग्रसंघर्षणं सैवोत्तेजना शाणोल्लेखनातयावंहीयसा बहुतरेणातिप्रयस्थिरेत्यादिना बंहादेशः॥ मणीनां दीप्तिवितानकेन प्रभापटलेनोल्लसन्ती दीप्यमाने॥ आरोहीनघोरं गमिति नुमागमः॥ अंगदे केयूरे केयूरमंगदेतुल्यमित्यमरः॥ चकासयामासतुः॥ शोभयांचक्रतुः॥ अंगदे दृष्टते न्तिरित्यर्थः॥ चकासेर्णपि ताच्छिटि आमुत्थयः स्तेरनुप्रयोगः॥ अत्रांगदयोः प्रागभावीयांगदमेदेप्यभेदोक्तिरुपध्वयतयोः मंदरकूटकोट्यसंबंधेपि संबन्धोक्त्याद्वयोरतिशयोक्त्यासंकरः॥ ६॥ निसर्गेति॥ असौ हरिर्निसर्गरक्तैः स्वभावलोहितैः किंचकूटकेवलयेषकूटकेवलयोरिति

CC-0. Digitized by eGangotri and MIDF- Delhi

अथास्यप्रस्थानसन्नाहं वर्णयन्नादौ छत्रधारणमाह॥ जगदिति॰ अर्को जगत्पूज्यं तं हरिमत एव जगत्पवित्रैरपि पादैः किरणैश्चरणैश्च स्प्रष्टुं नायु
ज्यत नार्हत्॰ युजेर्दैवादिकात्कर्त्तरि लङ्॥ कुतः॰ यतो यस्य हरेर्बृहद्विपुलं पार्वणचन्द्रचारु पूर्णेन्दुसुन्दरं इत्युपमालंकारः॰ आतपात्त्रायत इत्यातप
त्रं छत्रं॰ सुपीति योगविभागात्कः॰ बिभरांबभूवे बिभ्रे॰ भृञः कर्मणि लिट्॰ भीह्रीभृहुवां श्लुवच्चेति विकल्पादाम्॰ आतपत्रान्तर्हितस्यातुल्यैरपि पा
दैः स्प्रष्टुमशक्यत्वादिति भावः॰ जगत्पूज्यस्य हरेः पादेन स्पर्शनिषेधादिति ध्वनिः॥२॥ अथ चामरधारणमाह॥ मृणालेति॰ मृणालसूत्रामलं कान्त्या विशदं इत्यु

जगत्पवित्रैरपि तं न पादैः स्प्रष्टुं जगत्पूज्यमयुज्यतार्कः॥ यतो बृहत्पार्वणचन्द्रचारु तस्यातपत्रं बिभरांबभूवे॥२॥ मृणालसूत्रा
मलमन्तरेण स्थितश्चलच्चामरयोर्द्वयं सः॥ भेजेऽभितः पातुकसिद्धसिन्धोरभूतपूर्वां श्रियमंबुराशेः॥३॥ ॥श्रीः॥ ॥

पमावलद्धौ जनादिति भावः॥ चामरयोर्द्वयमन्तरेण स्थितः द्वयस्य मध्ये स्थितः॰ अन्तरान्तरेण युक्ते इति द्वितीया स हरिरभितः पातुकोभयतः
पातिसिद्धानां देवानां सिन्धुराकाशगंगा यस्य सः॰ पर्यभिभ्यां चेति तसिप्रत्ययः॰ सर्वोभयार्थवर्त्तमानाभ्यामिष्यत इत्युभयार्थत्वं सुप्सुपेति
समासः॰ पातुकेति लषपतेत्यादिनोकञ्॰ तस्यांबुराशे रत्नाकरस्य न भूता पूर्वमभूतपूर्वा॰ सुप्सुपेति समासः॰ तां श्रियं भेजे॰ तादृशीं शोभामुवा
ह॰ अत एवातद्दर्शनात्सा चांबुराशेः संभावनामात्रोक्ता अभितः पातुकसिद्धसिन्धुसंबन्धमूलया॰ संबन्धरूपातिशयोक्त्या सोऽक्तीविक
संयोगेन संकीर्त्यत इति संक्षेपः॥३॥ अथाष्टभिरस्य प्रसाधनविधिं वर्णयन्मुकुटधारणमाह॰ चितेति॰ अस्य हरेरुपर्यूर्ध्वदेशे मौलिभाजां

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा.टि.८३

३

प्रसाधितस्येति॰ प्रसाधितस्यालंकृतस्यास्य मधुद्विषो हरेरन्यैवासदृशी विभिन्नाव॰ अन्यो विभिन्नासदृशावितिवैजयन्ती॰ लक्ष्मीः शोभापक्षा
व॰ शोभासंपत्तिपद्मासु लक्ष्मीः श्रीरिव गम्यत इति विश्वः॰ अभूदित्येतदुक्तम्॰ कुतः॰ हि यस्मात्सा प्रसाधनलक्ष्मीरशेषवपुषि सतीतिशेषः॰
किंच॰ अखिललोकस्य कान्ता प्रिया इतराणि स्यात् तु अन्यस्य कान्ता प्रिया न भवतीत्यनन्यकान्ता किन्तु तस्यैवेत्यर्थः॰ किंचोरस्येव वसतीत्यर्थः॰ अत्र हरेः
प्रसाधनाद् साधारणी शोभा समजायतेति पारमार्थिको वाक्यार्थः॰ तत्र लक्ष्मीशब्देन शोभमहिम्ना वाच्यायाः शोभायाः प्रतीयमानायाश्रीदेव्यासहाभे
दाध्यवसायादियमन्यैव लक्ष्मीरित्यभेदाभेदरूपातिशयोक्तिः ॥१२॥ अथैनमेवार्थं भंग्यन्तरेणाह ॥ कपाटेति॰ कपाटवद्विस्तीर्णमनोरमेवोरस्थले
स्थिता श्रीरिति ललनाकान्ता यस्य तस्य हरेरानन्दिताशेषजना सन्तोषितसकलजना सर्वे

प्रसाधितस्यास्य मधुद्विषोभूदन्यैव लक्ष्मीरितियुक्तमेतत् ॥
वपुष्यशेषेऽखिललोककान्ता सानन्यकान्ताह्युरसीतरा तु ॥१२॥ कपाटविस्तीर्णमनोरमोरःस्थलस्थितश्रीललनस्य तस्य ॥ आनन्दिताशेष॰
जना बभूव सर्वांगसङ्गिन्यपरैव लक्ष्मीः ॥१३॥ हे स्वाधिप प्राणमुषां नखानामुपेयुषां भूषणतां क्षतेन ॥ प्रकाशकार्कश्यगुणोदधानाः स्तनौ तरुण्यः प
रिबध्रुरेनम् ॥१४॥

गसंगिनी मुकुलदेहव्यापिनी॰ अपरैवासाधारणैव श्रीदेव्याअन्यैव लक्ष्मीः शोभा रमा च बभूव॰ समवालंकारः॰ प्रायेणेत्यर्थमुपनेकं श्लोकमुक्तिविशेषश्लो
भास्त्रिरवर्ती वयः॰ यथाहनैषधे॰ आदावेव निषीथेस्यादि श्लोकद्वयम्॰ तथा स्वकेलिलेशस्मितादि श्लोकद्वयं चेत्यादि॰ ॥१३॥ अथ देवी सहचरीभिर्वा स्वयात्रेति हु
चयन्प्रसाधनविधेः फलमाह॰ हेस्वेति॰ भूषणतामुपेयुषां नतु प्रहरतामित्यर्थः॥ हेस्वाधिपस्याहेरणपकशिपोः प्राणमुषां प्राणहारिणां वज्रादपि कठि
नानामित्यर्थः॥ नखानां क्षतेन व्रणेन प्रकाशो व्यक्तः कार्कश्यमेव गुणो ययोस्तौ स्तनौ स्तनानित्यर्थः॥ जातावेकवचने प्राप्तेऽपि भूयसां स्तनादिषु जाते
र्द्वित्ववद्धित्वाद्द्विवचनम्॰ यथाह वामनः॥ स्तनादीनां द्वित्वविशिष्टा जातिः॰ प्रायेणेति॰ दधाना स्तरुण्यो युवतयः॰ वयसि प्रथम इति ङीप्॰ एनं ह
रिं परिबध्रुः वेष्टयामासुः॰ अत्र हिरण्यनखानां नरहरिनखभेदेऽप्यभेदोक्त्या स्तनयोश्चतादृक्काठिन्यासंबंधेऽपि संबंधोक्त्यावातिशयोक्तिः॰ स्तनयोः साधे

[illegible]

श्री: १

३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्सुपादानाविकलादुद्दकरावृत्तीयाद्देशः ॥१॥

उभाविति· तमालवन्नीलं श्यामं मुक्ताभिरासंजिते मुक्तालते मौक्तिकस्रजौ यस्मिंस्तदस्य हरेर्वक्षः आकाशगंगायाः पयसः उभौ प्रवाहौ व्योम्नि पृथक् पतेतां यदि पृथ
क्प्रवहतां चेत्· संभावनायां लिङ्· तेन व्योम्ना उपमीयेत समीक्रियेत· नान्यस्योपमानं किंचिदस्तीति भावः· मुक्ताहारान्वितत्वान्नित्यर्थः· अत्र व्योम्नः गंगा
प्रवाहद्वयासंबंधोपि संभावनया संबंधकथनादतिशयोक्तिः· तदेतत् पुष्पं प्रवालोपहितं यदि स्यादित्याद्युदाहृत्य अलंकारसर्वस्वकारः स्पष्टीचकार ॥८॥
तेनेति· तेन हरिणा दीधितिभिर्दीपिता आशा येन सः दिगन्तविश्रान्ततेजा इत्यर्थः· पयोधेरंभसां सारस्य विकारः सारमयो मणिः समुद्रमथनोत्थः कौस्तु
भाख्यो दध्रे धृतः· धञ् धारणे कर्मणि लिट्· यत्र मणौ बिंबगतः प्रतिबिंबितो लोको बाह्यलोकस्तदंगे तस्य हरेः शरीरे साक्षात्साक्षाद्दृष्टो बहिः प्रत्यक्षेणा
लक्ष्यत इत्यर्थः· अन्तर्वसन् अन्तरिवालक्ष्यत· यत्र मणौ प्रतिबिंबितो बाह्यलोकस्तदन्तस्थ एव नैर्मल्याद्बहिः प्रतिफलितकुक्षिस्थलोक इवालक्ष्यते

उभौ यदि व्योम्नि पृथक्प्रवाहावाकाशगंगापयसः पतेतां· तेनोपमीयेत तमालनीलमामुक्तमुक्तालतमस्य वक्षः ॥८॥ तेनांभसां सारमयः
पयोधेर्दध्रे मणिर्दीधितिदीपिताशः ॥ अन्तर्वसन्बिंबगतस्तदंगे साक्षादिवालक्ष्यत यत्र लोकः ॥९॥ मुक्तामयं सारसनावलंबि भाति स्म दामा
प्रपदीनमस्य ॥ अंगुष्ठनिष्ठ्यूतमिवोर्द्ध्वमुच्चैस्त्रिस्रोतसः सन्ततधारमंभः ॥१०॥ महेन्द्रनीलस्थलनीलमूर्तेरराजत्कर्बूरपिशंगवासाः ॥ विसृ
त्वरैरंबुरुहां रजोभिर्यमस्य मुष्यत्र इवोदभारः ॥११॥

पुष्पेक्षा ॥९॥ मुक्तेति· अस्य हरेः मुक्तामयं मुक्ताप्रचुरं तत्प्रकृतवचने मयट्· सारसने काञ्चि
सूत्रे· अवलंबते इति सारसनावलंबि· स्त्रीवे सारसनं चाथ पुंस्कट्यां शृंखलं त्रिषु इत्यमरः ॥ आप्रपदं प्राप्नोतीति आप्रपदीनं· पादावलंबी· आप्रपदं आप्रपदं
प्राप्नोतीति खप्रत्ययः ॥ दाम मुक्ताहारः अंगुष्ठेन निष्ठ्यूतं विसृष्टमित्यर्थः· गौणार्थत्वाद् ग्राम्यत्वं यथाह दण्डी· निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपा
श्रयं ॥ अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते इति तु ऊर्ध्वमूर्ध्वप्रवाहमुच्चैः उन्नतं त्रिस्रोतसो मंदाकिन्याः सन्ततं धारा यस्य तत्· अविच्छिन्नमंभ इव भा
ति स्मेत्युत्प्रेक्षा ॥१०॥ महेति· इन्द्रनीलस्थलमिव नीलमूर्तिः स्वपांगः संहितायां रोरीति लोपः· ढ्रलोपे पूर्वस्य दीर्घोऽण इति दीर्घः· कर्बूरं हरिताल
मिव पिशंगं वासो यस्य सः पीतांबर इत्यर्थः· हरितालं च कर्बूरमिति वैजयन्ती· महीधरवत्(सृ) त्वरैर्विसरैः· इण्नशजिसर्तिभ्यः क्वरप्· गत्वरश्च

[illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अथ पञ्चभिस्स्वद्वियास्य संनिधानमाह ॥ तस्येति ॥ अतसीसूनेन क्षौमकुसुमेन समानभासस्तुल्यकान्तेः स्निग्धश्यामस्येत्यर्थः अतसी
स्यादुमा क्षुमेत्यमरः ॥ तस्य हरेरेकबाहुभ्राम्यदावर्त्तमानं मयूखावलीनां मंडलं चक्रवालं यस्य तेन चक्रेण सुदर्शनेन स्फुरन्महानावर्त्तो भ्र
मो यस्य सः स्यादावर्त्तोम्भसां भ्रम इत्यमरः ॥ यमुनाजलानामोघः पूर इव रेजे · वक्रं दधानवेत्यर्थः ॥१७॥ विरोधिनामिति · विरोधिनां वै

तस्यातसीसूनसमानभासो भ्राम्यन्मयूखावलिमण्डलेन ॥ चक्रेण रेजे यमुनाजलौघः स्फुरन्महावर्त्त इवैकबाहुः ॥१७॥
विरोधिनां विग्रहभेददक्षा मूर्त्तेव शक्तिः क्वचिदस्खलन्ती ॥ नित्यं हरेः सन्निहिता निकामं कौमोदकी मोदयति स्म
चेतः ॥१८॥

रिणां विग्रहभेदे शरीरविदारणे दक्षा कुशला पेशला · शरीरं वर्ष्म विग्रह इत्यमरः ॥ क्वचित्क्वापि अस्खलन्ती सर्वत्राप्रतिहतवृ
त्तिरित्यर्थः ॥ नित्यं संनिहिताऽनपायिनी अतएव मूर्त्ता मूर्त्तिमती शक्तिः सामर्थ्यमिव स्थिता इत्युत्प्रेक्षा · कौमोदकी हरेश्चेतो
निकामं मोदयति स्म · स्वसन्निधानेनेति भावः ॥१८॥



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आकर्षेति॰ अभ्युन्नतत्वाद् उतो ह्रूद् उमाकर्षते वनमन्तं मध्यमुन्नमयतेव स्थिते नेत्युत्प्रेक्षा॰ अतिगुरुत्वमतिभारत्वमतिप्रवृद्धत्वं च भजतीति भाक्॰ भङ्गो
रिवः तेनाङ्गनानां कुचमण्डलेनातिकृशीयानत्यन्तकृशतरस्तनीयान् क्षीणश्च॰ अतो हेलादेर्लघोरिति रेफादेशः॰ मध्यो नितान्तमाक्रान्तः पीडितश्चेव ननाम नतः॰ प्र
णतश्च॰ अत्र मध्यकुचमण्डलयोर्विशेषणसामान्याद् दरिविजिगीषुराजप्रतीतेः समासोक्तिः॰ तथा च वाचकवाच्ययोः प्रतीयमानाभेदेनाक्रमणक्रियाक
र्मकर्तृभावं भावयन्त्यानुप्राणिते यं नमस्याक्रमणहेतुत्वोत्प्रेक्षोत्थनयोः शंकरः॰ उत्प्रेक्षयोस्तु नैरपेक्ष्यात्संसृष्टिरिति विवेकः॥१५॥ यां यामिति॰ प्रि

आकर्षतेवोर्ध्वमतिक्रशीयानभ्युन्नतत्वात्कुचमण्डलेन॥ ननाम मध्योतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम्॥१५॥

यां यां प्रियः प्रैक्षत कातराक्षी सा सा ह्रिया नम्रमुखी बभूव॥ निःशङ्कमन्याः सममाहितेर्ष्यास्तत्रान्तरे जघ्नुरमुं कटाक्षैः॥१६॥

योहरिर्यां यामङ्गनां॰ नित्यवीप्सयोरिति वीप्सायां द्विर्भावः॰ एकपदं चैतत् प्रैक्षतालोकयत सापूर्ववद् द्विर्भावः कातराक्षी साध्वसाकुलित
लोचना सती ह्रिया नम्रमुखी बभूव॰ अनेन कार्यद्वारा लज्जासाध्वसभावोदयः उक्तः॰ अन्यासामीर्ष्याभावोदयमाह॰ अन्याः अप्रेक्षिताङ्गनाः
आहितेर्ष्याः कृताक्षमाः सत्यः परोत्कर्षाक्षमेर्ष्या स्यादिति लक्षणं॰ तत्रान्तरे तस्मिन्नवीक्षणावसरे॰ कीवेत्तु मध्ये वाकाशे तादर्थ्ये वस
रविधावितिवैजयन्ती॰ निःशङ्कं तद्वीक्षणादेव विस्रब्धं सममं युगपत् कटाक्षैरमुं हरिं जघ्नुः सरोषमद्राक्षुः॥१६॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा·टि·ल ३ ऽप्यसम्बन्धेपि सम्बन्धकथनात्· पंचजनो नाम कश्चिदसुरस्तत्प्रभवः पांचजन्योपि तस्य सन्निहितो भूदित्यर्थः· वीणाः श्रूयन्ते पुष्पाण्याघ्रायन्ते इत्या
५ दिवद्धर्मधर्मिणोरभेदोपचारात्पाञ्चजन्यस्य श्रवणोक्तिः ॥२१॥ रराजेति· ॥ महान् रथो यस्य स महारथो रथिकविशेषः· आत्मानं सारथिं
चाश्वान् रक्षन् युद्ध्यते यो नरः स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदा इति· रथांगं चक्रमस्यास्तीति रथांगी हरिः· इष्टसिद्धेः संपादकं· लक्षण

प्रहृष्टमंद्राम्बुदधीरनादः कृष्णार्णवाभ्यर्णचरैकहंसः ॥ मन्दानिलापूरकृतं दधानो निध्यानमश्रूयत पाञ्चजन्यः ॥ २१ ॥ ॥·

रराज संपादकमिष्टसिद्धेः सर्वासु दिक्ष्वप्रतिषिद्धमार्गम् ॥ महारथः पुष्परथं रथाङ्गी क्षिप्रं क्षपानाथ इवाधिरूढः ॥२२॥ ॥·

वत्वात्· पुष्यः सर्वार्थसाधक इति शास्त्राद्वेति भावः· सर्वासु दिक्ष्वप्रतिषिद्धमार्गमनिवारितगमनमित्यर्थः· अधिष्ठातृशक्तेर्निरंकुशत्वात्·
पुष्यो हस्तो मैत्रमप्याश्विनं च चत्वार्याहुः सर्वदिग्द्वारकानीति शास्त्रादिति भावः· क्षिप्रं क्षिप्रगामिनं· अन्यत्र क्षिप्रकारिणं· क्षिप्रं चाश्विनी दि श्रीरामः
ने पुष्यमिति शास्त्रात्· पुष्परथं क्रीडारथं· असौ पुष्परथश्चक्रयानं न तु समराय यदित्यमरः· अधिरूढः सन् पुष्यो रथ इव तमधिरूढः पुष्यन ५
क्षत्रगतः क्षपानाथ चन्द्र इव रराज· ॥२२॥

CC-0. Digitized by eGangotri and MIDF- Delhi

नकेवलमिति· अन्यस्य साधारणः सपत्नजनसाधारणो न भवतीत्यनन्यसाधारणस्तस्यैव भावस्तत्ता तां दधानस्तथापि यो नन्दकः स्वतया केवलं गज-
आदिवत्साधारणत्वेनैव गुणैः केवलं नन्दको न· किन्तु परेषां शत्रूणामसन्तमुद्वेजयिता भीषयिता· सन्तत एव नाम्नापि वं द्वाद्विनन्दयतीति
नन्दकः स्यत्वन्त्वर्थसंज्ञावलेनापि नन्दयितृत्वेनापीति यावत्· तस्यैव हरेः सम्बन्धानन्यसाधारणत्वात्परोद्वेजकत्वाच्च तस्य नन्दको नन्दयिता चेत्यर्थः॥
सनन्दकः नकोश्यः खड्गः तत्सन्निहितो भूदित्यर्थः· सम्बन्ध्यानुवादेन सन्निधानमेवात्र विधेयकप्रकारणत्वात्· अनान्यसाधारणत्वपरोद्वेजकत्व-

न केवलं यः स्वतया गुणैरनन्यसाधारणतां दधानः॥ अन्वर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव स नन्दकोऽभूत्॥१९॥ नवीनमन्येन नतिं
कदाचित्कर्णान्तिकप्राप्तगुणं क्रियासु॥ विधेयमस्याभवदन्तिकस्थं शार्ङ्गं धनुर्मित्रमिव द्रढीयः॥२०॥ पदार्थाभ्यां विशेषणगत्या नन्दकस्य तदीयताम-
र्थनाकस्य हार्थहेतुकं काव्यलिंगमलंकारः॥१९॥ नवेति· अन्येन पुरुषान्तरेणानति प्राक्कर्षणं भेदेन स्वानुकूल्यं वक्रतां चिन्तनीतं न प्रापितं· क्रियासु रणकर्मसु दृ-
नक्तत्वेषु वा कर्णान्तिकं कर्णगोचरं प्राप्तो गुणो मौर्वी आप्तताधर्मश्चय यस्य तत्· विधेयं क्रियासु वश्यं गतं द्रढीयो दृढतरं पीडासहतरमिति यावत्· ङ्गस्याविका-
रः शार्ङ्गं नाम धनुर्मित्रमिवास्य हरेरन्तिकस्थं सन्निहितमभवत्॥२०॥ प्रबुद्धेति· धियं रातीति धीरो मनोहरः मन्द्रो गम्भीरो वृद्धस्यैव धीरो नादोऽपि प्रबुद्धे-
येन सः प्रबुद्धमंद्रांबुदनादधीरः स्त्युपमा॥ तस्य स्वार्णवस्तस्याभ्यर्णा वरोन्तिकवारि॥ उपकण्ठान्तिकाभ्यर्णा इत्यमरः॥ स वा सा वेकहंसश्वेतिश्लिष्ट-
परंपरितरूपकं मन्यामि लक्ष्यापूरः आपूरणं तेन कृतं जनितं निध्यानं शब्द ध्यानः आध्मातोपि मन्द आहत प्रवेशादेवध्मानमिति पाठवातिशयोक्तिः·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अथेति· अथ तोरणस्खलनानन्तरं उच्चैरुन्नतैस्तोरणैर्द्वारदारुणि संगेन भंगः तस्माद्भयेनावनम्रीकृतानि येस्तानि केतनानि सैन्यानि सोमस्यान्वयः सन्तानं तं सो
मान्वयं हरिं सुनीतिभाजं सुष्ठुनीतिमन्तं क्रिया समाद्युपायप्रयोगः तासां फलानि हिरण्यभूमित्यादिलाभाः इवान्वयुः अन्वगच्छन् यातेर्लङ् शकिम
यतस्येति सेर्जुस्·॥२६॥ रणेति॥ रणामानि अहरणानि वतैः रणामाहरणैः कृष्णलोहितैः वर्णो वर्णेनेति समासः· वारणदानतोयैर्गजमदोदकैरप

अथोच्चकैस्तोरणसंगभंगभयावनम्रीकृतकेतनानि॥ क्रियाफलानीव सुनीतिभाजं सैन्यानि सोमान्वयमन्व
युस्तं॥२६॥ रणामाहरणैर्वारणदानतोयैरलोहिताः कांचनभूपरागाः॥ आनेमिमग्नैः शितिकंठपिछक्षोदद्युत
भ्रुक्षुदिरे रथौघैः॥२७॥

लोहिताः संमिलिताः· अत एव शितिकण्ठपिछक्षोदाः मयूरबर्हचूर्णा इव [illegible]तन्त इति तथोक्ताः क्विप्· उपमालंकारः·· कांचनस्य कांचनीव भूत
स्याः परागाः पांसव आनेमिमग्नाः आनुप्रधिससाहितं चक्रधाराप्रधिर्नेमिरित्यमरः·· आङ् मर्यादाभिविध्योरित्याभिविधौ अव्ययीभावः·
मग्नैः रथौघैः क्षुण्णाः अपि प्राद इत्यर्थः॥ परागाणां विशिष्टसम्बन्धेपि संबन्धोक्तेरतिशयोक्तिः· तथा च महती गजरथसंपत्तिर्व्यज्यत इति
अलङ्कारेणवस्तुध्वनिः॥२७॥





Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ध्वजेति॰ अथ रथारोहणानन्तरं शौरिः कृष्णः ध्वजाग्रं धाम स्थानं यस्य सः मणिमेदिनीषु कुट्टिमेषु संक्रान्तमूर्त्तिः प्रतिबिम्बितांगः सन् पन्नगारिर्गरु
त्मान् कृतावकाशः सर्पान् ग्रसितुं भीषयितुं रसातलं पातालं विविक्षन्निव प्रवेष्टुमिच्छन्निवेत्युत्प्रेक्षा॰ विशतेः सन्नन्ताल्लटः शत्रादेशः ददृशे दृष्टः सान्नि
ध्ये हिते भूरित्यर्थः ॥२३॥ धियेति॰ यातुमिच्छतोपि यासन्तः यातेः सन्नन्ताल्लटः शत्रादेशः तस्य हरेः संबन्धी महीं धरन्तीति महीध्राः पर्वताः मूलवि
भुजादित्वात्कप्रत्यय इति वामनः महीध्रादयो मूलविभुजादिदर्शनादिति तेषां रंध्राणि बिलानि तेषां भिदा भेदनं षिद्भिदादिभ्योऽङ् तया भिदायां पटीयान् स्य

ध्वजाग्रधामा ददृशेऽथ शौरिः संक्रान्तमूर्त्तिर्मणिमेदिनीषु॰ कृतावकाशो ग्रसितुं रसातलं विविक्षन्निव पन्नगारिः ॥२३॥ धियासतस्तस्य मही
ध्ररन्ध्रभिदापटीयान्पटहप्रणादः ॥ जलान्तराणीव महार्णवौघः शब्दान्तराण्यन्तरयांबकार॰ ॥२४॥ यतः स भर्त्ता जगतां जगाम धर्त्री धरित्र्याः
फणिनाततोऽधः ॥ महाभराभुग्नशिरः सहस्रसाहायकव्यग्रभुजं प्रसस्ते॰ ॥२५॥ ॥ ॥ ॥ ॥ श्रीरामाय नमः

र्थतरः पटहप्रणादेति ध्वनिः धारणाघोषः महार्णवस्यौघः प्रवाहः आमानि जलानि जलान्तराणीव सुप्सुपेति समासः अन्यान्यद्दृढशब्दान्तराणि पूर्ववत्समासः
अन्तराण्यन्तर्हितानि चकार॰ अन्तरायांबकार छादयामासेत्यर्थः॰ अन्तरशब्दान्तर्धानार्थात्तत्करोतीति णिजन्ताल्लिट् अन्तरमवकाशावधिपरिधा
नान्तर्धिभेदतादर्थ्ये इत्यमरः ॥२४॥ यत इति॰ जगतां भर्त्ता धारयिता कुक्षिस्थो विलोकइत्यर्थः॰ कर्त्तृकर्मणोः कृतीति कर्मणि षष्ठी
महीधर्यतो येन भूमार्गेण जगाम ततस्तस्मिन्मार्गे अधः पाताललोके धरित्र्याः धरित्र्या धर्त्री धारयित्री पूर्ववत्षष्ठी फणिनां शेषः रामहताभारेणासन्न
ताङ्गस्य कुब्जीभूतस्य शिरः सहस्रस्य सहायके सहायकर्मणि बाहुपथा हृत्पोन्मा हृत्स॰ व्यग्रास्त्वरमाणा भुजा यस्मिंस्तद्यथा तथा प्रसस्ते प्रशस्तं भावे लिट्

हिभ्यबोरित्यर्थः अत्र शेषस्यापि शिष्टप्रसरणा संबन्धेऽपि
असम्बन्धोक्तेरतिशयोक्तिः ॥२५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा॰टी॰त॰ कृतास्पदेति॰ भूमिभृतां राज्ञां गिरीणां च सहस्रैः कृतास्पदः कृताधिष्ठाना॰ आस्पदं प्रतिष्ठायामिति निपातः॰ उदकमस्यास्तीत्युदन्वानुदधिः॰ उदन्वानुदधौ वेति
८ निपातनात्साधुः॰ तस्याम्भसा परिवीता परिवेष्टिता मूर्त्तिः स्वरूपं यस्याः सा पृथ्वी पृथुः॰ वोतो गुणवचनादिति ङीप्॰ एवंभूतायाः पृथ्व्याः न निर्विद्यते नाखिद्य
त इत्यनिर्वित्॰ विदेः सत्तार्थान्निपूर्वात्॰ सत्सूद्विषेत्यादिना क्विप्॰ तेनानिर्विदाखिन्नेन अन्यथा शिल्पसौष्ठवासिद्धिरिति भावः॰ विधात्रा ब्रह्मणा

कृतास्पदा भूमिभृतां सहस्रैरुदन्वदंभःपरिवीतमूर्त्तिः॥
अनिर्विदा या विदधे विधात्रा पृथ्वी पृथिव्याः प्रतियातनेव॥३४॥

प्रथत इति पृथिवी भूः पृथेः षिवः औणादिकः॰ षिद्गौरादिभ्यश्चेति ङीष्॰ तस्याः प्रतियातना प्रतिकृतिरिव विदधे विहिता॰ प्रतिया
तना प्रतिच्छाया प्रतिकृतिरित्यमरः॰ भूः प्रतिनिधिर्लोकप्रेक्षायाः पुरे वैविध्यविस्तारादिवत्तु व्यज्यते॰॥३४॥ ॥३४॥ ॥॰ श्रीरामः
८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उपेयुषइति· विद्वानभिज्ञो॰ तस्य नलस्य तां पुरिं निर्गर्यां दत्तचक्षुर्निविष्टदृष्टिः सौ हरिर्निरन्तराभिर्निर्घ्याभिस्तीकिंकिणीभिः सेनाभिर्निरुच्छासमप्तिसंकु
टं वर्त्म उपेयुषः प्राप्तस्य रथस्य ध्वानैर्यातं संबाधनिबन्धनं मन्दगमनं न विदामास न विवेद· उषविद् ज्ञाने· लोस्यतास्याम्भित्याम्· ध्यानेन गादसंवेदनं
नत्वज्ञानादितिभावः॥ ध्यानं गतस्य पदार्थत्वात्पदार्थहेतुकं काव्यलिंगमलंकारः॥३१॥ अथैकत्रिंशतश्लोकैर्दीर्घकां वर्णयति· मध्य इति· म
ध्ये समुद्रस्येति मध्येसमुद्रम्· पारेमध्ये षष्ठ्या वेति विकल्पादव्ययीभावः· मध्यशब्दस्य तत्सन्नियोगादेकारान्तत्वं· कांचनवप्रभासा हेमप्रा

उपेयुषो वर्त्म निरन्तराभिरसौ निरुच्छासमनीकिनीभिः॥ रथस्य तस्यां पुरि दत्तचक्षुर्विद्वानविदामास शनैर्न यातं॥३१॥ मध्येसमु
द्रं ककुभः पिशंगीर्या कुर्वती कांचनवप्रभासा॥ तुरंगकान्तामुखहव्यवाहज्वालेव भित्वा जलमुल्ललास·॥३२॥ ॥श्रीरामायनमः॥·

कारप्रभया ककुभो दिशः पिशंगीः पिंगलवर्णाः गौरादित्वान्ङीष्· कुर्वती या पूः जलं समुद्रोदकं भित्वा उत्थितेति शेषः॥ तुरंगकान्तायाः वडवाया मुखे हव्यं वह-
तीति हव्यवाहोग्निः कर्मण्यण्· तस्य वडवाग्नेर्ज्वालेवोल्ललास उद्भासे· अत्र समुद्रान्तर्लीनायां वडवानलज्वालायां कनकवित्तभाव्यमानस्यप(
ध्योल्लसनस्य पुरीदर्शनादभेदाध्यवसायेनास्यां ज्वालात्वमुत्प्रेक्षते· इवशब्दश्चोत्प्रेक्षाव्यंजक एव नोपमायां· ईदृग्ज्वालाया अप्रसिद्धत्वेनोप(
मानत्वायोगात्· मन्ये शंके ध्रुवं नूनं प्रायइत्येवमादिभिः· उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोपि तादृशइत्याचार्यदण्डी·॥३२॥ श्रीहरिजयति·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा.टी.ल. आपतताः आकृष्टा वल्गा मुखरज्जुर्यस्मिन्कर्मणि यथा तथा प्रयत्नेन दुर्वारवेगत्वादतिप्रयत्नेनापि निरुद्धाः वाहाः वाजिनो येस्ते · वाजिवाहार्वगन्धर्वेत्यमरः ·
१ तुरंगिभिरश्वसादिभिरग्रे पुरोदेशे अवेक्षिता नालोकिता नरेणुभिः प्रकीर्यंतीति प्रकीर्णम् पांसुकीर्णितान् कर्मणि क्तः · पृथुकान् शिशून् · पृथु
कः शावकः शिशुरित्यमरः · अनन्यस्तूर्णमध्वेत्यपथिभ्योनिमुरपसारयांचक्रुः इति स्वभावोक्तिः ॥३०॥ दिदृक्षेति · अनघमकल्मषं मुरारिं दि
दृक्षमाणा द्रष्टुमिच्छन्तः · दृशोः सन्नन्तात्कर्तरि शानजादेशः ॥ ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं · जनो यारथ्यापां रथ्यायां प्रतिरथ्यं यथार्थेऽव्य
यीभावः · आरात्समीपं · आराद्दूरसमीपयोरित्यमरः · ईयुरगमन् · इणो लिट् · दीर्घ इणः कितीत्यभ्यासदीर्घः · ननु नित्यपरिचिते का दिदृक्षेत्य

अवेक्षिता नायतवल्गमग्रे तुरंगिभिर्यत्र ... वाहैः ॥ प्रकीर्णितान् रेणुभिरेत्य तूर्णं निन्युर्जनन्यः पृथुकान्पथिभ्यः ॥३०॥ दिदृक्षमाणाः
प्रतिरथ्यमीयुर्मुरारिमारादनघं जनौघाः ॥ अनेकशः संस्तुतमप्यनल्पा नवं नवं प्रीतिरहो करोति ॥३१॥३१॥३१॥३१ ॥

त आह · अनेकश इति · अनेकशः बहुवारमित्यर्थः · बह्वल्पार्थाच्छस्कारकादन्यतरस्यामिति शस्प्रत्ययः · संस्तुतं परिचितमपि वस्तु जनं वेति शेषः ·
संस्तवः स्यात्परिचय इत्यमरः ॥ अनल्पा अधिका प्रीतिः प्रेमकर्त्री नवं नवमाभीक्ष्ण्येन नवं करोति · नित्यवीप्सयोरिति नित्यार्थे द्विर्भावः · अहो आश्च श्रीहरिः
र्यः पुराणस्याविर्भूतत्वमित्याश्चर्यपरमप्रेमास्पदं वस्तु नित्यदृष्टमप्यदृष्टचरमिव प्रतिक्षणं दिदृक्षत इत्यर्थः ॥ भगवानपि तथैवेति सा ७
मान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥३१॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



नेति। अष्टसु लोहेषु परं प्रतिष्ठा। स्पस्पष्टापदं सुवर्णं। रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामिति सुवर्णपर्यायेष्वमरः। तस्य भूमिस्तस्या रेणुः कांच
नभूरजः। पादाहतो रथाश्वादिचरणताडितोऽसन्नित्यर्थः। महाजनानां बहुजनानां पूज्यानां च शिरांसि नलं यथाभासमनाक्रामति स्म। किंच नाउप्लुति
उत्पतनं दर्पचनैव जगाम। कुतः। यद्यस्मात् कृति मणो गुरुत्वगुणस्य महात्मस्य च प्रियव्यथिरेत्यादिना गुरोर्नतदेवाः। सदृशमनुरूपं यथा तथा। वेष्ट
नावलतत्। अवहातन्न गुरुत्वस्योद्गत्यं प्रतिबन्धकत्वादिति भावः। अत्रानोद्गत्यादिप्रस्तुतसुवर्णपरागादिशेषणसाम्यादप्रस्तुतसुजनप्रतीतेः समा

नृत्तं यथाभासमहाजनानां शिरांसि नैवोत्प्लुतिमाजगाम। अवेष्टताष्टापदभूमिरेणुः पादाहतो यत्सदृशं गरिम्णः ॥२८॥ ॥
निरुध्यमाना यदुभिः कथंचिन्मुहुर्यदुत्क्षिप्तगृहीतपादाः। कुवंग्रहन्मार्गरुधः करीन्द्रानुदग्रं ध्यगन्तुं तुरगास्तदीषुः ॥२९॥

सोक्तिरलंकारः ॥ निरुध्येति। तुरगा यदुभिरारूढैरिति भावः। कथंचिदिति प्रयत्नेन निरुध्यमाना वल्गाकर्षणेन वार्यमाणा अपि यदश्वा
दग्रालिवते पादाश्चताग्रपादा उत्क्षिप्ताग्रहस्तादयागुणगुणितो भेदाभेदयोगादितिवामनसूत्रात्सामानाधिकरणसमासः। मुहुरुत्क्षि
प्तोत्क्षिप्तत्वन्तस्तत्तस्मान्मार्गरुन्धन्तीति मार्गरुधो मर्दगमनेन मार्गरोधिनः। क्विप्। गुरुत्वहताः हस्तिभ्यां श्वालंघ्यानपीति भावः। करीन्द्रानुदग्रं ध्य
गन्तुमीषुरिच्छन्तिस्म। अत्र तुरगेक्षायां गुरवो पि समार्गप्रतिरोधकाः परैरलंघ्यं ध्यं तं इत्यलंकारो याव्यत्तु ध्वनिः ॥२९॥ अवेक्षितानिति।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्वष्टुरिति· त्वष्टुर्विश्वकर्मणः सदाभ्यासेन गृहीतो लब्धो यः शिल्पविद्याया एव संपदः प्रसरः प्रकर्षस्तस्य या सीमाऽवधिः प्रतिमेति यावत्· या प्रागादर्शतलाम
लेषु दर्पणस्वच्छरूपस्वच्छेषु· दर्पणो मुकुरादर्शावित्यमरः· जलधेर्जलेषु स्वः स्वर्गस्य स्वरव्ययं स्वर्गनाकत्रिदिवत्रिदशालया इत्यमरः· छायाप्रतिबिं
बितमिवाऽदृश्यतेत्युत्प्रेक्षा· छाया त्वनातपे कान्तौ प्रतिबिंबार्कजाययोरिति वैजयन्ती· ॥३५॥ रथांगेति· अम्बुधिः वराय श्रेष्ठाय जामात्रे· वरो जामा

त्वष्टुः सदाभ्यासगृहीतशिल्पविज्ञानसम्पत्प्रसरस्य सीमा ॥ अदृश्यतादर्शतलामलेषु छायेव या स्वर्जलधेर्जलेषु· ॥३५॥
रथांगभर्त्रेऽभिनवं वराय यस्याः पितेव प्रतिपादिता या ॥ प्रेमोपकण्ठं मुहुरंकभाजो रत्नावलीरंबुधिराबबन्ध· ॥३६॥ ॥

तृलिंगयोः श्रेष्ठेऽप्यवत् इत्यमरविश्वौ· रथांगभर्त्रे चक्रधराय हरयेऽभिनवं यथा तथा प्रतिपादिता या· अंकः समीप उत्संगश्च तद्भाजः· अंकः
समीप उत्संगे चिह्ने स्थानापराधयोरिति केशवः· यस्याः पुर उपकंठमन्तिके· अत्यन्तसंयोगे द्वितीया· अन्यत्रोपकण्ठं विभक्त्यर्थेऽव्ययीभा
वः· मुहुः प्रेम्णा रत्नावलीराबबंध मुमोच· श्लेषानुप्राणितेयमुपमेति संकरः ॥३६॥ यस्या इति· वलन्तीनां वारिधिवारिवीचिनां(

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा.टी.स. छणमुपरं परागमुज्ज्वलद्भिः स्फटिकतटैः शंखानां कुलेनाकुलेन संकीर्णेन यस्याः पुरो वप्रेण पर्यन्तचरं समीपवर्त्ति उडुचक्रं नक्षत्रमण्डलं यस्य
९ सः सुमेरोः वप्रः सानुः सानुप्राकारयोर्वप्र इत्युभयत्रापि सज्ज्ञानः। अन्वहमित्यव्ययं विभक्त्यर्थाद्यव्ययीभावः। अनश्च नपुंसका
दन्यतरस्यामिति समासान्तः अन्वकारि। अनुकृतः। तत्साम्यं प्रापितमित्यर्थः। अतएव मातत्वप्रसक्तेन तुल्यमोपमेयमवधपते ॥३७॥
वणिक्पथ इति। यत्र यस्यां पुरि वणिजां पन्थाः वणिक्पथस्तस्मिन्वणिक्पथे आपणे। अपूगाः पूगाः संपद्यमानानि कृतानि पूगकृ

यस्याश्चलद्वारिधिवारिवीचिच्छटोच्छलच्छङ्खकुलाकुलेन। वप्रेण पर्यन्तचरोडुचक्रः सुमेरुवप्रोऽन्वहमन्वकारि ॥३७॥
वणिक्पथे पूगकृतानि यत्र भ्रमागतैरम्बुभिरम्बुराशेः। लोलैरलोलद्युतिभाञ्जि मुहुर्न रत्नानि रत्नाकरतामवापुः ३८॥

तानि पुंजीकृतानि। श्रेण्यादयः कृतादिभिरिति समासः। श्रेण्यादिषु च्व्यर्थमिति च्व्यर्थता। अलोलद्युतिभाञ्जि स्थिरप्रभाणि रत्नानि लो-
लैश्चलैरतएव भ्रमागतैर्जलनिर्गममार्गगतैः भ्रमाश्च जलनिर्गमाः इत्यमरः। अम्बुधेर्मुक्तानि अपहृत्य अम्बुना शिरसीव। जलमात्र
तावशेषीति भावः। रत्नाकरतां नद्यापानत्वं प्रापितानि भावः। अम्बुराशेः प्राकारलंघनं धेपि भ्रमसंबन्धोक्तेरतिशयोक्तिः। तथा वपुर्णाः समुद्रा

टी.२
९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

अंत इति· यत्र पुरि अपां निधिः समुद्रः अम्भश्च्योतन्तीत्यम्भःश्च्युतो जलस्राविणः तएव फेनैः पिनद्धभासः पिहितकान्तयः अपि पूर्वान्नव
तेः कर्मणि क्तः· वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरिति पकारलोपः· कोमलान् उत्कृष्टान् रत्नराशीन् आतपेद्रागं शोषणार्थं निधा
तुमिवेति फलोत्प्रेक्षा· तल्पं द्वेष्टि धितल्पम्· तल्पं शय्याट्टदारेष्वित्यमरः· विभक्त्यर्थे यथीभावः· तरंगैरेव हस्तैर्वितस्तारया
मास प्रसारितवान्· अत्रातपेद्रागस्य तरंगहस्तसाध्यत्वेनोत्प्रेक्षारूपकयोः संकरः ॥३९॥ यत्सालमिति· सागरस्य महो

अम्भश्च्युतः कोमलरत्नराशीनपां निधिः फेनपिनद्धभासः· यत्रातपेद्रागमिवाधितल्पं विस्तारयामास तरंगहस्तैः
॥३९॥ यत्सालमुत्तुंगतया विजेतुं दूरादुदस्थीयत सागरस्य· महोर्मिभिर्व्याहतवांछितार्थैर्व्रीडादिवाभ्यासग
तैर्विलिल्ये ॥४०॥

र्मिभिः कर्तृभिः यत्सालं यस्याः प्राकारं प्राकारो वरणः शालो वप्रः स्यमरः· उत्तुंगतया श्रोन्नत्यगुणेन विजेतुमिवेत्यर्थः·
फलोत्प्रेक्षेयं व्यंजकाप्रयोगाद्गम्या· दूरादुदस्थीयत· उत्थितं· भावे लङ्· अभ्यासगतैः समीपगतैः समीपनिकटाभ्याससन्नि
कृष्टसनीडवदित्यमरः· व्याहतो वांछितोऽर्थो शालविजयरूपो येषां तैः विजयाक्षमैरित्यर्थः· अत एव व्रीडादिवेति ह्रीतेवेत्युत्प्रेक्षा-

विलिल्ये विलीनं· लीयतेर्भावे लिट्-अ
मससकस्याप्यविजिगीवांश्रीडानुद्दत्वा

त्सापेक्षत्वेनोत्प्रेक्षयोः संकरः ॥४०॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



भा.टी.न. कुतूहलेनेति· अंबुवहती अंबुवाहो मेघः कर्मणापरा· कुतूहलेनान्तःप्रवेशकौतुकेनेवेति हेतूत्प्रेक्षा· जवादुपेत्य यस्याः प्राकारभित्त्या सहसाभिह
१० तो निवारितः· अत एव बहिर्वर्षन् गर्जन् दुःखात् क्रन्दन्नेवेति श्लेषः· अम्बुवर्षव्याजेन भग्नाशः रोदिति अश्रूणि मुञ्चति न तु रुदि
रश्रुविमोचने लङ्· रुदश्च पंचभ्य इतीडागमः· अत्राम्बुवर्षव्याजेनोपादानस्योक्तौ [illegible] उत्प्रेक्षासापेक्षत्वात् संकरः॥५१॥ यदंगनेति· यस्यां

कुतूहलेनेव जवादुपेत्य प्राकारभित्त्या सहसाभिषिद्धः· रसन्नरोदीद्ध्रुवमम्बुवर्षव्याजेन यस्या वहिरम्बुवाहः॥५१॥ यदंगनारू
पसरूपतायाः कञ्चिद्गुणं भेदकमिच्छतीभिः· आराधितोऽद्धा मनुरप्सरोभिश्चक्रे प्रजाः स्वाः सनिमेषचिह्नाः॥५२॥ ॥·

यस्यामंगनानां रूपं सौन्दर्यमाकारो वा· रूपं स्वभावसौन्दर्यमाकारश्लेषयोरपीति विश्वः· तस्य सरूपतायाः सारूप्याद्भेदकं कंचिद्गुणं धर्म
मिच्छतीभिरपेक्षमाणाभिः· [illegible] अप्सरोभिराराधितः प्रार्थितो मनुर्मानुष्यसृष्टिकर्त्ता स्वाः स्वकीयाः
याः प्रजाः निमेषपक्ष्मपातरूपचिह्नं यावत्तत्कं तेन सह वर्त्तन्ता इति सनिमेषचिह्नाः तेन सहेति तुल्ययोग इति बहुव्रीहिः· चक्रे कृत
वानित्युत्प्रेक्षा तत्त्वेत्यद्धांजसा द्वयोरित्यमरः· अप्सरस्याभाविकानिमेषस्यास्मर· प्रार्थनाहेतुफलोत्प्रेक्षया द्वारकागमनानिमेषमानवभिन्न श्रीहरिः १०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



स्फुरदिति· यस्यां पुरि क्षणदासु रात्रिषु नार्यः स्फुरद्भिस्तुषारांशोश्चन्द्रस्य मरीचिजालैश्चन्द्रिकाभिर्विनिह्नुताश्छन्नास्तदेकरूपतापत्तेरदृश्यमाना इत्यर्थः· अत एव सामान्यालंकारः· सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता इति लक्षणात्· स्फाटिकानां स्फटिकविकाराणां सौधानां पंक्तीरारुह्य नभोगता देव्यो देवाङ्गना इव· देवशब्दस्य पचादित्वाद्दिवु द्युतिरिति पाठात् टित्वात् टिड्ढाणञित्यादिना ङीप्· अत्र सौधानामग्रहणादिंद्रकवत्वाद्(?) नभोलक्ष्यमाणाः स्त्रियः स्वर्वध्व इव रेजुरित्यर्थः· अत्र नभोगतत्वोत्प्रेक्षायाः पूर्वोक्तसामान्यसापेक्षत्वात् संकरः ॥ ५३ ॥ कान्तेन्दिति· यत्र पुरि

स्फुरत्तुषारांशुमरीचिजालैर्विनिह्नुताः स्फाटिकसौधपंक्तीः· आरुह्य नार्यः क्षणदासु यस्यां नभोगता देव्य इवाबभासुः ॥
॥ ५४ ॥ कान्तेन्दुकान्तोपलकुट्टिमेषु प्रतिक्षपं हर्म्यतलेषु यस्यां· उच्चैरधःपातिपयोमुचोपि समूहमूहुः पयसां प्रणाल्यः ॥

क्षपायां प्रतिक्षपं· विभक्त्यर्थेऽव्ययीभावः· कान्तानि रम्याणि इन्दुकान्तोपलानां चन्द्रकान्तमणीनां कुट्टिमानि बद्धभूमयो येषु तेषु· कुट्टिमं बद्धभूमिः स्यादित्यमरः· कुट्टिमोऽस्त्री निबद्धा भूरिति हलायुधः· हर्म्यतलेषु उपरिभागेषु उच्चैरुन्नताः प्रणाल्यो जलमार्गाः· द्वयोः प्रणाली पयसः पदव्यामित्यमरः· अधःपातिनोऽधश्चराः पयोमुचो मेघाः यासां ता अधःकृतमेघमण्डलत्वाद्धतानष्टिपाता अपीत्यर्थः· विरोधालंकारः· पयसाम्

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा.टी.त. रत्नाविति। यत्र पुरि गृहेष्वधि अधिगृहं विभक्त्यर्थेऽव्ययीभावः। गृहिण्यः कुलाङ्गनाः अनस्वरतौ रतिकाले क्रियादीपान्निशाम्य निर्वाप्य। रत्नानि निर्भि
२२ त्तीत इस्वादेशाभावश्छिन्नम्यः। जालागताभ्यो गवाक्षमार्गप्रविष्टाभ्यः। आलङ्गवाक्षश्चानाय इति विश्वः। वैदूर्यात् प्रभवन्तीति वैदूर्याणि बालवायजार
मणयः। वैदूर्यं बालवायजमित्यमरः। विदूरात्र्य इति ञ्य प्रत्ययः। अनाविदूराख्यो बालवायस्याद्रेशः पर्यायो वा। तत्र प्रथमितो वा। तेन वा

रत्नौ क्रिया यत्र निशाम्य दीपाञ्जालागताभ्योधिगृहं गृहिण्यः॥
बिभ्युर्विडालेक्षणभीषणाभ्यो वैदूर्यकुड्येषु शशिद्युतिभ्यः॥५५॥

तथा चाह रत्नसो प्रभवति न विदूरान्नगरात्। तत्र तु संस्क्रियत इत्याक्षेपः प्रयुक्तः। तदुक्तं। बालवायो विदूरं च प्रकृत्यन्तरमेव वा। न वै तत्रे
ति वैदूर्यजित्वरियद्युवा चरोति। तेषां कुड्येषु भित्तिषु संक्रान्ताभ्य इति शेषः। अत एव तत्प्रतिबिम्बापत्तावपि गल्भात्। विडालेक्षणवद्भीष
यत इति भीषणाभ्यो भयंकराभ्यः। नन्द्यादित्वात्कर्तरि ल्युट्। प्रत्यये टाप्। शशिद्युतिभ्यो बिभ्युः भीताः भीत्र्यादिति भावः। लिट्। अत्र
लक्षणा धारणाय दीपनिर्वापणेन केवलं तदस्तित्वः। प्रस्तुतभयं वोत्पन्नमित्यनर्थोत्पत्तिरूपो विषमभेदः। विरुद्धकार्यस्योत्पत्तिर्यत्रा २२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्यामिति· यस्यां पुरि गृहेषु अतिश्लक्ष्णतयात्वेभित्तिनामतिस्निग्धतया आलेख्यं चित्रं विधातुं निर्मातुमशक्नुवन्तो युवानः प्रति
बिंबिताङ्गाः स्वयं तासु संक्रान्तमूर्त्तयो रत्नभित्तीः सजीवचित्राः सचेतनचित्रवतीरिव चक्रुः इत्युत्प्रेक्षा· ॥४६॥ सावर्ण्येति· यस्यां पुरि
कलधौतधामस्तंभेषु हेमागारस्तंभेषु कलधौतं रूप्यहेम्नोरिति विश्वः· प्रतिमागतानां प्रतिबिंबगतानां सावर्ण्यभाजां तत्सावर्ण्याद्दृग्गृहीतभेदाना

४ सावर्ण्यभाजां प्रतिमागतानां लक्ष्यैः स्मरापाण्डुतयाङ्गनानाम्· यस्यां कपोलैः कलधौतधामस्तंभेषु भेजे मणिदर्पणश्रीः
॥[illegible]॥ यस्यामतिश्लक्ष्णतया गृहेषु विधातुमालेख्यमशक्नुवन्तः॥ चक्रुर्युवानः प्रतिबिंबिताङ्गाः सजीवचित्रा इव रत्नभित्तीः
॥४६॥

मित्यर्थः· अतएव सामान्यालंकारः· लक्ष्यं तं तूक्तं· अङ्गनानां स्मरपाण्डुतया लक्ष्यैर्विभिन्नवर्णत्वाद्देहेन गृह्यमाणैरित्यर्थः· कपोलैर्म
णिदर्पणानां स्फाटिकमुकुराणां श्रीरिव श्री [illegible] र्भेजे· आश्रिता इति निदर्शना [illegible] सामान्यप्रसाधकत्वेनोपात्तेनास्याः संकरः· ॥४७॥ ॥·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टि०८. शुकांगेति·यस्यांपुरिमुग्धांगनाःशुकांगवन्नीलोपलानीलमणयोमरकतानीत्यर्थः·उपलःप्रस्तरेमणाविति विश्वः·तैर्निर्मितानांगृहाणां
१२ देहल्योगृहद्वारशाखाधारदारूणि·गृहावग्रहणीदेहलीत्यमरः·तासांभासालिप्तेषुअलिन्देषुद्वारबहिर्भागेषु·प्रघाणप्रघणालि

शुकांगनीलोपलनिर्मितानांलिप्तेषुभासागृहदेहलीनां·॥
यस्यामलिन्देषुनचक्रुरेवमुग्धांगनागोमयगोमुखानि·॥९८॥

न्दावर्हिद्वारप्रकोष्ठकमित्यमरः॥गोःपुरीषंगोमयं·गोश्चपुरीषेइतिमयट्·तस्यगोमुखानिविलेपनानि·गोमुखंकुटिलाकारेवाद्यभांडेवि
लेपनइतिविश्वः·नचक्रुरेव·मरकतप्रभायाविलेपनभ्रान्त्येतिभावः·अतएवभ्रान्तिमदलंकारः·कविसंमतसादृश्याद्वस्त्वन्तरमति श्रीरामः·
र्यत्रसभ्रान्तिमानितिसर्वस्वलंकारलक्षणात्·९८॥
१२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



गोपानेति· यत्रपुरिगृहाणांगोपानसीषुवलभीच्छादनाधारेष्वित्यर्थः· आसुगोपानसीनुवलभीछादनेवक्रदारुणीत्यत्रपटलाधारंवंशपंजरं.
त्याहक्षीरस्वामी· क्षणमीषत्कालं· अत्यन्तसंयोगेद्वितीया· आस्थितानामासीनानांचन्द्रकोमेचकः· समौचन्द्रकमेचकावित्यमरः· तद्वतां
चन्द्रकिणांमयूराणां· आलंबिभिर्लंबमानैःकलापैर्बर्हैः· कलापोभूषणेबर्हेइत्यमरः· हरिन्मणयोमरकतानिगारुत्मतंमरकतमश्मगर्भहरि

गोपानसीषुक्षणमास्थितानामालंबिभिश्चन्द्रकिणांकलापैः॥
हरिन्मणिश्यामतृणाभिरामैर्गृहाणिनीध्रैरिवयत्ररेजुः॥५८॥

न्मणिरित्यमरः· तद्वत्श्यामैस्तृणैरभिरामाणिहरिततृणमयानीत्यर्थः· तैर्नीध्रैःपटलान्तैरिवरेजुः· वलीकनीध्रेपटलप्रान्तेऽथपटलंछदिरित्यमरः·
छादनपर्यायोपटलच्छदी· पीतस्वलाकाविनीवलीकनीध्रेछदेराधारोवंशपंजरोगोपानसीतिविवेकः· अत्रस्वहरिततृणावच्छन्नत्वेनाद्रिगुणक्रिया
निश्चितत्वान्नीध्रैरिवेतिजातिस्वरूपोत्प्रेक्षा॰॥५८॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा·टी·त·
१२
ध्रुवदिति·यावृः ध्रुवं स्तम्भलाउपरि स्थाप्य दर्वाधाराभूतानि स्तंभाग्र[redacted]येघृतैः ध्रुवन्तुलैस्तद्बृंहितैरिति विरोधः·अनुपमैरिति परिहारः·तु
लासाम्यस्तंभपीठ इति उभयत्रापि वैजयन्ती·वितानानामुल्लोचानां नामन्ताभिः पिनद्धैराछादितैरप्यविताने स्तद्बृंहितैरिति विरोधः·अथ स्पैर
स्पविरोधः·समस्तवस्तुसमद्वैरित्यर्थः·अस्त्रीवितानमुल्लोचो वा वितानं त्रिषु तुच्छ कमित्युभयत्राप्यमरः·विचित्रैरालेप्यश्रीहितैरपि सवित्रैस्त

ध्रुवन्तुलैरप्यतुलैर्वितानमालापिनद्धैरपि वाविताने:॥
रेजेविचित्रैरपि यामवित्रैर्महेर्विशालैरपि भूरिशालेः॥५०॥

सहितैरिति विरोधः·विचित्रैरद्भुतैरिति परिहारः॥आश्चर्यालेप्ययोश्चित्रमित्युभयत्राप्यमरः·विगताः शालाः भवनानि येषां तानि विशा
लानि शालागृहे तरुस्कन्धे शाखा गारे कशेषयोरिति विश्वः·तैर्विशालैरपि भूरिशालैर्बहुभवनैरिति विरोधः·विशालैः पृथुलैरित्यविरोधः·वि
शालं पृथुलं बृहदित्यमरः·वेः शालच्छङ्कटचावितिशालच्प्रत्ययः·रराजे·अपिरयं सर्वत्राविरोधे विरुद्धवदाभासादिरोधालंकारः·विरोधः· सो विरोधेपि विरुद्धत्वेन यद्वच इति काव्यप्रकाशे लक्षणात् ॥५०॥ श्रीहरिः·
१२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विटंकमयेति ॥ यस्यां पुरि निकेतनानां वेश्मनां वेश्मसद्मनिकेतनमित्यमरः ॥ कपोतान्पक्षिणः पालयतीति कपोतपाल्यो विटंकापरनामानः संभाव्य प्रसारिता दारुविशेषाः ॥ कपोतपालिकायां तु विटंकं पुन्नपुंसकमित्यमरः ॥ कर्मण्यपालिंगीकृतासु कृत्रिमपक्षिणां स्वात्ममयपक्षिणां पंक्तेः कर्मणि षष्ठी ॥ विटंकमयाक्रमितुमिच्छयाजिघृक्षयेत्यर्थः ॥ क्रमेः सन्नन्तात् प्रत्ययात्कात्प्रत्ययेन पः ॥ वस्तुतस्तु क्रमोऽनात्मनेपदनिमित्ते इडागमो न भवति ॥ आतिक्रमेरीत्यादिप्रतिषिद्धार्थेष्वनुपसर्गाद्वेति वैकल्पिकस्यात्मनेपदनिमित्तस्यानुपसर्गत्वस्य वैपक्षिकस्य वैपक्षिकस्य संभवात् ॥ आपतमानतया

विटंकमयाकृत्रिमपत्त्रिपंक्तेः कपोतपालीषु निकेतनानाम् ॥ ॥
मार्जारमप्यायतनिश्चलांगं यस्यां जनः कृत्रिममेव मेने ॥ ५१ ॥

निश्चलमंगं यस्य तं मार्जारं विडालमपि ॥ ओतुर्विडालो मार्जार इत्यमरः ॥ जनः कृत्रिमं कृत्रिमपक्षिनिर्हन्तं मेने न तु वास्तवमित्यर्थः ॥ ड्वितः क्त्रिः ॥ क्त्रेर्मम्नित्यमिति मम्प्रत्ययः ॥ अनेन कृत्रिमाकृत्रिमयोर्भेदे दुर्ग्रह इति शिल्पसातिशयोक्तिः ॥ अत्र कविकल्पितताद्रूप्यात् प्रतिमार्जारजनयोः कृत्रिमाकृत्रिमेषु विपरीतमतिवर्णनाद्भ्रान्तिमदलंकारः ॥ ५१ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा॰टि॰त॰ क्षितीति॰ यस्यां पृथिव्यां धूर्जनः क्षितौ प्रतिष्ठा यस्य सः भूमिप्रतिष्ठः॰ वंद्यं दिवि स्थितमिति भावः॰ तथापि मुखैरारविन्दैः अधश्चकारेति विरोधः स्वलावण्यमहि
२५ म्नाधरीकारेति परिहाराद्विरोधाभासोलंकारः॰ अतीतानि नक्षत्रपथमतीतनक्षत्रपथानि॰ अत्यादयः क्रान्ताद्यर्थे द्वितीययेति समासः॰ द्विगुप्राप्ता

क्षितिप्रतिष्ठोपि मुखारविन्दैर्वधूजनश्चन्द्रमधश्चकार॰॥
अतीतनक्षत्रपथानि यत्र प्रासादशृंगाणि मृषाध्यरोहत्॰॥
॥५२॥

पन्नेत्यादिना परवल्लिंगताप्रतिषेधः॰ प्रासादशृंगाणि मृषाध्यरोहत्॰ अधिरोहति स्म॰ अनधिरूढे बाधः कारणादिति भावः॰ रोहतेर्लुङ्॰ ।शल
इगुपधादनिटः क्स इति च्लेः क्सादेशः॰ अबाधः कारणवाक्यार्थस्य धूपविरोधादुपजीव्यवैयर्थ्ये हेत्वाभिसंकीर्णः काव्यलिंगभेदः॰॥५२॥ श्रीहरिः २५

CC-0. Digitized by eGangotri and MIDF- Delhi

रथ्या इति॰ यस्यां पुरि युवानो रथ्या राजमार्गीया इति हेतोः पताकाः प्राप्तवतीः उच्छ्रितध्वजा इत्यर्थः॰ अन्यत्र रथ्या इत्येवं पताकाः प्राप्तवतीः प्रसिद्धिं गता
इत्यर्थः॰ पताकावैजयन्त्यां च सौभाग्ये कर्ध्वजेपि च इति॰ हेतोः प्रकारादि समाप्तिषु इत्युभयत्राप्यमरः॰ विविक्ता विजना विमलाश्च इति हे
तोः रागं वर्द्धयन्ति॰ विविक्तौ पूतविजनौ विलुभयत्राप्यमरः॰ नमद्वलीका नम्रनिध्राः॰ वलीकनिध्रे इत्यमरः॰ अन्यत्र मध्ये वलयस्त्रिवल्याख्या म
ध्ये रेखा यासां ता नमद्वलीकाः॰ नम्रत्वश्चेति कम्प॰ वलिर्मध्यमरेखा वार्धकजीर्णे च हस्तादि इति वैजयन्ती॰ वलभीः कूटागाराणि॰ कूटागारन्तु वलभी

रथ्या इति प्राप्तवतीः पताका रागं विविक्ता इति वर्द्धयन्तीः ॥
यस्यामसेवन्त नमद्वलीकाः समं वधूभिर्वलभीर्युवानः ॥५२॥

इत्यमरः॰ वधूभिः समं सेवन्त॰ वधूसहिताः सेवन्त इत्यर्थः॰ अत्र वधूनां वलभीनां च प्रकृतानामेव धर्मसाम्येनौपम्यावगमात् केवलप्रकृतगोचरा तुल्ययो
गिता नश्लेषः॰ तत्र केवलप्रभेदे विशेषणस्यापि भिन्नत्वादनियमात्॰ यथाहुः॰ प्रकृताप्रकृतौ भयप्युक्तं वेकृत्य मात्रसाधर्म्यभेदोपि च भिन्नत्वे सर्वत्रा
ऐक्येनान्य इति प्रस्तुतानां तथान्येषां केवलं तुल्यधर्मतः॰ औपम्यं गम्यते यत्र सा मता तुल्ययोगिता॰ ॥५२॥५२॥५२॥ रामरामरामरामरामः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

सुगन्धितामिति॰ यत्र पुरि न यत्नः संस्कारः पूर्वो यस्यास्तामप्रतियत्नपूर्वामकृत्रिमां स्वाभाविकीमित्यर्थः॰ प्रतियत्नस्तु संस्कार इति वैजयन्ती॰ शोभनो
॥ मा॰ टि॰ ॥ गन्धो येषां तेषां भावस्तत्तां सुगन्धितां सौरभं गन्धस्येतीकारप्रत्ययः॰ विभ्रन्ति विभ्राणानि वानपुंसकेति नुमागमः॰ मधूनि मद्यानि कामिनीनां वक्त्रा
॥ ७५ ॥ णि च पुंसां प्रमोदाय प्रीत्यै आमोदकर्मणो वासनाधानस्य व्यतिहारं परस्परकारणमीयुः॰ अन्योन्यं वासयामासुरित्यर्थः॰ इत्थंलिङ्॰ अत्रापि मर
ति

सुगन्धितामप्रयत्नपूर्वां विभ्रन्ति यत्र प्रमदाय पुंसां॰ ।
मधूनि वक्त्राणि च कामिनीनामामोदकर्मव्यतिहारमीयुः
॥५४॥

धूनां वक्त्राणां च प्रकृतत्वात्तत्पूर्वक एव तुल्ययोगिताभेदः॰ तेन मधूनां मधुवासितवधूवदनवासितगण्डूषया मधुपानं च वस्तु व्यज्यते॰ एतेन व
निरातंकंभोगाः पौरा इति गम्यते॰ ॥५४॥ ॥ श्रीहरिः ॥
॥ ७५ ॥

CC-0. Digitized by eGangotri and MIDF- Delhi

रतान्तर इति । यत्र पुरि गृहान्तेषु वितर्दयो विहारवेदिकाः स्याद्वितर्दिस्तु वेदिका इत्यमरः । तासां निर्व्यूहाः मत्तवारणाख्या उपाश्रयाः ।
निर्व्यूहो मत्तवारण इति वैजयन्ती । तेषां विटंकाः उपरितन्यः कपोतपालिकास्त एव नीडाः कुलायानि यस्य सः कुलायो नीडमस्त्रिया
मित्यमरः । वयसां भुजकसारिकादिपत्रिणां गणाः वयः पक्षिणि बाल्यादाविति विश्वः । रतान्तरे अंगनानां वितर्दिषु रमणानामिति भावः ।
रतानि रतिकूजितानि शृण्वन् । अन्ते समीपे वसन्त इति अन्तेवासिनः शिष्याः । छात्रान्तेवासिनौ शिष्य इत्यमरः । शापवासवासिष्वकाल

रतान्तरे यत्र गृहान्तरेषु वितर्दिनिर्व्यूहविटंकनीडः । रतानि शृण्वन् वयसां गणोन्तेवासित्वमाप स्फुटमंगनानाम् ॥
॥५५॥ छन्नेष्वपि स्पष्टतरेषु यत्र स्वच्छानि नारीकुचमण्डलेषु । आकाशसाम्यं दधुरंबराणि न नामतः केवलमर्थतोपि ॥

द्रत्नलुक् । तेषां भावस्तत्त्वमवाप । समीपे प्रतिशब्दं यथाश्रुतमुच्चारणादेवोत्प्रेक्ष्यते ॥ अत एव स्फुटमिति व्यंजकप्रयोगः ॥५५॥ छन्नेष्विति ।
यत्र पुरि छन्नेष्वाच्छादितेषु । वा परान्ते स्मादिनावैकल्पिको निपातः । स्फुटतरेषु स्फुटतरं लक्ष्यमाणेष्वित्यर्थः । नारीकुचमण्डलेषु स्वच्छानि स्फटिकादिव इति
देधायकानि अम्बराणि वस्त्राणि केवलं नामतो नाम्नैवाकाशसाम्यं न दधुः । अम्बरं वाससि व्योम्नीति विश्वः । किन्तु अर्थतोपि अर्थक्रिययापि
तत्साम्यं दधुः स्वयमपि सूक्ष्मत्वमव्यवधायकत्वमिति तं दृष्ट्यादिमूर्त्तान्तरगमविघातीत्वमित्यादिनापि साम्यं दधुरित्यर्थः । उपमालंकारः ॥५६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस्यामिति· यस्यां पुर्य्यामजिह्मा अवक्राः अन्यायरहिताः इत्यर्थः· आचारेण महतीं वृत्तिमजिह्मामसरलां तथेति स्मरणादिति भावः· जिह्मं कपटं वक्र
मा·टि·न· योरिति विश्वः· महतीं सीमानं राजकल्पितक्षेत्रमानमर्यादां कुलागतां गुरुस्थितिं अत्यजन्तः अपङ्काः अकर्दमानि पापाश्च· पंकः कर्दमपापयोरिति विश्व
२६ अः· अतिमात्रं आयतिरायामः उत्तरकालश्च येषां ते· आयतयः· आयतिस्तूत्तरकाले संयमायामयोरपीति नानार्थः· द्वयेऽपि रूपा अपि· प्रथमवयसे
स्वादिनाजस्रविभाषा सर्वनामसंज्ञा· विनीतमार्गाः सुशिक्षिताचाराः पक्षे परिष्कृतवर्त्मानः· अजातस्खलनैर्जनैः यानादिप्रतियातोऽविकल्पवर

य

यस्यामजिह्मा महतीमपङ्काः सीमानमत्यायत योऽत्यजन्तः ॥ जनैरजातस्खलनैर्न जातु द्वयेऽप्यमुच्यन्त विनीतमार्गाः ॥५७॥ परस्परस्पर्धिपरार्ध्यरूपाः
पौरस्त्रियो यत्र विधाय वेधाः ॥ श्रीनिर्मितिप्राप्तघुणाक्षरैकवर्णोपमावाच्यमलं ममार्ज ॥५८॥

लं च येषां तैर्जनैर्जातु कदाचिदपि नामुच्यन्त न सक्ताः· न कस्य
चिदिति लीकृता इत्यर्थः· अत्र मार्गशुद्धस्य साधर्म्यादेकेनालावलं विफलं द्वयवदेकशब्देनार्थद्वयप्रतीतेर्द्वयानामपि मार्गाणां प्रकृतत्वाच्च केवलप्रकृतविषयोऽयं श्ले
षः· श्लेषस्यापि भिन्नत्वान्ननु त्ययोगिता· ॥५७॥ परस्परेति· यत्र पुरि परस्परस्पर्द्धिपरार्ध्यं हृदयाकर्षकं यासां संघर्षिणी वरेण्या रूपाणि सौन्दर्या
णि यासां ताः· रूपं स्वरूपे सौन्दर्यं इति विश्वः· पुरे भवाः पौरास्ताः स्त्रियः पौरस्त्रियः· स्त्रियाः पुंवदित्यादिना पुंवद्भावः· विधाय निर्माय वेधाः स्रष्टा श्रियो ल
क्ष्मीदेव्याः निर्मित्या निर्मीलनप्राप्तं यद्घुणेन वज्रकीटेन क्षतस्योत्कीर्णस्यैकवर्णस्योपमया सादृश्येन वाच्यमपवादं तदलमत्यर्थं यथा भवति तथा म
मार्ज· घुणाक्षरवत्काकतालीयवत् कश्चिद्दैवतः सौन्दर्यशिल्पं न कौशलमिति यशः क्षालितवानित्यर्थः· अनयावासितया यो नृपो रसस्त्री तां रमास्त्री मान

श्रीहरिः
२६

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षुभ्यमिति॰ यदन्तःकरणेन क्षुभ्यमभ्यस्तं ममेदं भूयादितिभूयोभूयः संकल्पितमित्यर्थः॰ कल्पयन्ति संकल्पितार्थानितिकल्पाः कल्पाइत्युपपदं
यावत्तेषुं येषां ते कल्पोपपदाः वृक्षाः कल्पवृक्षास्तदेव फलन्तिनिष्पादयन्ति॰ फलनिष्पत्तावितिधातोर्लट्॰ हेनलस्यांपुरमध्यूषुषोयस्या
मुषितवतः॰ उपान्वध्याङ्वस इतिकर्मत्वम्॰ भाषायां सदवसश्रुवइतिक्वसुप्रत्ययः॰ जनस्ययाः संपदो भवन्॰ तामनसोऽपभूमिर्विषयमभूमिरिति॰
क्लिनुवत्कथमितिभावः॰ गृहेगृहेकल्पवृक्षसंबन्धातिशयोक्त्यापौराणांदेवेन्द्रभोगोव्यज्यते॰ इह कल्पइत्युपपदं तस्मिन्नेकदेशोपेयामिति

क्षुभ्यं यदन्तःकरणेन वृक्षाः फलन्ति कल्पोपपदास्तदेव॰ अध्यूषुषो याम भवज्जनस्य याः संपदस्ता मनसोऽप्यभूमिः ॥५९॥
कलाधरानः सकलाः स्वभाभिरुद्गासयन्सोधसितामिरासाः॰ यां देवतीजानिरियेष हातुं न रोहिणीयोनवरोहिणीमः ॥६०॥

याख्यानेहिरण्यपूर्वकशिपुमित्यादिवद्याख्यंवदन्तदोषावकाशः ॥५९॥ कलाइति॰ सकलाः समग्राकलाश्चतुःषष्टिविद्याः षोडशभागाश्च
दधानः॰ कलाशिल्पकालभेदेकलातुषोडशोभागइतिवामरः॰ सुधयालिप्तसौधंतद्वत्सितामिः कलाभिः स्वभामिरशादिशाउद्भासयन्॰ रेवती
ककुप्मिकन्यातृषमंवजायायस्यसः॰ रेवतीजानिः जायायानिङ् इतिसमासान्तोनिङादेशः॰ लोपोव्योर्वलीति यलोपः॰ रोहिणापाः अपसंपु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



बाणेति॰ यत्र पुरि बाणाहवे बाणासुरयुद्धे व्याहताक्षयं नीता शंभुशक्तिर्येन तस्य हरेर्विजयिनो जनार्दनस्यासत्तिं प्रत्यासत्तिमासाद्य पुत्रत्वं प्राप्येत्यर्थः॰ शरीरि-
णा विग्रहवतानत्वनंगेनेति भावः॰ जेतार एव जैत्रा जयनशीलाः त॰ जन्यात्र्यज्ञादित्वाद् ण॰ तेशरा यस्य तेन मकरध्वजेन कामेन प्रद्युम्नरूपेणेति भावः॰ निः-
शंकं निर्भीकमूषे उषितं शंका भयवितर्कयोरिति शाश्वतः॰ वसनिवासे भावे लिट् वचिस्वपीत्यादिना संप्रसारणं॰ अत्र शंभुशक्तिव्याघातपदार्थस्य

बाणाहवव्याहतशंभुशक्तेरासत्तिमासाद्य जनार्दनस्य॰ शरीरिणा जैत्रशरेण यत्र निःशंकमूषे मकरध्वजेन॰ ॥६१॥ निषेव्यमाणे
न शिवैर्मरुद्भिरध्यास्यमाना हरिणा चिराय॰ ।उदश्मिरत्नांकुरधाम्नि सिंधावाह्लास्त मेरावमरावतीया॰ ॥६२॥ ॥॰

विशेषणगत्या निःशंकनिवासहेतुत्वोक्तेः काव्यलिंगभेदः॰ पुराकिल भगवान्मकरवत्सलो धूर्जटिरोषप्रमाणाबाणाभियोगिनं हरिमभिपुत्र्यानिर्जित
इति पौराणिकाः कथयन्ति॰ ६१॥ निषेव्यमाणेनेति॰ शिवैर्मरुद्भिर्मन्दमारुतैर्यत्र शिवैर्हद्वैर्मरुद्भिर्निषेव्यमाणेन हरिणा कृष्णेन शक्रेण वा
ध्यास्यमानाधिष्ठीयमाना उदश्मिरत्नांकुराणां धाम्नि स्थाने॰ एकत्र रत्नाकरत्वादन्यत्र रत्नसानुत्वाच्चेति भावः॰ सिन्धौ स्थितेति शेषः॰ या पूर्वमेरौ
स्थिताममरायस्यामस्तीति अमरावतीमिन्द्रनगरीं॰ मतौ बह्वचो नजिराद्यीनामिति दीर्घः॰ संज्ञायामिति वत्वं॰ आह्लास्त स्पर्द्धया आहतवती॰ अमरावती-
मनुवकारेत्यर्थः॰ ह्वयतेर्लुङ् स्पर्द्धायामाङ् इत्यात्मनेपदम्॰ लिपिसिचिह्वश्च॰ आत्मनेपदेष्वन्यतरस्यामिति च्लेरङ्॰ भावपक्षे सिजादेशः॰ अत्र प्रथम



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्निग्धेति· स्निग्धं यदञ्जनं तद्वन्नेन श्यामरुचिः· सुवृत्तः सद्वृत्तिः· सुष्ठु वर्तुलश्च· त्रयाणां लोकानां समाहारस्त्रिलोकी· तद्धितार्थेत्यादिना स
मासः· संख्यापूर्वो द्विगुरिति द्विगुसंज्ञा· अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यते इति स्त्रीत्वं· द्विगोरिति ङीप्· तस्यां तिलको भूषणभूतो महाहरे
व विशेषको वा तिलक इवेत्यर्थः· इवद्वयं यथाशब्दविस्मृतेश्चागमनात्· तमालपत्रतिलकचित्रकाणि विशेषकाः· द्वितीयं च तुरीयं च न स्त्रिया।

स्निग्धाञ्जनश्यामरुचिः सुवृत्तो वध्वा इवाध्वंसितवर्णकान्तेः॥
विशेषको वा विशिशेष यस्याः श्रियं त्रिलोकीतिलकः स एव·
॥[illegible]॥

सितवर्णः· अध्वंसिता वर्णानां ब्राह्मणादीनां कान्तिरोज्ज्वल्यं यस्यास्तस्याः पुरः अन्यत्र अध्वंसितो वर्णो गौरादिः कान्तिर्लावण्यं च यस्या
स्तस्याः· वर्णो द्विजादौ शुक्लादौ इत्युभयत्रामरः· वध्वा इव श्रियं विशिशेष विशेषितवान्· अनेके वा शब्दा उपमोपमेयोक्ते· वा शब्दमात्रसादृश्यात् श्ले
ष इत्यन्ये· श्लेषोपमेत्याह दंडी·॥६३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा·टी·९· तामिति· अतुलप्रतापः स हरिस्तां पूर्वोक्तां पुरीमीक्षमाणः पुरस्तात्पूर्वस्यां दिशि· सप्तम्यर्थे तसिः प्रतोलीं रथ्यां· रथ्या प्रतोली विशिखेत्यमरः· प्राप
१८ न् प्राप्तवान्· तुडिपुषादित्यादिना ङेरङ्गदेशः· वज्राणां तोरणप्रासादाधिगतहीरकादिमणीनां प्रभाभिरुद्भासिनी सुरायुधश्रीरिन्द्रचापर

तामीक्षमाणः स पुरं पुरस्तात्प्रापत्प्रतोलीमतुलप्रतापः·
वज्रप्रभोद्भासिसुरायुधश्रीर्या देवसेनेव परैरलंघ्या·॥६४॥

लक्ष्मीर्यस्यां सा· इह वज्रग्रहणं मणिमात्रोपलक्षणं· अन्यथा इन्द्रायुधसाम्यासम्भवादिति· अथवा वज्रस्य कुलिशस्य प्रभाभिरुद्भा श्री हरिः·
सिनी सुरायुधानामितरदेवतायुधानां श्रीर्यस्यां सा· वज्रोऽस्त्री हीरके पवावित्यमरः· या प्रतोली देवसेना सुरचमूरिव परैः शत्रुभिरलंघ्या १८
दुर्धरा·॥६४॥

CC-0. Digitized by eGangotri and MIDF- Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रजा इति। अरविन्दनाभेर्विष्णोरंगात्प्रजा इव। यतो वा इमानि भूतानि जायन्त इति श्रुतेरिति भावः। शम्भोर्जटाजूटतटादाप इव गंगाजलानीव विधातुर्मु
खात् श्रुतय इव। अथ मुराजितोर्ध्वजिन्यः पुरान्निरीयुः निर्गताः मालोपमेयम्॥ ६५॥ श्लिष्यद्भिरिति। अन्योन्येषां मुखाग्रेषु संगेन स्खलन्तः स्खलीनाः क

प्रजा इवांगादरविन्दनाभेः शम्भोर्जटाजूटतटादिवापः॥ मुखादिवाथ श्रुतयो विधातुः पुरान्निरीयुर्मुरजित्ध्वजिन्यः॥ ६५॥
श्लिष्यद्भिरन्योन्यमुखाग्रसंगस्खलत्खलीनं हरिभिर्विलोलैः॥ परस्परोत्पीडितजानुभागा दुःखेन निश्चक्रमुरश्ववाराः॥ ६६॥

ख
विका यस्मिन्कर्मणि तद्यथा तथा। कविका तु खलीनोऽस्त्री इत्यमरः॥ श्लिष्यद्भिः संश्लिष्यद्भिर्विलोलैर्मुहुश्चलद्भिर्हरिभिस्तुरंगैः करणैरश्वा
न्वारयन्तीत्यश्ववाराः अश्वारोहाः परस्प[illegible]त्पीडितजानुभागाः सन्तो दुःखेन निश्चक्रमुर्निर्जग्मुः। इति स्वभावातिशयोक्त्या संकरः॥ ६६॥
रैंगा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा.टी.त.
१९

निरन्तरालइति। तमसा तिमिरेणेव प्राणभृतां गणेन प्राणिवर्गेण कर्त्रा निरन्तरालेऽपि पूर्वं स्वेनैवातिसंकटेऽपि पथि संप्रति दूरं दूरत एव विमुच्यमाने सति एकत्र दीपभयादन्यत्र द्विपभयाच्चेत्यर्थः। तेजोमहद्भिर्बलाधिकैः प्रभासंपन्नैश्च। तेजो बलं प्रभा तेज इति शाश्वतः। दीपैर्द्विपैरिवासंबाधमसंकीर्णमयां बभूवे जग्मे न त्वबाध्यैर्विरूढमिति भावः। अयगतौ भावे लिट्। दयायासश्चेत्याम्प्रत्ययः। स्वतेजसैव दूरोत्सारिततमस्के पथि दीपा इव तथोत्सारितप्रा

निरन्तरालेऽपि विमुच्यमाने दूरं पथि प्राणभृतां गणेन। तेजोमहद्भिस्तमसेव दीपैर्द्विपैरसंबाधमयांबभूवे ॥ ६७ ॥ शनैरनीयंत रयात्पतन्तो रथाः क्षितिं हस्तिनखादखेदैः ॥ सयत्नसूतायतरश्मिभुग्नग्रीवाग्रसंसक्तयुगैस्तुरंगैः ॥ ६८ ॥ ६८ ॥ ६८ ॥ ०॥

णिके पथि निर्गलं दीपाः प्राप्नुयुरित्यर्थः। तमसीति सप्तम्यन्तपाठे तु तमसः प्रथुपमाने ... द्विपागमनात् पथ इव तमसो दीपागमनात् प्राणिवर्गेण निरन्तरालत्वं पश्चान्मुच्यमानत्वं न वक्तुं भवतीत्युपमानोपमेययोर्वैरूप्यं स्यात्। तृतीयान्तपाठे तमसः प्राणिवर्गोपमानत्वेन तत्सारूप्यसार्थक्यात् स एव साधीयान् इत्यलंकारिकाणां पंथाः ॥ ६७ ॥ शनैरिति। रयात्पतन्तो धावन्तो रथाः सयत्नैः सूतैः सारथिभिः। सूतः क्षत्ता च सारथिरित्यमरः। आयताः आकृष्टा येरश्मयः प्रग्रहाः किरणाः प्रग्रहो रश्मिरित्यमरः। तैर्भुग्नेषु प्रह्वेषु ग्रीवाणामग्रेषु संसक्ताः युगाः युग्माः स्कन्धवाह्यदारुविशेषा येषां तैरतएवाखेदैः ... थमेस्तु

श्री:७
१९

CC-0. Digitized by eGangotri and MIDF- Delhi

माघद्वितीयस्सर्गः·
॥श्रीः॥द्वितीयसर्गोयम्माघस्य॥

माघ महाकाव्य द्वितीय सर्ग·

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा० टी० श्रीगोपीशो जयतु॥ ॥अथास्मिन्सर्गे मंत्रवर्णनाय बीजमावपति॥ यियक्षमाणेनेति। अथेन्द्रसन्देशाश्रवणानन्तरं यियक्षमाणेन यष्टुमिच्छता यजतेः सन्न
१ न्ताल्लटः शानच्। पार्थेन पृथापुत्रेण युधिष्ठिरेण तस्येदमित्यण्। अन्यथाद्व्यचः स्त्रीभ्यो ढगिति ढक् स्यात्। आहूतः आकारितः ह्वयतेः कर्मणि क्तः संप्रसारणाद्दीर्घो
न्तथा। अभिचैद्यं शिशुपालं प्रतिलक्षणेनाभिप्रती आभिमुख्ये इत्यव्ययीभावः अभिरभागे इति कर्मप्रवचनीयत्वे तु द्योगे द्वितीया वा। प्रतिष्ठासुः प्रतिष्ठातुमिच्छुः तिष्ठतेः सन्नन्तादुप्रत्ययः मुरं द्विषन्मुरारिः द्विषोऽमित्र इति प्रत्ययेन लोकेत्यत्र द्विषः शतुर्वा वचनमिति वैकल्पिकी षष्ठीप्रतिषेधः। कार्यद्वयेन सुरकार्यसुहृत्कार्य
शि रूपेणाकुलो प्रतिसेवावश्यकत्वाद्द्वयोः सन्देहानासीत्। अतो मंत्रस्यायमवसर इति भावः॥ १॥ एवं मंत्रबीजमन्देहमुपन्यस्य मंत्रो चितं देशागमनमाह। गुरुकाव्येति

यियक्षमाणेनाहूतः पार्थेनाथ द्विषं मुरः॥ अभिचैद्यं प्रतिष्ठासुरासीत्कार्यद्वयाकुलः॥ १॥ गुरुकाव्यानुगां बिभ्रच्चान्द्रीम
भिनभः श्रियम्॥ सार्धमुद्धवसीरिभ्यामथासावासदत्सदः॥ २॥ रामायनमः॥

व्येति। अथ सन्देहानन्तरम्। असौ हरिः अभिनभः आकाशं प्रति पूर्ववदव्ययीभावः। कर्मप्रवचनीयत्वे द्वितीया वा। गुरुकाव्यौ बृहस्पतिशुक्रौ अनुगावनुयायिनौ यस्यास्तां
गीष्पतौ धिषणो गुरुरित्यमरः॥ शुक्रो दैत्यगुरुः काव्य इत्यमरः। चन्द्रस्येमां चान्द्रीं श्रियं बिभ्रत्। अत्रश्रीतुल्यां श्रियमिति निदर्शना भेदः॥ उद्धवसीरिभ्यां सह उद्धव
रामाभ्यां सार्धं सदः सभां सभा समासदत्। आगमत्। राजसदस इत्यर्थः। प्रासादतुल्यादिति भावः। सदेर्लुङि पुषादित्वाच्च्लेरङादेशः। अत्र यमकः। शिशुपालवधे समारुह्य प्रासादवरं हेग रापः
न्तः। अरापे निष्ठ्यालाकेवामंत्रय द्रावमावितम्॥ २॥ जाज्वल्यमानेति। जगतः शान्तये अन्तः पुरुवार्ष्णेयसुपेयुषी मिलिता जाज्वल्यमानाभ्यत्यन्तं ज्वलन्ती। धातोरेका १

शि २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



वोह्लादेः क्रियासमभिहारे यङ्। अतोलन्दुक्नूनिजादेशः तपू॥ असौनराः पुरुषएवशिखिनोऽग्नयस्तेषांत्रयी द्विग्री ष्पांतयस्यायजादेशः। दिक्षुराजिन्या
दिनाऽग्निपुरसभाः आस्थानीसैववेदीः वेदिः परिष्कृता भूमिरित्यमरः॥ तस्यांसभावेद्यां व्यद्योति ष्टदीप्यतेस्म द्युत दीप्तौ लुङि तिलुङ् रूपकालङ्कारः॥ ३॥ रत्ने
तिरत्नानांस्तम्भाइति षष्ठीसमासः क्षीरोदपर्यवशानात्॥ विकारार्थत्वात् तेषुसंक्रान्तप्रतिमाः संक्रान्तप्रतिबिम्बाः प्रतिमानं प्रतिबिम्बं प्रतिमेत्यमरः॥ ते
अयएकाकिनोऽसहायाअपि एकादाकिनिश्चासहायेत्याकिनिप्रत्ययः॥ परितोऽभितः सर्वतः पर्यभिभ्यांचेतितसिल्प्रत्ययः। सर्वसर्वाभयार्थेव

जाज्वल्यमानाजगतः शान्तये समुपेयुषी॥ व्यद्योतिष्टसभावेद्यामसौनरशिखित्रयी॥ ३॥ रत्न
स्तंभेषुं क्रान्तप्रतिमास्तेचकाशिरे॥ एकाकिनोपिपरितः पौरुषेयवृताइव॥ ४॥ ॥
सं

नेमानाम्यामिष्यते। पौरुषेयैः पुरुषप्रतिबिम्बभूयस्त्वादुरुषसमूहेन वृताइव तेनुत्प्रेक्षा वकाशिरे। उक्तसादृश्यकिकारसमूहेन कृतेषिवित्रकस्मात् तिष्ठेत्प्रस
यः। एतेन विजनत्वमुक्तम्॥ यद्यपिनिस्तम्भेऽस्मिंवाक्षेत्र निर्भित्यंतरसंस्पर्शयेप्रासादाग्रेतत्रापेवामंत्रयद्राविभावितेपितिकामन्दकीये मन्त्रक्षूम्मे
स्त्र॥ म्यप्रावृत्यनिषेधोदृश्यते॥ तथापि। तस्यापिविजनत्वोपलक्षणत्वाददोषइतिभावः॥ ४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा० टी० २ अध्यासामिति। अमीत्रयो यानि उन्नत हेमपीठानि आसनानि अध्यासायासुः अधितिष्ठन् येषु पविष्टा इत्यर्थः॥ अधीवीङ्स्थासां कर्मेति कर्मत्वम्॥ आसउपवेशने दयायासश्चेति प्रत्ययः। कृञ्चानुप्रयुज्यते लिटीत्यस्मेरनुप्रयोगः। स्पेत्यिकृञ्त्रएवेति नियमादस्तेर्नाम्ने नेपदम्॥ तेः पीठैः के सरिभिः सिंहैः कान्तानां त्रिकूटाचलस्य शिखराणां उपमासादृश्यं उहेउ टावहे कर्मणि लिट्संप्रसारणं च। शिशिकूटान्यस्येत्यन्वर्थसंज्ञा कूटो ऽस्त्री शिखिरं शृङ्गमित्यमरः। उपमालंकारः॥५ गुरुद्वयोति। अथोपवेशानन्तरं विवक्षेदिति विवक्षणोरकौ कर्तरि लुङि तस्यानोदेशो ऽसनोश्च प्रतिषेधो वेकव्य

सा अध्यामासुरुन्नतहेमपीठानि यान्यमी॥ तैरूहे केसरिक्रान्तत्रिकूटशिखरोपमा॥ ५॥ गुरुद्वयाय गुरुणो रुभयोरर्थकार्ययोः॥ हरिर्विप्रतिषेधत्नमाववक्ष्ये विचक्षणः॥ ६॥ द्योतितान्तःसभैः कुन्दकुड्मलाग्रदन्तः स्मितैः॥ स्नपितेवाभवत्तस्य शुद्धवर्णा सरस्वती॥ ७॥

इति विवक्षिङ्स्यानादेशाभावः। हरिः गुर्वोः रुद्ववामयोः पितरजेष्ठभ्रात्रोर्द्वयाय द्वाभ्यां गुरुभ्यामित्यर्थः। गुरुणोर्महतोरुभयोः कार्ययोः पूर्वो क्तयोः तं प्रतिषेधं विरोधमाववक्षे आख्यातवान् तुल्यबलविरोधो विप्रतिषेधः॥ द्योतितेति कुन्दमाद्यः धवः पुष्पविशेषः माध्यंकुन्दमित्यमरः कुन्दकुड्मलाग्रदन्तः आग्रानमुखकुड्मलयुदृपवराहे मुखरिति आग्रेणतु पूर्वपदवक्ष्यी हि सकासान्तेवैभापिको दयोदेशः तस्य ह रौसर स्मितैः अन्तः प्रधानां सभां सभाभ्यन्तरमित्यर्थः॥ सद्योतितान्तः प्रकाशितायैस्तैः स्मितैः स्नपितेव क्षालितेव स्नातेत्याक्रसौ अत्रिहि सादिनो ऽवकल्पितां हस्वः॥ शुद्ध

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



त्या कर्णाभ्युदे स्नानहेतुकत्वमुत्प्रेक्ष्यते स्मितपूर्वाभिभाषी हरिरिति भावः ॥ ७ ॥ कार्यविप्रतिषेधं निवेद्य स्वप्रहम्ममावेदयिष्यन् । पर्यालीन [illegible]नितां
नावत्य रिहरति । भवादीति । भवाज्ञिरां प्रथमप्रस्तावो अवसरप्रदानाय प्रसज्ज्येनाये त्यर्थः । नोस्माकं वाच्या सिद्धान्तो स्यानार्थमुच्यन्ते न तु सिद्धान्तेन इत्यर्थः
तथाहि पूर्वरङ्गं ते स्मिन्निति पूर्वरङ्गो नाट्यशालातस्तु कर्माणि पूर्वरङ्ग इति दशरूपके । अतः अर्थात्पूर्वरंगो नाम रंगप्रसाधनाख्यं रंगविघ्नशान्त
रा०१ कारीनां क्षपाटनीतवादित्रा[illegible]धने कार्यावाधिन्निर्दिष्टो नाट्यादौ कर्त्तव्यकर्मविशेषः ॥ उक्तं वसन्तराजीये यन्नाट्यवस्तुनः पूर्वं रंगविघ्नोपशान्तये कु

भवद्गिरामवसरप्रदानाय वचांसि नः ॥ रामाय नमः ॥
पूर्वरंगं प्रसंगाय नाटकीयस्य वस्तुनः ॥ ८ ॥ रामाय नमः ॥

शीलवाः प्रकुर्वन्ति पूर्वरंगः प्रकीर्तितः इति सः पूर्वरंगः नाटके भवतां नाटकीयं तत्र [illegible]र्पूर्वमित्यर्थः । तृत्तं वस्तुनः तस्य वस्तुन इति दत्तस्य प्रसंजनाय प्रवर्त्तनायेति
यावत् । अतः प्रथमवादो न दोषायेति भावः । पूर्वरङ्गः प्रस्तावनेति रंगराजस्तद्विन्यं पूर्वरंगे विधाय यदास्तु कारो विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्था
पयेन्नटः ॥ प्रथमं पूर्वरंगस्ततः प्रस्तावनेति च । आरंभे सर्वनाट्यानां एतत्सामान्यमिष्यते । इति दशरूपकोक्तविरोधादिति ॥ अत्र हरिवाक्य पू
र्वरंगयोः प्रसंभवकत्वरूपसामान्यस्य वाक्ययमेन शब्दान्तरेण प्रतिपत्तिर्दर्शयतीति वस्तूपमालंकारः क्षराणां तु क्रमः ॥ ८ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



संप्रति स्वमतमाह॥ करदीति। दिग्गांजिगीषुर्जेयनशीलैः नरीजिस निर्म्पः करपु॥ कृद्योगात्कर्मणि षष्ठी। आत्मभिर्भीरमादिभिः करदाषष्ठभागप्रदाः भागधेयो बलिः करइत्यमरः। अकरदांकरदाः संपद्यतेतथाकृताः करदीकृताः भूपालाः येन सतथोक्तः। वशीकृतराजमंडल इत्यर्थः॥ अभूततद्भावे संपद्यकर्तरिच्चि ४॥ ततस्तकुर्यादिश्विरु स्म्येतिगतिसंज्ञायांकुगतिप्रादयइतिनित्यसमासः। तपसः सुतोधर्मपुत्रः तपस्त्वान्द्रायणादौस्याद्धर्म लोकान्तरेपिवश्लितिविश्वः। अस्माद्विनाप्यस्मानिविनापीत्यर्थः॥ एष्वस्मिततोपादिनान्ततीयाविकल्पान्मुक्षेपञ्चमी। इज्यायैयागायग्रजयजोर्भावे क्यप्राबचिस्वपियजादीनांकितीतिसंप्रसारणम्॥ नमः स्वस्तीत्यादिनाचतुर्थी। अलंसमर्थोभूष्णुर्भवनशीलः। भूष्णुर्भविष्णुर्भविताइत्यमरः। ग्लाजिस्थ

करदीकृतभूपालोभ्रातृभिर्जितवैरिदिग्ग्रामः॥ विनाप्यस्मदलंभूष्णुरिज्यायैतपसःसुतः॥९॥ उज्जिहानस्यपरोनो

पेक्ष्यःपथ्यमिच्छता॥ ॥समौहिशिष्टैरामातौवर्त्स्यन्तावामयःसच॥१०॥ श्रीकृष्णायनमोनमः॥ ॥

श्चग्स्नुरितिग्स्नुप्रत्ययः। गित्वाद्गुणाभावे अतोजैश्चपाद्वैककार्यानयशकाश्चेति भावः॥९॥ ननुयत्तजैत्रपाञायांउभयानुसरणंतत्राह। उज्जि घमानइति। उज्जिहानो वर्धमानः उदोऽङ्त्रहंकर्मणित्यात्मनेपदम्। यथोऽनपेतंपथ्यंहितमारोग्यंवेश्मतात्कसेतिश्लोकः। नोपेक्ष्यः। नोदासीनेन द्र ष्टव्यः। हिंयस्माच्छत्रुःस्यन्तीवर्धिष्यमाणी। लट्। सदेतिसद्वादेशाःत्रृ त्रृःस्यसमनोरितिविभाषापरस्मैपदम्॥ नवृद्ध्याःस्वतजृर्थः शत्रीइज गमाभावः। आ मयोव्याधिः रोगव्याधिगदामयाइत्यमरः॥ मशठस्वाभ्यां शिष्टैर्नीतिज्ञैः समौतुल्यौआम्नातावाख्यातौअत्र्यायसोऽपार्शसेदिमहानर्थांपरोगवत्रु। अ

उपमानं ... ॥१०॥

राम: ३

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यादिति वेद्य-

नन्वेवं स्वार्थपरत्वदोषः लोकानुग्रहार्थत्वात्। अस्याः प्रवृत्तेरित्याशयेनाह। न दूय इति। सात्वतोऽपत्यं स्त्री सात्वती नाम हरेः पितृष्वसा उत्सादिभ्योऽञ्। सात्वत्याः
सूनुः श्चैद्यः वं धुरं पितृस्वसेनमन्नूपतइति भावः॥ सु महां मम पराध्यति। उद्यतीति यत्। कुध दुहेर्ष्यादिना चतुर्थी न दिति शेषः यत्त दोर्नित्यसम्बन्धात् न दूयेनप
रितप्ये दूञ्‌ दैवादिकात्कर्त्तरि लोडुत्तमपुरुषैकवचनम्। किन्तु लोकं दन्दह्यते गर्हितं दहतीति यत्। लुपसद चर जपजभदहदशगृभ्यो भावगर्हायामिति
यङ्। जपजभदहदशभंजपशां चेत्यभ्यासस्य नुगागमः। अतो लोकदहनं मां दुःखाकरोति दुःखमनुभावयतीत्यर्थः॥ दुःखात्प्रातिलोम्ये इति डाच् प्रत्ययः

न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति॥ यत्तु दन्दह्यते लोकमतो दुःखाकरोति माम्॥ ११॥ मम तावन्मतमिदं श्रू
यतामङ्ग वामपि॥ ज्ञानसारोऽपि खल्वेकः संदिग्धे कार्यवस्तुनि॥ १२॥ यावदर्थपदां वाचमेवमादाय माधवः॥ विरराम मह मा२
त्मानः प्रकृत्या मितभाषिणः॥ १३॥

अतश्चैद्य एवाभियातव्यः पार्थास्तु पार्थनयापि पश्चात्समाधेया इति भावः॥ ११॥ स्वमतं निगमयन् स्वमतस्य श्रूयतः पृच्छति। ममेति। तावद्रथैनत्र वणाप
येन मित्यर्थः॥ मम मतमिदं अंग त्यामंत्रणे ऽव्ययम्। अथ सम्बोधनार्थकाः स्युः पाट् प्याड् अङ्ग हे है भोः इत्यमरः॥ वामपि युवाभ्यामपि तिथ षष्ठी दस्मदो
षष्ठी चतुर्थीति वामादेशः। मतं श्रूयतां विधेयोऽप्ययं न दपि मया श्रोतव्यं अन्यथा न सन्देहनिवृत्तिरिति भावः॥ किंतु स्तोकं तु संदेहस्तत्राह। ज्ञानात्
सारो ज्ञानात्पर्यन्तोऽप्येकः कार्यवस्तुनि कर्त्तव्यार्थे संदिग्धे संशये तेऽतो ममापि संदेहः न त्यर्थः। दिहउपचये कर्त्तरि लिट् एत्य धन्वे सामान्ये न विशेष सम
र्थनरूपोऽर्थान्तरन्यासः॥ १२॥ यावदिति। माधवो हरिर्यावदर्था यावदर्थे यावदवधारणाऽव्ययीभावः। यावदर्थस्यादानियस्यास्ता अभिधेय

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रा०टि० परस्मैपदम्॥ तथा हि-मृषीयांस-उक्तसा॰ प्रकृत्याभितभाषिणः। वृथालापनिषेधादिति भावः। पूर्ववदलंकारः॥१३॥ अथाष्टभिः श्लोकैः
८ कुलकेन रामं वर्णयन्स्तवाकृमवतारयति। ततइत्यादि। ततो रामो जगाद सूत्तरेणान्वयः। सपत्नौ रिपुः रिपौ वैरिसपत्नारिद्विषद्वेष
णादुर्हृदमित्यमरः। तस्यापत्रपोऽपकारस्तस्य स्मरणानयोऽनुशयः पश्चात्तापः। भवेदनुशयो द्वेषे पश्चात्तापानुबन्धयोरिति विश्वः। तेन स्फु
रतीत्यनुशयस्फुः तेन स्फुराः ओष्ठौ बिम्बमिवेत्युपमितसमासः॥ रामाया ओष्ठबिम्बस्य उम्बेनेन विनो रामोष्ठबिम्बचुम्बनं नचुम्बुः तेनाविन
श्चुंब्रु पूर्वणपाविति वुत्रप्रत्ययः। ओत्वोष्ठयोः समासे वा पररूपं वक्तव्यम्-तेनोष्ठेनोपलक्षितः सस्मरस्मुरतयोः सस्मराइति भावः॥ उपमा ८५

ततः सपत्नापत्रपयस्मरणानुशयस्फुराः॥ ओष्ठेरामो रहवि बिंवत्रुंवनत्रुंत्रुनाः॥१४॥ विवक्षितामर्थविदस्तस्क्षणात्
प्रतिसंहृताम्॥ प्रापय्यन्पवनव्याधेर्गिरमुत्तरपक्षताम्॥१५॥ घूर्णायमानदिग्भ्रासाः सादमदपाटलितद्युती॥ वेवती
वदनोच्छिष्टपरिपूतपदे दृशौ॥१६॥

नृपास[illegible]योः संसदि॥१४॥ विवक्षितामिति। विवक्षितां रविन्दाभिमानादयेवक्तुमिष्टाम्-वचोवृजोवामन्त्रंतत्क्षणेनोक्तः तत्क्षणे विवक्षाक्ष
णे एवेत्यविलम्बेनोक्तिः। प्रतिसंहृतां रामानुरोधान्निरुद्धाम्-अर्थविदः कार्यज्ञस्य अतएव पवनव्याधेरुद्धवस्य गिरं उत्तरपक्षतां सिद्धान्ततां प्रा ८५
पयन्। स्वयम्प्रसत्याक्षावलंवितत्वादिति भावः। एतेन रामस्य प्रगल्भतोक्ता॥१५॥ घूर्णायमानेति। पुनः मादिरास्वादेन मघूर्णानेन योमदस्तेन ४
पाटलितारक्तीकृता द्युतिर्ययोस्ते देवतापेय्याव दनेयउच्छिष्टं मद्युलेपनामूलानि दिव्येन संक्रान्तमिति भावः। तेन परिपूते नेत्रे अस्यययोस्ते दृशौ

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

घूर्णायन्त्यभ्यपन् इति मदविकारोक्तिः ॥ उच्छिष्टपरिपूतेत्यत्र इति कालेसु सर्वं स्त्रीणां मुग्धमास्वेदके भुनामिति स्पृशत्।
त ॥ उच्छिष्टपावनत्व विरोधस्याभासत्वाद्विरोधाभासोलङ्कारः ॥ आभासत्वे विरोधस्य विरोधाभास उच्यत इति लक्षणात् ॥१६॥ आश्ले
षेति ॥ पुनः आश्लेषलोलुपाया आलिङ्गनलुब्धाया वध्वाः स्तनयोः कार्कश्यस्य काठिन्यस्य साक्षिणीं उपद्रष्ट्रीं नित्यं पीड्यमानामिति भावः
साक्षाद्द्रष्टरि संज्ञायामिति साक्षाच्छब्दादिन्प्रत्ययः ॥ वनमालां अभिमानो स्मैरहं क्रूरतमैर्मुखानिलैर्निश्वाससमीरणैस्तेर्म्लापयन् पय श्लो॰१

आश्लेषलोलुपवधूस्तनकार्कश्यसाक्षिणीम् ॥ म्लापयन्नभिमानो ऽयं वनमालां मुखानिलैः ॥१७॥
दधत्संध्यारुणव्योमस्फुरत्तारानुकारिणीः ॥ द्विषद्द्वेषोपरक्ताङ्गसंगिनीः स्वेदविप्रुषः ॥१८॥

त्र म्लापयतेर्णिजन्ताल्लट्शत्रादेशः ॥ आदेव इत्यात्वे पुगागमः ॥ अम्लाने म्लानसंबंधाभिधादसंबंधे संबंधरूपातिशयोक्तिः ॥१७॥ दधेति ॥ पुनः संध्यायाम दि१
रुणं व्योम स्फुरन्तीं तारा अनुकुर्वन्तीति तथोक्ताः ॥ कुतः द्विषति शत्रौ द्वेषेण रोषेणोपरक्तेङ्गेव पुषि संगिनीः सक्ताः स्वेदविप्रुषः स्वेदबिन्दून् । प्र विन्दुर
षतो प्रमांसो विप्रुषः स्त्रियामित्यमरः ॥ दधद्धारयन् ॥ नाभ्यस्ताच्छतुरिति नुमभावः ॥ उपमालङ्कारः ॥१८॥ प्रोल्लसदिति ॥ प्रकर्षेणोल्लस
न्तो कुण्डलयोः प्रोतानां स्यूतानां पद्मरागदलानां माणिक्यशकलानां त्विषा कान्त्या प्रोतेति ॥ प्रपूर्वाद्वेञः कर्मणि क्तेयजादित्वात्संप्रसा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

१ अथतयोरुपसर्गात्तत्पुरुषस्थानप्रत्ययविधानमुपस्थापयेद्धर्मसमयः मुखामोदं ... आमोदः सोऽतिनिर्हारी इत्यमरः। उद्वमनुद्गिरन्। अत्र मदिरायाः १
मधुरत्वयोः स्वगन्धातिरोधानेन तन्मात्रामुखोत ... गन्धस्वीकारात्तद्गुणालंकारस्तत्रोत्तरस्यात्मनिज्ञापकत्वेन पूर्वसापेक्षत्वात्संकरः॥ भावे दुदिनमतेन

॥८८॥

मा० टी०
५

रुचं कृष्णोत्तरासंगो नीलोत्तरीयम्। द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा। संव्यानमुत्तरीयं च इत्यमरः। तस्य रुचं चूतपल्लवस्येमां चौत-
पल्लवीं विदधत्। लोहितमिश्रश्यामाच्चूतपल्लवधूमलां कुर्वन्नित्यर्थः॥ धूमलो नीललोहितः इत्यमरः। वचनादग्राप्यन्यारूचामप्रापयता
योगात्तत्सादृश्यापेक्षो निदर्शनालंकारः॥ ॥१९॥ ककुद्मीति। पुनः ककुद्मिकन्याया रेवत्या वक्त्रस्यान्तः अभ्यन्तरे वासेन स्थित्या लब्धोऽधिवा-
सो वासनं यया तया तन्मुखसौरभवासितयेत्यर्थः॥ संस्कारो गन्धमाल्याद्यैः यः स्यात्तदधिवासनम् इत्यमरः। मदिरया कृतानुव्याधं कृतसंसर्गं मुखामोदम्

प्रोल्लसत्कुण्डलप्रोत्तपद्मरागदलत्विषा॥ कृष्णोत्तरासंगरुचं विदधच्चौतपल्लवीम्॥१९॥ ककुद्मिक-
न्यावक्त्रान्तर्वासलब्धाधिवासया॥ मुखामोदं मदिरया कृतानुव्याधमुद्वमन्॥२०॥ जगाद वदनच्छद्म-
पद्मपर्यन्तपातिनः॥ नयन्मधुलिहः श्वैत्यमुदग्रदशनांशुभिः॥२१॥ ॥ ॥

उद्वमन् उद्गिरन् प्रियायाः गण्डूषं ... मित्यर्थः। अत्र मदिराया ... गण्डूषमद्यगन्धस्वीकारात्तद्गुणालंकारस्तयोरुत्तरस्यात्मविशेषणत्वेन पूर्वसापेक्षत्वा-
दङ्गाङ्गिभावेन संकरः॥ तद्गुणः ... स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः॥२०॥ जगादेति। वदनं इति छद्मकपटं यस्य तस्य पद्मवदनस्य प-
र्यन्ते पद्मपर्यन्तपातिनः प्रान्तचारिणो मधूनि लिहन्तीति मधुलिहो मधुपाः। क्विप्। उदग्रैरुच्छ्रितैर्दशनांशुभिः श्वैत्यं धावल्यं नयन्

श्रीरामः ५

CC-0. Digitized by eGangotri and MIDF - Delhi
Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



रामोजगादेत्युक्तम्॥ किन्तदित्याकांक्षायामाह। यदिति। वासुदेवेनैधीनमित्यादिनं अकान्तरंनास्याधीनवो दोषोयस्येत्मनादिनवं निर्दोषम्। दोषआदीनवो
मतन्त्यमरः। यस्त्वहइरितंउत्तिष्ठमानस्तु परहीति॥ आदिनायानपक्षमाश्रित्ययदुक्तमित्यर्थः। तत्स्यववसूः सपदिक्रियाकेवलं सद्योऽनुष्ठानं नेट
मेवोत्तरंसिद्धान्तस्येवोक्तत्वादितिभावः॥२२॥ अथैतदेवप्रतिपादयिष्यन्‌ अं अभिषांपनीपतेयोपस्कारोति। नैतदिति॥ लघुसंक्षिप्तमेतद्वो
भूपस्यावक्तृत्वयाविस्तृतयापीत्यर्थः। द्विवचनविभज्योपपदेतरवीयसुनाविधिरीयस्तनिवृहोलीपोभूत्ववहोश्चभुरादेश॥४॥ वाचानोतिशाय्यतेनातिरि
च्यतेगर्वत्वादितिभावः। श्रीङ्कर्मणिलटियक्‌। अयङ्‌यिक्ङितिइत्ययङादेशः। तथाहि। इन्धनौघांदहतितीव्रनौघधक्‌। काष्ठराशिदाहकःभूया

नलकम्॥ यद्वासुदेवेनाधीनमनाधीनवमीरितम्॥ वचस्तत्सपदिक्रियाकेवलमुत्तरम्॥२२॥ नैतल्लघपिभूयस्या
वचोवाचातिशाय्यते॥ इन्धनौघधगप्यग्निस्त्विषानात्येतिपूषराम्॥२३॥ संक्षिप्तस्यायनोस्येववाक्यस्यार्थगरीय
सः॥ सुविस्तरतरावावोभाष्यभूताभवन्तुमे॥२४॥

नपीत्यर्थः। किंपिषत्वमषभावौ अग्निस्त्विषाप्रभयापूषरांसूर्यंअल्पमपीतिभावः॥ नात्येति। नातिक्रामतेतेजसः प्रभावत्वमिववचसोऽर्थव
३२ त्वमलंघताहेतुरित्यर्थः। अत्रसमानधर्मविम्वप्रतिविम्वतयोक्तेः दृष्टान्तालङ्कारः॥२३॥ यदिहरिवचोनातिशाय्यतेअलंतर्हितवापिवागार
म्भेणेतिआह। संक्षिप्तस्येति। अतोहरिवचसोनातिशायनीयत्वादेवस्कविस्तरतराःप्रपञ्चतराः प्रथनेनावत्वाद्वइतिघञ्‌ प्रतिषेधे। कादेशविस्पू
मेवावः संक्षिप्तस्याल्पाक्षरस्याप्यर्थेनगरीयसः सूत्रकल्पस्येत्यर्थः। अल्पाक्षरमसन्दिग्धंसारवद्विश्वतोमुखम्। अस्तोभमनवद्यंचसूत्रंसूत्रविदो

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वादि१

नियमभासः१
ख्यायते३

भा०टि०टी० विदुरितिलक्षणात् ॥ अस्यैववाक्यस्यभाष्यभूताः भाष्यैः समाः सैमेजन्तीभूतं समभेभिान्तोवृत्तिं त्रिष्विति वैजयन्ती । व्याख्यानरूपाभवान्त्विस्यर्थः । सू
६ त्रव्याख्यानविशेषोभाष्यम् ॥ सूत्रस्थंपदमादायवाक्यैः सूत्रानुकारिभिः स्वपदानिवर्ण्यन्तेभाष्यम् भाष्यविदोविदुरितिलक्षणात् । भयात्
तदेवविशेषप्रकाशनायव्याख्यायतेन त्वितिषयाश्रत्याश्यते इत्यपोषइत्यर्थः । उपमालंकारः ॥ २८ ॥ इत्थं पानं सिद्धान्तयित्वान चोद्यं प्रति
रोषं निधाय त्रिभिः प्रत्यावष्टे · विरोधीत्यादि । कृतिनां कुशलानां गिरः विरोधिवचसः प्रतिकूलवादिनो वागीशानपि नपि वेदोवदावदोवक्ता
वागीशोवाक्पतिस्समाइत्यमरः । मूकान्निर्वाचः कुर्वन्ते भजन्तीत्यर्थः । अनुलोमोऽनुकूलार्थो ऽभिधीयते येषां ते अनुलोमार्था अनुकूलवादिनइत्य

विरोधिवचसोमूकान्वागीशानपिकुर्वते ॥ जडानप्यनुलोमार्थान्प्रवाचः कृतिनां गिरः ॥ २७ ॥ षड्गुणाः शक्त
यस्त्रिः सिद्धयश्चोदयास्त्रयः ॥ ग्रन्थानधीत्यव्या
कर्तुमितिदुर्मेधसोपलम् ॥ २८ ॥ ॥ ॥ ॥

र्थः ॥ तान्समदानूजडानपि आवाचः प्रगल्भवाचः कुर्वते · अतो नास्मद्गिरः प्रतिवाच्या इति भावः । अत्र वागीशानां मूकीकरणाज्जडानां प्रवा
चीकरणाद्विशेषालंकारभेदासम्बन्धरूपातिशयोक्तिः प्रतिष्ठापित इत इतिसंकरः ॥ २९ ॥ ननु आत्मनीनेनस्त्राभि
गार करत्वाद्विलक्षवस्तुकरणारूपाविशेषालंकार भेदासम्बन्धरूपातिशयोक्तिः प्रतिष्ठापित इत इति संकरः ॥ २५ ॥ ननु आत्मनीनेनस्त्राभि
नावुके फलमानग्रह इतिन्यायेन नृणां स्वज्ञवचनं प्रतिकूलमपि ग्राह्यमेवेत्याशंक्याह । षडिति ॥ दुर्मेधा येषां ते दुर्मेधसो मन्दबुद्धयोऽपि नित्यम् टाम: ६
सिद्धजामेधयोरिति समासान्तोऽसिद्धप्रत्ययः । ग्रन्थानीशानसादीन धीत्यपाठित्वा ऽगुणाः सन्धिविग्रहयानासन द्वैधीभावसमाश्रयाख्याः षट् शक्तः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

इत्येतानि सप्तगिर

यः प्रभुमंत्रोत्साहाख्याः शक्तयः ॥ पूर्वोक्तं शक्तित्रयम् । गंधा नौ साध्याः उरुषार्थलाभार्थकामार्थाश्चेति सत्रः । प्रभावसिद्धिर्मंत्रसिद्धिरुत्साहसिद्धिश्चेति ।
। उदयाः क्षयवृद्धिस्थानानि त्रिविधान्यामेनोदयाउच्यते । तत्र वृद्धिर्यौगिकं क्षियोः पूर्वावस्थातदुपचयापचयेन साम्यनावस्थानं तेन त्रयमिति व्याकर्तुं व्याख्याउ
अलं समर्थाः पर्याप्ति वचनेष्वलमर्थेष्विति प्रत्ययः । पंचांगानि ताय तत्राकिं विकलानां संख्यादिस्वरूपं समासाभ्रपाठकानां अशास्त्रज्ञत्वाद्व्यवहारद्योतनार्थ व
दित्याभि संधिः२ चनादिति साधुः । अत्रामरसिंहः । संधिर्नाविग्रहोयानमासनं द्वैधमाश्रयः ॥ षड्गुणाः शक्तयस्तिस्रः प्रभावोत्साहमंत्रजाः ॥ क्षयः स्थानं च वृद्धिश्च त्रिव
र्गो नीतिवेदिनाम् इति । तत्रारिजिगीषोर्व्यवस्थाकरणमैक्यं संधिर्विरोधो विग्रहः । विजिगीषुररिं प्रति यात्रा यानं तयोर्मिथः प्रतिबद्धशक्त्योः कालप्रतीक्षयातूष्णी

अनिर्लोडितकार्यस्य वाग्जालं वाग्मिनो वृथा ॥ निमित्तादपराद्धेषोर्धानुष्कस्येव वल्गितम् ॥ २७ ॥ सर्वकार्यशरीरेषु
मुक्त्वाहंस्कन्धपञ्चकम् ॥ सौगतानामिवात्मान्यो नास्ति मंत्रो महीभृताम् ॥ २८ ॥

मवस्थानमासनं दुर्बलस्य प्रबलयोर्द्विषोर्वचसात्मसमर्पणं द्वैधीभावः अरिणा पीड्यमानस्य बलवदाश्रयणं संश्रयः । कोशदण्डोत्थं तेजः प्रभावः षाड्गुण्यचिन्तने कार्तिक्यादि स्यादुत्साहः २
मंत्रं कर्तव्येषु सुखोपायान्प्रत्ययः उत्साहगतमन्यदिति संक्षेपः ॥ २६ ॥ ननु शास्त्रोक्तव्याख्यानेन नृणां शास्त्रज्ञः स एव व्याख्येयवचनस्येत्याशङ्कां कथनेनाह । अनिर्लोडि
ठोकिरुतं तेति । अनिर्लोडितं कार्यं येन तस्य कार्याकार्यमजानत इत्यर्थः । वाचोऽस्य सन्तीति वाग्मी वावदूकश्च वक्ता इत्यमरः । वाचो ग्मिनिरिति ग्मिनिप्रत्य
यः । तस्य वाग्जालं वाग्डम्बरो निमित्तात् लक्ष्याद्वेध्यं लक्ष्यं शरव्यं च निमित्तं च समं विदुरिति वैजयन्ती । अपराद्धेषोः स्खलितबाणस्य धनुः प्रहरणमस्य धा
नुष्को धन्वी प्रहरणमिति ठक् ॥ इष्वनुक्तेति कः । अपराद्धः पृषत्कोऽस्माल्लक्ष्यं पश्यन् सायकं ॥ धन्वी धनुष्मान् धानुष्कः इत्यमरः ॥ तस्य वल्गितमिव रथानि

६७ लि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा०टी०

निष्फलं कार्यं तत्स्वव चोन्मा स्थंन तु वा वालयस्येति भावः ॥ ७ ॥ सर्वकार्यज्ञो इत्थं षड्गुणो त्पाठमाश्रं न मंत्रं येइति सिद्धैरुवयं मंत्र स्वरूपमाह ॥ सर्वेति । कार्या
णि संध्याकीनि ता निशरीरा णिवेत्युप मितसमासः । यासेसोगता ना मिति लिंगात् । ते षु शरीरेषु इ ति । शरीरेषु कार्यं शरीरे षिवसर्वकार्ये षित्यर्थः
॥ अंगा निस्कंध्याइवेति पूर्ववत्समासः । तेषां पंचकं मुक्तास्कंध पंचकमिवांगपंचकं हित्वेत्यर्थः ॥ पंचपरिमाणमस्य पञ्चकं संख्यायाः संज्ञा
संघसूत्राध्ययनेषु कप्रत्ययः । सुगतोभक्तिरंध्यज्ञनीयायेषां सोगतावौद्धाः भक्तिरित्यप्रत्ययः । तेषामन्य आत्मेव महोम्यत्तं नामन्त्रो
मंत्रो नास्तिकर्माणामारम्भोपायः ५ पुरुषद्रव्यसंपत्तिः देशकालविभागः विनियमात्प्रतीकारः ४ ॥ कार्यसिद्धिश्चेति पञ्चाङ्गानि यथाह ॥ काम
न्दकः सहायाः साधनोपाया विभागो देशकालयोः विपत्तेश्च प्रतीकारः सिद्धिः पञ्चाङ्गमिष्यते ॥ इति रूपवेदना विज्ञान संज्ञा संस्कारः पंचस्कंधाः ॥

मंत्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि ॥ चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ २९ ॥ कूर्मः

रूपस्कं०धः तत्रज्ञा नरूपंचो ५+

तत्र विषयप्रपंचो वेदनास्कंधः । आलयसन्ताने विज्ञाने विज्ञानस्कंधः । नामप्रपंचः संज्ञास्कंधः । वासनाप्रपंचः संस्कारस्कंधः ४ ॥ एवं पंचधापरिव
र्तनो ज्ञानसन्तान एवात्मेति बौद्धाः ४ ॥ एवं च यथा बौद्धानां सर्वेषु शरीरेषु स्कंधपंचकातिरिक्त आत्मा नास्ति तथा राज्ञां मन्त्रांगपंचकातिरिक्तो मंत्रो
नामास्तीति उपमालंकारः ॥ तत्रास्माकं समयमेवेत्यय मेव पात्रकाल इति भावः ॥ २८ ॥ अथ मंत्रीणां र्थक्रियाविलंबे दोषमाह । मंत्र इति । मंत्र तेगूमे
सर्वाङ्गैः पूर्वोक्तैरुपायादिभिः उरश्छदादिभिश्चोपलक्षितेऽपि सर्वाङ्गैः संवृतोऽपीत्यर्थः । मंत्रो विचारः अधीरो भीरुः । युध्यत इति योधो भट इव पर्वा
यच्च । परेभ्यो अन्येभ्यः । रिपुभ्यश्च परो अभेद्यस्ये षु परोपरमात्मनोरितिवेजयन्ती ॥ भेदो विदारणं तत्तीयगामित्वं च तत्स्य शङ्कया चिरं स्थातुं विलंबितमित्यर्थः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रूपाः ग्राव्दानप्रयोक्तव्याः पौनरुक्त्यापत्तेरिति

किंव नीतिस्वरूपपर्यालोचनयापि नविलंबितः कार्यइत्याभिप्रेत्याह। आत्मोदय इति। आत्मन उदयो वृद्धिः परस्य शत्रोर्ज्यानि र्हानिः॥ ग्लाज्याहाभ्यो निरिति त्योगादिको निरुप्रत्ययः॥ इतिद्वयमुद्देवं परिमाणमस्यास्तीति इयती किमिदंभ्यां वो घ इति घप्रत्ययः। उगितश्चेति ङीप् इति नीतिः नीतिसंग्रहः। एतद्व्यातिरिक्तो न कश्चिन्नीति पदार्थोऽस्ती त्यर्थः। यदुक्तम्। षाड्गुण्यादिविस्तारस्तत्सर्वोऽप्यस्यैव प्रपंच इत्याह। तदिति। तद्द्वयमुरीकृत्यांगीकृत्य। उरीकृतमुररीकृतमंगीकृतमित्यमरः॥ ऊर्यादिच्चिडाचश्चेति गतिसंज्ञायां कुगतिप्रादय इति समासे क्त्वोल्यपवादेशः॥ कृतिभिः कुशलै र्वाचस्पत्यं वाक्पातित्वं वाग्मित्वं कस्का दित्वादलुक्सत्वे। षष्ठ्याः पति पुत्रेत्यादिना नलुगिति स्वामी। तन्न। छन्दो विषयत्वात्। ब्राह्मणादित्वात् ष्यञ्प्रत्ययः॥

आत्मोदयः [illegible] परज्यानि र्द्वयंनीति रितीयती॥ तदूरीकृत्य कृतिभि र्वाचस्पत्यं प्रतायते॥ ३०॥

नतिर्योगपरेणापि नमहिम्ना महीयसाम्॥ पूर्णश्चन्द्रोदयाकांक्षी दृष्टान्तोत्र महार्णवः॥ ३१॥



ष्टवर्लिकारः॥ ३४॥

यः। प्रतायते विस्तीर्यते इति कर्मणि लट्। ननु न लब्धोदयस्य किं परोछित्त्यात इत्याह। नेति। महीयसां महात्मनां परेण प्रकृष्टेनापि महिम्ना ऐश्वर्येण नतिर्योगः सन्तोषलाभो नास्तीत्यस्मिन्नर्थे पूर्णस्सन्नपि चन्द्रोदयाकांक्षी दृश्यर्थ मिति भावः। नायं दृष्टान्तालंकार महार्णवो दृष्टान्तो निश्चयो यस्मिन्स दृष्टान्तो निदर्शनमुपमानमिति यावत्। नरा ज्ञातृष्णावृद्धिः कार्या। असन्तुष्टा द्विजा नष्टाः सन्तुष्टाश्च महीपा थिवा इति न्यायादिति भावः। नायं दृष्टान्तालंकारः। बिम्बप्रतिबिम्बभावेनोपस्थापन्यतेन स्योऽस्यानात्। किंतु दृष्टान्ता इत्येनस्याभिधानादुपमालंकारः॥ अतएव दृष्टान्तोदाहरणानि दर्शन नैर्य क्रियात्वं तस्मादात्मोदयार्थी मिरविलंबी छत्रुरुद्ध्यः। तत्रात्मरीपतानस्यातिभावः॥ ॥ त्रुटित् + ४

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा॰टी॰ ८ तथापि सन्तोषे दोषमाह। संपदेति। अहल्याया ऽपि संपदा सुस्थिमात्मानं मन्यस्तस्थानाभा भवति आत्मानो लक्ष्मेति [illegible] त्यय॥ अनुभागमस्थ्यत स्याल्पसन्तु
ष्टस्य तो स्वल्पसंपदं कृत कृत्यस्तावतैव कृतार्थो विधिर्देवमपि न वर्द्धयेति इति मन्ये पौरुषहीनं देवमपि जुगुप्सते। न वन्ते पुरुषार्थस्यादिति भावः
॥३२॥ किञ्च पराक्रमफलं स्वयमेव एवोदयो नान्येन इत्याह। समूलेति। मानिनोऽभिमानवन्तः परान् शत्रून् समूलं घातं यथा अघ्नन्तः अनुन्मू
लं घ्नन्त इत्यर्थः॥ समूलाकृतजीवेषु हन्तेः कृञ्ग्रहः इति णमुल्प्रत्ययः। कषादिषु यथाविध्यनुप्रयोग इति हन्तेरनुप्रयोगः। नोद्यति। किंतु हत्वैव
वोद्यन्तीत्यर्थः। तत्रहत्वैवोदयः अन्वयतीत्यन्वंगात्तेन तमो धनमसमूः॥ ध्वान्ते गाढे न्धतमस मिस्त्रमरः॥ अत्र समन्वोऽन्यस्तमस इत्यच्प्रत्ययः प्र
संपदा सुस्थिरं मन्यो भवति स्वल्पयापि यः॥ कृतकृत्यो विधिर्मन्ये न वर्द्धयति तस्य ताम्॥ ३२॥ समूल
घातमघ्नन्तः परान्नोद्यन्ति मानिनः॥ प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः॥ ३३॥ विपक्ष
मखिलीकृत्य प्रतिष्ठा खलु दुर्लभा॥ अनीत्वा पङ्कतां धूलिमुदकं नावतिष्ठते॥ ३४॥ ॥ ॥ ॥॥
ध्वंसि [illegible] न्धतमसं येन स उदयात्प्राग् इति भावः॥ रविरुदाहरणं दृष्टान्तः अत्रापि दृष्टान्तोत्तमहार्थाद् इति वदुपमालंकारो न दृष्टान्त इति द्रष्टव्यम्॥३३॥।
किञ्च अनुच्छिन्नशत्रोः प्रतिष्ठैव दुर्घटा इत्याह॥ विपक्षमिति। विपक्षं शत्रुमखिलीकृत्य खिलमुत्सन्नमकृत्वा। अनुन्मूल्येत्यर्थः। प्रतिष्ठा दुर्लभा। खलु तथा रामः ८
हि। उदकं कर्त्तृ धूलिं स्वपरिभाविनीमिति भावः॥ पंकतामनीत्वाऽनधः कृत्वेत्यर्थः। नावतिष्ठते समवतिष्ठति समवप्रविभ्यः स्थ इत्यात्मनेपदम्॥ वाक्यभेदे प्रतिबिम्बाना
पेक्षा दृष्टान्तलंकारः॥ ॥३४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नन्वयमेकाकी शिशुपालः किमस्मान्करिष्यतीत्याशंक्याह ॥ म्रियत इति ॥ एकोपि रिपुर्यावन्म्रियते । अवतिष्ठते । धृङ् अवस्थान इति धातोर्लोदादिकात्कर्तरि लङ् ॥ रिङ्शयग्लिङ्क्षु रिति रिङादेशः ॥ तावत्तदवधि सुखं कुतः । यावत्तावच्च साकल्येऽवधारणे इत्यमरः ॥ तथाहि ॥ सिंहिकाया अपत्यं पुमान्सैंहिकेयः ॥ तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुंतुद इत्यमरः ॥ स्त्रीभ्यो ढक् ॥ असुरद्रुहां देवानां पुरोग्रे सोमं क्लिश्नाति बाधते । प्रार्थ्यात्सोपप्लवं हरति स्पर्शेनेति भावः ॥ तस्मादेकोपि शत्रुरुच्छेत्तव्य इति भावः ॥ अग्नेः शेषमृणेः शेषं व्याधेः शेषं न शेषयेत् ॥ इति नान्यथा ॥ विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ३५ ॥ ननु शत्रुरुद्धिष्टैः किं नः करिष्यतीत्याशंक्य तस्य बलवत्तां वक्तुं मित्रामित्रबलाबलविवेकं तावत्करोति । सखेति । क्रियया उपकाराऽप

म्रियते यावदेकोपि रिपुस्तावत्कुतः सुखम् ॥ पुरः क्लिश्नाति सोमं हि सैंहिकेयोऽसुरद्रुहाम् ॥ ३५ ॥ सखा ग

रीयान्शत्रुश्च कृत्रिमस्तौ हि कार्यतः ॥ स्यातामामित्रौ मित्रे च सहजप्राकृतावपि ॥ ३६ ॥ श्रीकृष्णायनमः

काररूपान्निर्वृत्ता इति कृत्रिमः ॥ ड्वितः क्त्रिः ॥ क्त्रेर्मम्नित्यम् ॥ सखा सुहृत् गरीयान्बलवान् । एवं शत्रुश्च कृत्रिमो गरीयान्कुतः ॥ हि यस्मात्तौ कृत्रिमौ मित्रशत्रू कार्यतः । उपकारापकाररूपकार्यवशान्निर्वृत्ता इति विशेषः ॥ उक्तकार्याभावे यावज्जीवमनपायाद्योः मित्रामित्रभावोऽप्यनयाऽपीति गरीयस्त्वमिति भावः ॥ सहजं प्राकृतौ तु नैवेत्याह । स्यातामिति ॥ सहजातः सहजः ॥ एकशरीरावयवान्ना तत्र सहजं मित्रं मातृष्वस्रेयपैतृष्वस्रेयादि । सहजशत्रुः पितृव्यसपत्न्यादि । प्रकृत्या सिद्धः प्राकृतः पूर्वोक्तकृत्रिमसहजलक्षणरहित इत्यर्थः ॥ अत्र विषयानन्तरः प्राकृतशत्रुस्तदनन्तरः प्राकृतमित्रमपीति

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा० स० ९

मित्रे वा॰ अमित्रौ मित्रे वस्यातां॰ तावपि कार्यवशादनियमेनोभयरूपमाद्येते नतु कृत्रिमौ॰ कृत्रिमशत्रुः शत्रुरेव मित्रंच मित्रमेवेति कृत्रिमावेव मित्रामि त्रौगरीयांसौ नतु सहजौ नापि प्राकृताविन्यर्थः॥ एतेन कृत्रिमत्वं सर्वापवादीति सिद्धम्॥३६॥ एवंच दस्माकंपेत्र ष्वस्त्रेयः शिशुपालः सहजमित्र त्वात्सहसंधातोद्योननुयातव्य इत्याह॥ उपकर्त्रेति॰ उपकर्त्रा उपकारिणा ऽरिणापि सहजेन प्राकृतेनेतिशेषः॥ सन्धिकार्यः अरित्वापवादेन कृ त्रिमशत्रुतायाः वलीयस्त्वाः यावज्जीवभाविन्यास्तत्रोत्पन्नत्वादितिभावः॥ एवमपकारिणा मित्रेणापि सहजेन प्राकृतेनवेतिशेषः॥ सन्धिर्नयः॥ मि त्रत्वापवादेन कृत्रिमशत्रुतायागरीयस्याः यावज्जीवभाविन्याः तत्रोत्पन्नत्वादितिभावः॥ ननु साक्षादरिणाकथंसंदध्यात् मित्रेणापि सं कथं का ४

उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा॥ उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः॥३७॥

त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरेः॥ वद्धमूलस्य मूलं हि महद्वैरतरोः स्त्रियः॥३८॥ ॥॥

कथं विरुध्यात् इत्याशंक्यक्रियपातयोर्वैपरीत्यादित्याह॥ हि यस्मात् उपकारापकारौ॰ एतयोर्मित्रामित्रयोर्लक्षणं स्वरूपंलक्ष्यं दृश्यम्॥ उपकर्त्रैव मित्रम् अपकर्त्रैव शत्रुरित्यर्थः॥ तस्मात्सहजमित्रत्वेपि॰ चैद्यः क्रियया शत्रुत्वात् ज्ञातव्यएवेतिभावः॥३७॥ अथ चैद्यस्य कृत्रिमशत्रुत्वं वक्तुमिमाह॥ त्वयेत्यादि॥ हे हरे रुक्मिणीं हरता वंधुमिस्तस्मैदत्तां राक्षसधर्मेणोद्वहतेत्यर्थः॥ राक्षसो हरणादितिया ज्ञवल्क्यः॥ गांधर्वो राक्षसश्चैवेति क्षत्रस्यतौ स्मृता विति मनुः॥ त्वयाचैद्यो विप्रकृतः॥ तथाहि वद्धमूलस्य वैरतरोः स्त्रियः महत्प्रधानमूलं॰ रूपकसंसृष्टोपमार्थांतरन्यासः॥ सामान्येन विशेषसमर्थनरूपः॥३८॥ रामः ९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ तेनापि त्वं विप्रकृत इत्याह । त्वयीति । त्वयी भूमेरपत्यं पुमांसं भौमं नरकासुरं जेतुं गते सति वैद्य ॥ इमां पुरीं द्वारकां प्रोषितार्यमा सूर्यो यस्यास्तां मेरो॰
स्तटीं भानुमंधकार इव अरौत्सीत् उद्धवान् रुधेर्लिटो सिचो लुङि वृद्धिः ॥ ३९ ॥ अपकारान्तरमाह ॥ आलप्येति । सवैद्योव भ्रो र्यादव विशेषस्य दारा भार्याः
भार्या जायाः पु भूम्नि दारा इत्यमरः । अपाहरत् । इदं दाराहरणम् आलप्यालापविषयीकृत्य अलं नालपनीयमित्यर्थः ॥ अलं खल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वो
ल्यप् । यतः पापानां पापिनां कथाकथनमुच्चारणमपि किंवितिपूजिकत्वि कुवि वर्चस्वेस्य ङ् प्रत्ययः । अश्रेयसे ऽनर्थाय [illegible] पालं समर्थं सकारं नमः स्व॰
९१ स्तीत्यादिना चतुर्थी । अत्र निषिध्यमानालपनकार्यमश्रेयःप्राप्तिः तस्य स्वेनेतत्कारलपननिषेधसमर्थनात् ॥ कार्येण कारणसमर्थनरूपोर्था॰

त्वयि भौमं गते जेतुं मरौत्सीत्सा पुरीमिमाम् ॥ प्रोषितार्यमणं मेरोरंधकारस्तटीमिव ॥ ३९ ॥ आलप्यालमिदं ब
भ्रोर्यत्स दारानपाहरत् ॥ कथापि खलु पापानामलमश्रेयसे यतः ॥ ४० ॥ विराद्ध एवं भवता विराद्धा बहु
धा च नः ॥ निर्वर्त्यतेऽरिः क्रियया स श्रुतश्रवसः सुतः ॥ ४१ ॥

न्तरन्यासः ॥ ४० ॥ फलितमाह ॥ विराद्ध इति ॥ एवं भवता विराद्धो विप्रकृतः राध हिंसायां निष्ठा कर्मणि क्तः । बहुधा नोऽस्माकं च विरोद्धा विप्रकर्ता श्रुतश्रवा नाम हरेः पि
तृष्वसा तस्याः सुतः चैद्यः पैतृष्वसेयत्वात् सहज मित्रमपीति भावः । स चैद्यः क्रियया पूर्वोक्तोन्योन्यापकारक्रियया अरिर्निर्वर्त्यते कृत्रिमशत्रुः क्रियत इत्यर्थः ॥
अतो वलीयस्त्वादनुपेक्ष्य इति भावः ॥ ४१ ॥ अथास्योपेक्षायां दोषमाह । विधायेति । पूनराः पुमांसः पुंसः पञ्चजनाः पूरुषाः पुरुषा नरा इत्यमरः ॥
सामर्थ्ये प्रागेव सारो बले । अरौ वैरम् अपकारकं विधाय स्वयं वा परकृतेनेत्यर्थः । उदासते उपेक्षन्ते तेन राः कक्षे गुल्मे त्रसा वासादे तृष्णा इति वैजयन्ती । उद

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

भा० स०
१०

विषः अर्चिष्मंतं अग्निं प्रक्षिप्याभिमारुतं अभिमुखो ऽव्ययीभावः। शेरते स्वपंति नश्यन्त्याशयहेतुरित्यर्थः। शीङो रुडिति रुडागमः॥ यत्तु उदासते शेरते इति वि
श्लिष्टोदासीन्यशयनयोर्वाक्यार्थयोर्वाच्यभेदेन प्रतिबिंबकरणापेक्षत्वस्याज्ञानात्। अत्र तु वाक्यार्थे वाक्यार्थसमारोपाद्वाक्योक्तवाक्यतायां तद्भावादित्य
लंकारसर्वस्वकारः॥४३॥ तथापि वैरं धृत्वा सोढव्यमित्याशंक्याह। अनामेति॥ यः क्षमी सहनशीलः शमित्यष्टाभ्यो घिनुणिति घिनुण्प्रत्ययः। पुंसो
ऽस्य मनागस्य वा ऽभ्यासवृत्तावपीति भावः। अनभ्यावृत्त्या असकृत्वा अनल्पे ऽपीति भावः॥ विराध्यंतं अपकुर्वाणं कामं प्रकामं क्षाम्यतु क्षमतां सं
भवनायां लोट्। शमामष्टानां दीर्घः। क्रियासमभिहारेणाभ्यावृत्त्या पौनःपुन्येन वेत्यर्थः। न त्वयं वाक्ये नैकार्थत्वं दोषाय विराध्यन्तं क्षमेत सहेत सोढुं कः

विधाय वैरं सामर्षे नरोरौ ये उदासते॥ प्रक्षिप्योदर्चिषं कक्षे शेरते ते ऽभिमारुतम्॥४३॥ अनामनागनभ्यावृत्त्या
वा कामं क्षाम्यतु यः क्षमी॥ क्रियासमभिहारेण विराध्यंतं क्षमेत कः॥४४॥ अन्यदा भूषणं पुंसः क्षमा लज्जे [illegible]२
व योषितः॥ पराक्रमः परिभवे वैयात्यं सुरतेष्विव॥४५॥ [illegible]२

शङ्कुवान्न कोपीत्यर्थः। शकि लिंचेति शकार्थे लिङ्। क्षमू सहने दैवादिको भौवादिकश्च॥४४॥ ननु सर्वदा क्षमैव पुंसो भूषणमतो ऽपराधे ऽपि क्षन्तव्यमत आ
ह॥ अन्यदेति। अन्यदा सुरतव्यतिरिक्तकाले योषितो लज्जेव पुंसो ऽन्यदा ऽपरिभवे क्षमा भूषणं। परिभवे तु योषितः सुरतेषु वैयात्यं धार्ष्ट्यमिव। धृष्टे धृ
ष्टे वैयात्यश्चेत्यमरः। पराक्रमः पौरुषं भूष्यते ऽनेनेति भूषणमाभरणं च एवं च क्रियावचनान्नियतलिंगत्वादिति विरोध इति वल्लभोक्तं प्रत्युक्तम्॥४५॥ रामः
१०

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अपपरिश्रवे ऽप्यपराक्रमेत्रिभिर्निन्दामाह। मेतिपरस्याज्ञोरवज्ञया ऽवमाने नत्वदुःखं तेन दग्धस्तस्थोपि। अनएवमाजीवनू गर्हितजीवी सनूभा
ध्याक्रोशाइतिलक्ष्माश्वादेशा४। जिवतिघ्रागोन्धारयति। जनन्याः क्लेशकारिणो गर्भधारणप्रसवादिवेदनाकारिणास्तस्मातिरिक्तार्थक्रियाहि
नस्यैतस्य पर्थः॥ तस्याजननाद्भजनिरेवास्तु जनन्याः क्लेशानिवृत्यर्थइति आक्रोशानस्यानि रितिनसूर्वाण्डजिधातोरनिप्रत्ययः॥४५॥ पादाहतइ८
ति॥ यद्रजः पादेनाहत्तं मूर्धानमारोहन्तुरेवस्थिरो ऽधिरोहति। अकेन नमपीतिभावः अपमाने सत्यपि स्व स्थोऽस्मत्तुष्टादेहिनस्तद्वरंस्म छवातिरे
ति॥ यद्रजः पादेनाहतं मूर्धानमाहन्तुरेवशिरो ऽधिरोहति। अकेन नमपीतिभावः ... ग्रोर्थादिसाधनैकरणोत्नीया ऽकंविदर्थे सुकृतं कीर्मी
कालंकार:॥४६॥ असंपादयति॥ जातिव्राह्मणत्वादिक्रिया ऽव्ययाध्ययनादिगुणाः ... 

माजीवन्यः पराव ज्ञादुःखदग्धोपि जीवति॥ तस्याजननिरेवास्तुजननीक्लेशकारिणः॥४५॥ पादाहतं यदुत्थाय
मूर्धानमधिरोहति। स्वस्थादेवापमानेपि देहिनस्तद्वरं रजः॥४६॥ असंपादयतः कंविदर्थं जातिक्रियागुणैः॥ य
दृच्छाशब्दवत्पुंसः संज्ञायै जन्म केवलम्॥४७॥ नुऊ त्वमितरानाज्ञैने दंसिंधावगाधता॥ अलंघनीयता हेतुरुभयं
तन्मनस्वि ॥४८॥

दिपुरुषार्थम्॥ अन्यत्र गौणांशोल्लुष्यादिभिः स्वाभिधेयभूतैः करणैः कंचिदर्थं यज्ञाद्विव्यवहारात्संप्रयोजनमसंपादयतः उभयत्रा माहकुजात्यादि
संभवादितिभावः॥ पुंसो जन्मलाभः यदृच्छाशब्दवत्॥ इच्छापरिकल्पितस्यजात्यादिप्रवृत्तिनिमित्तं शून्यस्य डित्थादिशब्दस्यैवेतिवतिप्रत्ययः
स्वस्थायदृच्छायदृच्छन्दःस्वैरितास्समाइतिकेशवः॥ संज्ञा केवलं संज्ञार्थम्। एकत्र परिभाषिकं किञ्चिन्नाममात्रं अत्र भवितु मनुत्रनाटुकूनामभवि
नुमिति॥४७॥ एवमपोरुषं दूषयित्वा पोरुषं भूषयति नुऊ त्वमिति। अत्रोनुऊ त्वमोत्रत्यमसती निर्घोषः। अस्तिभवति परोऽप्रयुज्यमानो ऽप्यस्तीतिभा

ये२ सज्ञाना४

गवयकृ।

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी
११

संप्रतिशत्रौ मार्दवमनर्थायेत्याह। तुल्य इति स्वर्भानू राहुः परापराधे ऽपकारे तुल्येऽपि भानुमंतं सूर्यं चिरेणाग्रसते हि मांशुमाशु ग्रसते। गिरतीति यत्॥
ग्रसते गीर्णिरूपमिति वानात्। तन्म्रदिम्नः मार्दवस्य स्फुटं तद्विपक्षे तीक्ष्णार्रणेन भवितव्यं अन्यथा मृदुस्स्वैरेवं बाध्यत इति भावः॥ एतत्प्रस्तुतो
केकथनेन सारूप्यात्प्रतीयत इत्यप्रस्तुतप्रसंसाभेदोयं अप्रस्तुतस्य कथनान्यत्स्तुतं यत्र गम्यते अप्रस्तुतप्रशंसेयं सारूप्यादि नियं त्रितोतिलक्ष व
णात्॥४९॥ एतदपि भंग्यंतरेणाप्याह॥ स्वयमिति॥ असाराणां दुर्बलानां निदर्शनं दृष्टान्तः॥ अत एव षदसमासेन तृणोत्कटरात्तृणाकल्प मि
त्यर्थः॥ विभाषासु बहुनूपुरस्तादतिबहुच्प्रत्ययः॥ अप्रकृतस्यादाषदसमासेतु बहुत्रुछ इति लिंगेति वचनात्। प्रकृतिलिंगता लघुः जिष्णोफर्ते

तुल्येऽपराधे स्वर्भानुर्भानुमन्तं चिरेणायत्॥ हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलं॥४९॥ स्वयंप्रणामतेऽल्पे
पि परवायावुपेत्य षि॥ निदर्शनमसाराणां लघुर्बहुतृणं नरः॥५०॥ तेजस्वीमध्ये तेजस्वी दवीयानपि ग
ण्यते॥ पंचमः पंचतपसस्तपनो जातवेदसाम्॥५१॥

नरोऽल्पेपि परो वायुरिवेत्युपमितिसमासः॥ बहुतृणमितिस्यल्पोपमासाहचर्यात्कल्पवर्णेपदेशीयानिति दंडिनां कल्पबादिनामोपमवाचके षभिधाना
न्निम्नं पेयुचिनासेसतिस्वयंप्रणामतो स्वयंप्रस्थी भवति। कर्मवत्कर्मणा तुल्यक्रिय इति कर्मवद्भावे भावकर्मणोरित्यात्मनेपदम्॥ नदुहस्तनमांसक्रिएण
निस्यिकप्रतिषेधः॥ वायुनातृणमिवाल्पीयसाप्परिणा लघुत्वेनैव परिभूयत इत्यर्थः॥ उपमालंकारः॥५०॥ ॥ पुनः प्रकोरान्तरमाह॥ तेजस्वीति॥ द
वीयानति दूरस्थोऽपि सकलदूरस्थो दिना पूर्वगुणगणनादिप्रलोपोपैते तेजस्वीतेजस्विनां मध्ये गण्यते। तथा हि पंचाग्निसाध्यं तपो यस्य स पंचतपसः॥
पंचमाग्निमध्ये तपस्यतः तपनोऽर्को जातवेदसां अग्नीनां पञ्चमः कृशानां पूरणः पञ्चमो जातवेदा भवतीत्यर्थः विशेषेण सामान्यसमर्थनरूपोऽर्थान्तर

श्रीकृष्ण:।
राम:
११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गुणान्तरेव्यतिरेकेनाह॥ अङ्कत्वेति। उच्चैरुन्नतेऽविद्विषांमूर्द्धसु हेलयापादं अङ्कत्वानीधाय अनभ्यूर्द्ध इति निषेधात्समासे ऽपिनत्यवादेशः॥४॥ कीर्त्तिः
कथंकारंकथमित्यर्थः॥ अन्यथोवंकथमित्यं सुसिद्धाप्रयोगश्चेदिति। अनर्थकादेवकरोते॰ कथं पूर्वास्समुलू। अनालम्ब्यानिराधारा कीर्त्तिर्द्यांदिवम
धिरोहतिनकथंचिदित्यर्थः॥ किंचिन्निःश्रेयसादिकमनाकम्प्य उन्नतौ धंस्यदुरारोहत्वादितिभावः॥ तस्मात्कीर्त्तिमिच्छतापौरुषमिवाश्रयणीयमि
तिश्लोकतात्पर्यं। कीर्त्तिद्वन्तोरभेदोपचारात्मानकत्वेकता निर्वाहः॥ अप्रस्तुतोपा॰ कीर्त्तिविशेषणामहिम्नाः प्रस्तुतप्रसादारोहणाम्॥ स्त्रीव्यवहार

अङ्कत्वाहेलयापादमुच्चैर्मूर्द्धसुविद्विषाम्॥ कथंकारमनालम्ब्या कीर्त्तिर्द्यामधिरोहति॥ ५२॥
अंकाधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः॥ केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः॥ ५३॥

प्रतीतेस्समासोक्तिः॥४॥ ५२॥ पौरुषमेवश्रेय इत्यत्र अन्वयव्यतिरेकदृष्टान्तावाचष्टे॥ अंकेति। अंकमुत्संगमधिरोपितोमृगोयेनसचन्द्रमामृगलांछलोमृ
गांकः। निष्ठुरंयथातथा॰ क्षिप्तोहतोमृगयूथोयेनसकेसरिसिंहोमृगाधिपः। उभयत्रापिव्याख्यायतइतिशेषः॥ तस्माद्घोरमार्दवंदुष्कीर्त्तयेपौ
रुषंकीर्त्तयेइतिभावः॥ अत्राप्यप्रस्तुतकथनात्प्रस्तुतार्थप्रतीतेरप्रस्तुतप्रशंसा॥ ५३॥ ननुसामादिकमुकोपायमुपेक्ष्य किंपाक्षिकसिद्धिनादण्डे
न॰ यथाहमनुः॥ सामादिभेदनदानेतसमस्तैरुतवापृथक्। विजेतुंप्रयतेतारीन्युद्धेननकदाचनेति॰ तस्मात्सांत्वमेवयुक्तमित्याशंक्याहाभ्यांनिराच

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा०टी०द्वि० १२

ष्टे॥ चतुर्थेत्यादि॥ चतुर्थोपायसंसाध्ये दंडसाध्ये रिपौ सांत्वंसामं सामसांत्वमुभे सम इत्यमरः॥ अपक्रियाऽपकारः॥ तथाहि॥ स्वेद्यं स्वेदार्हं स्वेदेन प्रतिका
र्यमित्यर्थः॥ स्वेदं तु स्वेदने घर्मे इति विश्वः॥ आमज्वरम पक्वज्वरं प्राप्य आमो रोगे रोगभेदे आमो पक्वे तु वाच्यवदिति विश्वः॥ कः अम्भसा परिषिंचति न
कोपीत्यर्थः॥ ज्वरितस्यांभसेवकृत्यसांत्वमुद्दीपकं स्यात्॥ अतो दण्ड एवेति भावः॥ वाक्य◦देन प्रतिबिम्बकरणाक्षेपाद्दृष्टान्तालंकारः॥ ५७॥ सा
पेति॥ सकोपस्य परूढवैरस्य तस्य वैद्यस्य सामवादः प्रियोक्तयः सहसाऽकस्मात् प्रताक्षिप्तस्य सर्पिषो घृतस्य तोयबिन्दव इव प्रत्युत वैपरीत्येन दी

चतुर्थोपायसाध्येतु रिपौ सान्त्वमपक्रिया॥ स्वेद्यमामज्वरं प्राज्ञः कोम्भसा परिषिञ्चति॥ ५७॥ सामवादाः
सकोपस्य तस्य प्रत्युत दीपकाः॥ प्रतप्तस्येव सहसा सर्पिषस्तोयबिन्दवः॥ ५८॥ गुणानामायथातथ्याद
र्थं विप्लावयन्ति ये॥ अमात्यव्यंजना राज्ञां दूष्यास्ते शत्रुसंज्ञिताः॥ ५९॥ ॥ ॥

पकाः प्रज्वलनकारिणः नतु शांतिकराइत्यर्थः॥ तस्माद्दण्ड एव नतु वचनं तत्परूढवैरविषयः॥ ५८॥ एवं स्थिते पुंदरीकाक्षवादयः प्रत्याक्षीरन् तानु
त्थाह॥ गुणानामिति॥ गुणानां संध्यादीनां अयथातथ्यात् यथा तथा न्यमतिक्रम्य वर्त्तत इति अयथातथं॥ यथार्थे यथाशोऽपमिति यावत्॥ यथार्थं न्यय
थातथमित्यमरः॥ यथार्थेऽव्ययीभावः॥ सनपुंसकमिति नपुंसकत्वम्॥ ह्रस्वो नपुंसके प्रातिपदिकस्येति ह्रस्वत्वम्॥ अयथातथं तस्य भावः श्रीरामः
अयथातथ्यम्॥ ब्राह्मणादित्वात्ष्यञ्प्रत्ययः यथातथयोः परयोः पर्याये नोति विकल्पान्नञ् पूर्वपदवृद्धिः॥ तस्मादयथातथ्यात्॥ अयथाय १२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योगादित्यर्थः ॥ अर्थप्रयोजनं ये विस्रावयन्तो विप्रतिकार्यहानिं कुर्वन्तीत्यर्थः ॥ अप्रात्मानां व्यजनं चिह्नं येषान्ते तथोक्ताः ४ ॥ तद्वेषधारिण इत्यर्थः
अवर्ज्यो बहुव्रीहिर्व्यधिकरणो जन्माद्युत्तरपद इति वामनः ॥ वस्तुतस्तु ग्रामउ रितिसंज्ञा येषां ते संजाता संज्ञितो ग्रन्थवध एवं ते कूटमंत्रिणा रक्तां दूषयितुमर्हा दूष्याः
॥ गर्द्धोस्त्वाज्या इति यावत् । कृत्यानां कर्त्तरि वेति षष्ठी अतः स्तोकेन प्रतिरोद्धव्यमिति भावः ॥ ५६ ॥ यातव्येऽपि काले यातव्यांमित्यानांकृ अयमेव काल इत्या
ह ॥ स्वेति द्वयाः स्वशक्त्युपचये सामर्थ्यातिरेके यानं प्राहुरमात्याः । यथाह कामन्दकः । पायेशास्त्रो व्यसने रिपूणां यातव्यमेके जुसमादिशन्ति । तत्रैव पक्षोद्भव्यस
नं स्यान्नित्यं क्षमस्तु सन्नस्तुदितेऽभियायात् ॥ इति परे बृहद्वा ४ ... परस्य शत्रोर्व्यसने विपदि भ्रंशे इत्यमरः । यानमाहुः अत्र मतुः पदार्थायाक्षिप्त ख्यावव्यसने चोत्थिते

स्वशक्त्युपचये केचित्परस्य व्यसने परे ॥ यानमाहुरुदासीनं त्वामुत्थापयति द्वयम् ॥ ५७ ॥ लिलंघयिषतो लोकानलं
घ्यानलघीयसः ॥ यादवाम्भोनिधीन्रुन्द्धे वेलेव भवतः क्षमा ॥ ५८ ॥ विजयस्त्वयि सेनायाः साक्षिमात्रेऽपदिश्यताम् सा २
फलभाजि समीक्ष्योक्ते बुद्धेर्भाग इवात्मनि ॥ ५९ ॥

रिपोरिति तद्द्वयमुक्तपक्षद्वयं कर्त्तृ उदासीनमनुद्युंजानम् ईदासतिमानजा कारस्येकारादेशः । त्वामुत्थापयति प्रेरयति । तदुभयफलाभावान्न ईदृक्कालो न कदावि
दपि लभ्यत इति भावः ॥ ५७ ॥ तत्र स्वशक्त्युपचयं तावद्दर्शयति ॥ ॥ लिलंघयिषत इति ॥ लोकान्लंघयितुमिच्छतः लिलंघयिषतः लंघयतेस्सन्नन्ताल्लटश्शत्रादेशः
अलंघ्यान्स्वयमन्यैर्लंघयितुमशक्यानलघीयसोऽतिगुरून् ॥ अत एव यादवाः अंभोनिधय इवेत्युपमितसमासः । वलेवेति लिंगात् । तान्यादवांभोनिधीन् भव
तः क्षमा तितिक्षा वेलेव कूलमिव । वेला स्थलेऽपि वारिधेरिति विश्वः । रुन्द्धे प्रतिबध्नाति । अन्यथा सर्वं संहरेयुरिति भावः ॥ ५८ ॥ अस्मद्व्यपश्चापयमपरोपदेशो नेवत्तेवि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

मा० टी० द्वि० १२ जयालाभायेत्याह ॥ विजय इति ॥ सेनायाः कर्म्म विजयः साक्षिमात्रे उदासीन एव फलभाजि त्वयि समीक्ष्योक्तेः सांख्योक्तेः आत्मनि बुद्धेर्मिहत्तस्य मूलप्र
कृतेः प्रथमविकारस्य कर्म्मभोगः सुखदुःखानुभवश्च अपदिश्यतां व्यवह्रियतामुक्तं त्वज्जयपराजययोः स्वामिगामित्वादिति भावः । संख्या अप्याहुः कर्त्रे
भवत्युदासीन इति सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य स्वावयति बुद्धिरिति च ॥ ५९ ॥ अथ परस्य व्यसनमाह । हृत इति । हिडम्बरिपुणा भीमसेनेन द्वयोर्मात्रोर
पत्यं द्वैमातुरः ॥ मातुरुत्संख्येति ॥ अणुत्पयः कारस्यानादेशो रपरः तस्मिन् राज्ञि जरासंधे सति द्वाभ्यां सपत्नीभ्यां अर्द्धं सः प्रसूतो जरस्या नाम पिशाच्या
संहितं चेति कथा संयति युधि हते सति चिरस्य चिरकालेन चिराय चिररात्राय चिरस्याद्याश्चिरार्थका इत्यव्यये ष्वमरः ॥ मित्रव्यसनी मित्रध्वंसवाने

हृते हिडम्बरिपुणा राज्ञि द्वैमातुरे युधि ॥ चिरस्य मित्रव्यसनी सुदमो दमघोषजः ॥६०॥
नीतिरापदि यद्गम्यः परस्तन्मानिनो ह्रिये ॥ विधुर्विधुन्तुदस्येव पूर्णस्तस्योत्सवाय सः ॥६१॥

व्यसने विपदि भ्रंशाइत्यमरः ॥ दमघोषाज्जातो दमघोषजश्चैद्यः सुखेन दम्यत इति सुदमः । एकाकित्वात्सुखसाध्य इत्यर्थः ॥६०॥ कथं चिदयं पक्ष्योऽभ्युपेत्यवा
देनोक्तः ॥ वस्तुतस्तु पूरा रामस्यौमपक्ष एवेष्टः ॥ साधुसंवादि च ॥ यथाह कामन्दकः । यदा समर्थं प्रसमं निहन्तुं पराक्रमाद्वर्जितमप्यमित्रम् ॥ तदाभि
२ याप्यादुहिता निकुर्वन्नुपानतः कर्त्रा न पीडनानि स्याभिप्रेत्याह ॥ नीतिरिति ॥ परः शत्रुः आपदि गम्य इति नीतिः इति यत्तदापदि गमनं मानिनः शौर्याभिमान
वंतः ह्रिये लज्जाकरमित्यर्थः ॥ पूर्णः उपचितः शत्रुः सः विधुस्तस्य मानिनो विधुंतुदति ॥ हिनस्तीति विधुंतुदो राहुरिव विध्वरुषोस्तुदः इति खश् । उत्सा
मः ॥ तस्योत्सवाय च अतो बलिना बलवाने व यातव्यः बलिनश्च व यथेति भावः ॥६१॥ नहि पूर्वोदाहृतो मन्वादिशास्त्रविरोधः स्यादित्याशंक्याह ॥ ॥ माघः १२

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्यदिति ॥ उक्तं खलमन्ने गैलं प्रसस्य पीडनक्षममिति यावत् ॥ सत्वं खलमन्यत् शास्त्रेणानियंत्रितमन्वादिशास्त्रेणोद्गृहीतं परव्यसनकाले निर्मितं सन्तमन्य
त् ॥ उक्तं चानुक्तं खललक्षणमन्यशब्दार्थः ॥ तयोः सापेक्षत्वनिरपेक्षत्वशब्दाभ्यां मिथो विरोधान्नैकशास्त्रार्थत्वं संभवतीत्यर्थः ॥ अत्र दृष्टान्तमाह । तेज
स्तिमिरयोः समानमधिकरणं ययोस्ते तयोः ॥ भावः । समानाधिकरणमेकाश्रयत्वं कुतः । न कुतश्चित् ॥ तयोः सहावस्थानविरोधादिति भावः । तस्माद्
नयोरुदितहोमवच्छिन्नशास्त्रार्थत्वादिति तेन तत्र शास्त्रविरोधो न बाधक इति भावः ॥ ६२ ॥ तर्हि किमिदानीं कर्तव्यमित्यत आह ॥ ॥ इन्द्विति ॥ इन्दुप्रसङ्गस्य पार्थेन गारस्प्यग
भाना५ मो गमनं ऽत्र हृद्द्दृ ष्विगमश्चेति घप्रत्ययः । मा कारि जातु अन्न क्रियतामित्यर्थः ॥ यावत्तावत्परिच्छेदे कालेनैव धारणापोरिति विश्वः । कृञः कर्मणि लुङ् । माङि लुङि ।

~~सीतिसपदीसगम्यानरतान्यानिनोयुस्थेसविपुर्पिपुनुपस्पेपसूर्तासतसोतवापस ॥ ६८ ॥~~

अन्यदुक्तं खलं सत्वमन्यच्छास्त्रनियंत्रितं ॥ सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ ६२ ॥
इन्दुप्रसङ्गमस्तावत्कारि मा सन्तु वेदयः ॥ आस्माकदन्तिसान्निध्यात् समनीभूत भूरुहः ॥ ६३ ॥

सान्नीरर्थेन प्राङ्योगे इत्यट्प्रतिषेधः । किन्तु वेदयश्चेदिदेशाः ॥ अस्माकमिमे अस्माकाः । युष्मदस्मदोरन्यतरस्यां खञ्चेति विकल्पादणप्रत्ययः । तस्मिन्नणि तवकममकावे
स्माकाविति आस्माकादेशः । सन्निधिरेव सान्निध्यं स्वार्थे ष्यञ् । आस्माकानां दन्तीनां सान्निध्यात् समनीभूताः । गात्राणां भङ्गात् तत्वं वीभूताः । भूरुहोऽयेषां तेतथोक्ताः । सन्तु वेदि
पात्रैव क्रियतामित्यर्थः ॥ अत्र प्रस्तुताप्रस्तुतेनैव स्वकार्यं शाग्यत इति कार्येयथार्थोऽलंकारः ॥ कारणं गम्यते यत्र प्रस्तुतावत्कार्यवर्णनात्तु प्रस्तुतत्वेन सम्ब
॥ ॥ ६३ ॥ ॥ ॥ ॥ ॥ इदं तद्यथायोगमभ्युपात इति लक्षणात् ॥ ॥ ॥ ॥ ॥ ॥ ॥ ६३ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



निरुद्धेति॥ किंविंद्याश्चार्हायादवावीवक्षोधान्यादिप्राप्तिः। आसारः सुहृद्बलं प्रसरस्तृणकाष्ठादिप्रवेशः। धान्यो दैवीवध इत्यमरः। आसारस्तु सुहृद्बलं प्रसरस्तृणकाष्ठादेः प्रवेश इति वैजयन्तीति निरुद्धायैस्तथोक्ताः॥ अन्यत्र निरुद्धा वीवधानां पर्याहाराः परनाम्नां स्कन्धवाह्यक्षीराद्याहरणसाधनभारविशेषाणां आसारप्रसरौ प्रवेशनिर्गमौ यैस्तेन तथो। वीवधो भारः पर्याहारश्च कार्यन्त इति हलायुधः॥ व्रजन्मार्गो गोष्ठमू॥ व्रजः स्याद्गोकुलं गोष्ठमिति वैजयन्ती। गाश्च मा हिंसन्तीति प्रत्युदि-
षेधीत्युपरुंधन्तु व्रजे गाश्च मा हिंसन्त्वा मशीनां दूसवनीनार्थः। इत्यावृपवेदिति क्रम्यन्ते। प्रथिवजावक्थितकर्म। अन्यदीप्सितकर्म॥ ६४॥ नहि पार्थप्रार्थना-
याः गतिरित्याशयो पेक्षैव गतिरित्याह। यजतामिति। पाण्डवो युधिष्ठिरो यजतां यागं करोतु। इन्द्रः स्वर्गमवतु रक्षतु। इनोऽर्कस्तपतु प्रकाशतामू॥ वयं द्विष-

नीरुद्धवीवधासारप्रसाराः गा इव व्रजमू॥ ~~ओंस्नांकं मन्तिंसांनिधंसां~~ उपरुंधन्तु दाशार्हाः प्र-
शंसा हिंसन्तीर्द्विषः॥६४॥ यजतां पाण्डवः स्वर्गमवत्विन्द्रस्तपत्विनः॥ वयं हनाम द्विषतः स-
र्वः स्वार्थं समीहते॥६५॥ प्राप्यतां विद्युतां संपत्संपर्कादर्करोचिषाम्॥ शस्त्रैर्द्विषां छिरश्छेदप्रो-
च्छलच्छोणितोक्षितैः॥६६॥ ॥

स्वार्थे तोऽरीन्हनाम हन्याम। अद्रुतमस्यापि चेत्यडागमः सर्वत्र प्राप्तकालेऽलोट्। तथा हि सर्वो जनः स्वप्रयोजनं समीहते। न तु संधत्ते। इन्द्रादिसमान योगक्षेमः पार्थ इ-
त्यर्थोऽर्थान्तरन्यासः॥ ६५॥ प्राप्यतामिति॥ किंच द्विषतां शिरश्छेदेन प्रोद्यता उच्छलताच्छोणितेनोक्षितैः सिक्तैः शस्त्रैरर्करोचिषां संपर्कात् विद्युतां संपल्लक्ष्मीः प्राप्यतामिति
दर्शनालंकारः॥ ६६॥ इतीति। इतीत्थं संरंभिणः संक्षुभितस्य बलस्य बलभद्रस्य वाणी शालेरव्य देवताः समायाः सदोगृहस्य भित्तीनां प्रतिध्वाने प्रतिध्वनि रामः



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्राज्ञेनेत्यर्थः। भयादन्ववदन्। अन्वमोदन्तेवेत्युत्प्रेक्षा॥६७॥ ॥निशम्येति। अधःकृतमक्षजमिन्द्रियजं ज्ञानम्॥ येन सोऽधोक्षजो हरिः। स्ति-
नाः शेषस्य शेषावतारस्य बलभद्रस्य गवीर्वाचः॥ स्त्रीणां गवीः गोरतद्धितलुकीति टच्॥ टित्त्वान्ङीप्॥ निशम्य श्रुत्वा निशाम्यतीति श्रवणार्थान्निशामयतेर्ल्यबिति
भट्टमल्लः॥ तन्न शाम्यतेर्णिदं रूपं। अन्यथा विषयस्येति स्यात्॥ अत एव वामनः। निशाम्यनिशाम्यशब्दौ प्रतिभेदादिति। इह हेतावावापतत्त्व बृहस्पतेः शिष्या-
योद्धवायाभिधानं वक्तुं दृशा दृक्कोणेन प्रस्तावसदृशम्॥ अदिशत्। अतिसृष्टवान्॥ प्रस्तावः स्यादवसर इत्यमरः॥६८॥ ॥भारतीति। अथ धर्मस्य
अनन्तरं॥ ॥उद्धव आहितभारोऽर्थगौरवं यस्यां तां तथ्यां यथार्थां भारतीं अनुद्धतं अगर्वितं यथा तथा। गदस्याग्रज अग्रे प्रजात इति सागल्भ्यो

इति संरम्भिणो वाणी बलस्यालेख्यदेवताः। सभामित्ति प्रतिध्वानैर्भयादन्ववदन्निव॥६७॥ निशाम्यताः शेषगवीरभिधातुमधो-
क्षजः॥ शिष्याय बृहतां पत्युः प्रस्तावमदिशद्दृशा।॥६८॥ भारतीमाहितभरामथानुद्धतमुद्धवः॥ तथ्यामुतथ्यानुजवज्ज-
गादाग्रे गदाग्रजम्॥६९॥ सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुशलपाणिना॥ निर्धारितेऽर्थे लेखेन खलूक्त्वा खलु वाचिकम्॥७०॥

क्तिः। उतथ्यस्य महर्षेरनुजो बृहस्पतिः उतथ्यावरजो जीव इत्यमरः। तद्वत्तेन तुल्यं जगाद। तेन तुल्यं क्रिया चेद्वतिरिति वतिप्रत्ययः। उचितगतेयमुपमा॥
॥६९॥ किं जगादेत्यत आह। संप्रतीति। संप्रति मुशलपाणिना बलभद्रेण केवलशूरतेति ध्वनिः। उक्ते सति वक्तुमसांप्रतं अयुक्तं साधूक्तत्वात्। आभासस-
मानयोगक्षेमप्रसंगादिति ध्वनिः॥ सांप्रतशब्दस्यालयत्वात्तद्योगे एकधपेत्यादिना नमुन्॥ तथाहि॥ लेखेन पत्रेण साधेवाच्ये निर्धारिते निर्णीते सति वा-
चिकं वाहृतार्थवचः संदेशवचनमित्यर्थः। संदेशवाग्वाचिकं स्यादित्यमरः। वाचो व्याहृतार्थायामिति ठक्। उक्त्वा खलु न वाच्यं खल्वित्यर्थः॥ खलु राघः प्रति-
षेधेन्यो वाक्यालंकारे। निषेधवाक्यालंकारजिज्ञासानुनये खल्विति यश्च इत्यमरः। अलंखल्वोः प्रतिषेधयोः प्राचां क्त्वेति क्त्वाप्रत्ययः। इह न पादादौ खल्वा

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पा·टी॰
१५

स्यइति निषेधस्यो द्वेजकायाभिप्रायार्थत्वान्नज र्थस्तत्वन्नाद स्याप्युद्वेजकत्वान्न्यदेव पादादौ प्रयोगो नदुष्यत्तत्प्रत्ययं नुसंधेयम्॥ लिखितार्थवा
विकामिववलोक्ते यदुक्तिरनवकाशेति चाक्यार्थप्रति बिम्बकारणात्स्पष्टस्ताव द्दृष्टान्तः॥ स्तुतिव्याजेन निंदावगमाद्व्याजस्तुतिः तल्लक्षणं तु अग्रे
वक्ष्यामः॥७०॥ तर्हि तूष्णींभावं नेत्याह॥ तथापीति॥ तथापि बलभद्रेणानिर्णीतेपि तेन बहुस्यमपि बलभद्रस्वैवेत्यर्थः॥ ॥ गुरुत्वेवयं गौरवमा
दुरस्त गौरवं जल्पतो जल्पने प्रयोजकर्तृत्वम प्रयोजककर्तृत्वं प्रकृत्वमुपेति॥ अतोवदाम्येत्यर्थः॥ न हि पतिद्वेः सादरं पृष्टस्य प्रियेषु पत्नी तूष्णीं
भावोयुक्त इति भावः॥ ॥७१॥ ननु रामे रागवस संवृत्तये योक्तमुपस्थापितं किं तेन वाक्यमस्तीत्याशंक्य वृथाप्रपंचो यमिति हृदि निधाय सुवन्निन्याह॥ वेरोरि

तथापि यन्मय्यपि ते गुरुः स्त्रियेव गौरवमू॥ तस्योजककर्तृत्वमुपेति मम जल्पतः॥७१॥ वर्णैः कृतिपयैरेव ग्रथितस्य स्वरैरिव॥ ॥
अनन्ता वाङ्मयस्याहो गेयस्येव विचित्रता॥७२॥ वह्निपि स्वेच्छया कामं प्रकीर्णमभिधीयते॥ अनुज्झितार्थसम्बन्धः प्रबन्धो दु

रुदाहरः॥७३॥ ॥

वाङ्मयस्य वाङ्मयस्यानन्ता अनेकतिपयैः परिमितैः वर्णैः पंचाशदात्मकैः वर्णात्मकाक्षरैः सप्तभिरेकैकैरेवेति पद्यैः स्वरैर्निषादादिभिर्ग्रथितस्याव गुंठितस्य वा वाङ्मयस्यैवाद्भुतजा
लस्य एकावोऽनित्यमयटमिच्छन्नितिसार्थे मयट्॥ गीतयुत इति गेयं तस्य गेयस्य गानस्येव विचित्रता॥ अवान्तरभेदेनानन्तारचनाभेदादनन्
ता अपरिमिताभवतीत्यर्थः॥ अहो आश्चर्यं तेन साधूक्ते पि विशेषानन्याः न्यया पि वक्तुमपस्तीति भावः॥ तस्य तदुक्तत्वान्न सवास्तीत्यन्वयः॥ प्र
त्यमव यव मिवोपात्तानादनेकैवेयमुपमा॥७२॥ अथ ललितवचनाधिक्षेपद्वारेणात्मवचनस्य गौरवमाह॥ वह्नीति॥ स्वेच्छया स्वप्रतिभानुसारेण प्रकी
र्णमसंगतं वह्नपि कामं यथेष्टमभिधीयते॥ किन्तु अनुज्झितार्थसंबन्धः पदार्थसंगतिर्यस्मिन्सप्रबंधः॥ सन्दर्भो दुरुदाहरो दुर्वचः॥ हरतेः खल्प्रत्ययः॥ रामे

॥ ॥७३॥ पाञ्चसंगतोऽपि श्लोकोऽतिसरलत्वान्नव्याख्यातः

रामः
५८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रदीयसीमिति ॥ कुशलाः वक्तारः प्रदीयसीं सुकुमारीं श्लक्ष्णतरां वन्तथापि घनामर्थगुर्वीं अन्यत्र सान्द्रां कदलीदलकल्पामित्यर्थः। अनल्पैर्बहुभिर्गुणैः शब्दा
दिसन्तुश्लिष्टकल्पितां चित्रां विचित्ररूपां वाचं पटीं ग्रन्थिमिव विस्तारयन्ती · समवागप्येवंविधैवेति स्तुतिः रामवाक्यनैवंविधेति निन्दावगम्यते · अत्र श्लेषस्य प्र
द्धविषयासंभवेन सर्वालंकारबाधकत्वादुपमाप्रतिस्थापितप्रतिमाप्रतिमश्लेषोऽमपीत्यलंकारसर्वस्वकारः॥ एवं पूर्वोपमायां निर्विषयत्वप्रसंगात्
श्लेषप्रतिमोत्थापितेयमुपमैवेत्यन्ये ॥ १४॥ अथोद्धवः स्वसिद्धान्तं वर्णयिष्यन् ॥ स्तुत्या गर्वं परिहरन् हरिमभिमुखीकरोति ॥ विशेषेति ॥ विशेषानवान्त

प्रदीयसीमपि घनामनल्पगुणकल्पिताम् ॥ विस्तारयन्ति कुशलाश्चित्रां वाचं पटीमिव ॥१४॥ विशेषविदुषः शास्त्रं यत्तवोद्ग्रा
ह्यते पुरः॥ हेतुः परिचयस्थैर्ये वक्तुर्गुणनिकैव सा ॥१५॥ प्रज्ञोत्साहावतः स्वामी यतेताधातुमात्मनि ॥ तौ हि मूलमुदेष्यन्त्या जी
गीषोरात्मसंपदः ॥१६॥

रभेदानवैतीति। विशेषविदान्तस्य विशेषविदुषः विशेषज्ञस्य गभिशापादिसमासात् द्वितीयासमासः॥ तवपुरो यच्छास्त्रं यत्कथ्यते उद्ग्राहितमुपन्यस्तमितिवैजयन्ती
सान्तउद्ग्राहणमित्यर्थः॥ विधेयप्राधान्यात्स्त्रीलिंगत्वम् ॥ वक्तुरुक्तापितुः परिचयस्थैर्ये। अभ्यासदा[illegible]हेतुर्गुणनिकाऽऽम्रेडितं आम्नातमेवेतियावत् ॥ न
तुवैदुष्यप्रकटनमितिभावः॥ गुणआम्रेडने चौरादिः रापासञ्श्रन्थोवुन् ततः संज्ञायां वृत् ॥ कात्यूवैस्पैकारः ॥१५॥ स्वस्य तिस्वमतमुपन्यसति। प्रज्ञेति
अतो अस्मात्कारणात् स्वमस्यास्तीति स्वामी ॥ स्वामिन्नैश्वर्ये १८ इति निपातनम् ॥ प्रज्ञोत्साहौ मंत्रोत्साहशक्ती आत्मनि स्वस्मिन्नाधातुं संपादयितुं यतेत स्व

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा. टी. द्वि. ९६

समुभयशक्तिमान्भवेदित्यर्थः॥ कुतः हि यस्मात्तौ देष्यंत्याजिगीषोर्वित्स्यंस्याजिगीषोरात्मसंपदः प्रभुःशक्ते मूलं निदानं अत्रोत्साहग्रस्तं दृष्टान्ता
र्थः॥ यथोत्साहस्तथा मंत्रोऽप्यात्योनतु केवलोत्साह इति वलक्ष दूपक्षापवादः॥७६॥ उत्साहवन्मन्त्रापि तस्याप्येनुक्तं तस्याः प्रयोजनमाह। सोपधा
नामिति॥ ये धीराः धीमन्तः॥ सोपधानां सविशेषां उक्तियुक्तामित्यर्थः॥ अन्यत्र सर्गेऽनुक्तां सोपधानामित्यर्थः॥ उपधानं विशेषस्याजेऽनुके प्रणये पि
येति विश्वः॥ स्थेयसीं स्थिरतरां अवलांद स्थेयसीं वा स्थिरसूत्राद्यौ पसुनि प्रियस्थिरेत्यादिना स्थादेशः॥ धियं खट्वयन्ति खट्वां पर्यङ्कं कुर्वन्ति आश्रयन्ती

सोपधानां धियं धीराः स्थेयसीं खट्वयन्ति ये॥ तत्रानिशं निषण्णास्ते श्र
मं जातु न जानते॥७७॥ स्पृशन्ति शरवत्तीक्ष्णाः स्तोकमन्तर्विशन्ति
च॥ बहुस्पृशापि स्थूलेन स्थीयते बहिरश्मवत्॥ ॥७८॥ ॥ ॥ ॥

त्यर्थः॥ शयनं मंच पर्यंकं पल्यंकाः खट्वया समाइत्यमरः॥ तत्करोति तत् पावष्ट इति णिच्॥ ते धीरास्तत्र खट्वायामनिशं निरन्तरं निषण्णा विश्रान्ताः सन्तः
जातु कदाचिदपि श्रमं खेदं न जानते॥ न विदन्ति श्रमः खेदो ध्वस्तादेशिति लक्षणात्॥ धीपूर्वक एवोत्साहः सेव्यः न तु केवल इति सर्वे धीराश्रयणीयेत्यर्थः॥ अत्र रामः ९६
धियारोप्यमाणाया खट्वया प्रकृतश्रमापनोदनरूपोपकारार्थेनात्तथा परिणामालङ्कारः॥ आरो

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्प मारास्य प्रकृतोपयोगित्वे परिणाम इति लक्षणात्॥७७॥ ॥अथ प्रज्ञाप्रज्ञयोर्द्वाभ्यां वैषम्यमाह॥ स्पृशन्तीति॥ तीक्ष्णा निशितप्रज्ञाः शरवच्छरेणतु
ल्यं स्तोकमल्पमेव स्पृशन्ति अन्तः कार्यस्यान्तः प्रविशन्तीति च॥ अल्पायासेन बहुकार्यं साधयन्तीत्यर्थः॥ बहुस्पृशा व्यापिनापि स्थूलेन मन्देन बृहता च॥
अश्मसाम्यमश्मोपलेपनतुल्यमश्मवत्॥ तेन तुल्यं क्रियाचेद्वतिः॥ बहिरेव कार्यस्येति भावः॥ स्थीयते स्थितिः क्रियते मूढो ह्यल्पस्य हेतोः बहुप्रयस्यन्
मूषकग्रहणाय गिरिखवित्खननमितिवत्परिहासास्पदं भवतीति भावः॥ तद्धितगतेपस्पप्रमा॥७८॥ ॥आरम्भन्त इति॥ अज्ञा अल्पं तु क्षुद्रमेव कार्यमारभन्ते॥
प्रक्रमन्ते कामं अत्यंतं व्यग्रास्त्वरितास्त्र भवंति नेव पारं गच्छन्तीति भावः॥ कृतधियः शिक्षितबुद्धयस्तु महारंभा महोद्योगा भवंति निराकुला अव्यग्रास्तिष्ठन्ति॥ पा

आरम्भन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवंति च॥ महारंभाः कृतधियस्तिष्ठन्ति च निराकुलाः॥७९॥ उपायमास्थितस्या
पि नश्यन्त्यर्थाः प्रमाद्यतः॥ हन्ति नोपशयस्थोऽपि शयालुर्मृगयुर्मृगान्॥८०॥ ॥

रंगच्छन्तीति भावः॥७९॥ ॥अथ प्रज्ञावानपि न प्रमाद्येदित्याह॥ उपायमिति॥ उपायमास्थितस्य प्राप्तस्यापि उपा[ये]नैव कार्यं साधयतोपि इत्यर्थः किमुत व्यग्रस्येति भा
वः॥ प्रमाद्यतः अनवस्थानस्य प्रमादोऽनवधानतेत्यमरः॥ अर्थाः प्रयोजनानि नश्यन्ति तथा हि शयालुर्निद्रालुः शीङो ग्रहणादालुच्॥ मृगान्यातीति मृगयुर्व्या
धः मृगय्वादयश्चेत्यौणादिकप्रत्ययान्तो निपातः व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि स इत्यमरः॥ उपशेरतेऽस्मिन्निति उपशायो मृगमार्गस्थायिनो व्याधस्यात्मगुप्तिस्था
नं गर्तविशेषः॥ एरजित्यच्प्रत्ययः॥ तत्र तिष्ठतीत्युपशायस्थोऽपि मृगान् हंति॥ विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः॥८०॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उद्दुंजानः २ ... ४५८५:८८५८॥

पा.पी.दि० एवं प्रज्ञायाश्चावष्टंभकत्वमुक्तं अथोत्साहस्यास्याप्याह ।उद्देजुमिति जेतुमिच्छुर्जिगीषुरेकएवक्षादद्वादशानपिराजमण्डलाद्दादशादित्यउदितक्रूरो दिनकरः सो८
९७ व्याप्रियमाणआदित्यः सइवेहान्तकृत्सोहं प्रत्यजंएवनातु निरुद्योगइतिभावः ।उद्देजुंकल्पते उदयायप्रभवति उत्साहशक्तिरेवप्रभुशक्तेरपिमूलमिति
ना भावः ॥जौलिंगत्वाद्दैवतं नानानामसूर्यत्वमितिश्रुतिः ।प्रतिमासमादित्यभेदाद्द्वादशत्वम् ।तद्वदेकस्यैवद्वादशात्मकम् ॥द्वादशात्मादिवाकरइत्यभिधानात् ।ते८
वार्यमादयः पुराणोक्ताइत्यर्थः राजानस्तु ।अरिर्मित्रंमित्रं रमतःपरम् ॥तथारिमित्रमित्रंचविजीगीषोःपुरःसराइति ।पंचेतिशेषः ।पार्ष्णिग्राहस्ततःप८
श्चादाक्रन्दस्तदनंतरम् ॥आसारावनयोश्चैवविजिगीषोस्तुपश्चतः ॥२ पार्ष्णिग्राहासारआक्रन्दासारश्चेत्यर्थः ।अत्रचत्वारइतिशेषः ।एवंसतिनवजी

उद्देजुमत्यजन्तीहांराजमुख्यादद्वादशानपि ॥जिगीषुरेकोदिनकृदादित्येष्विवकल्पते ॥८१॥बुद्धिशास्त्रःप्रकृत्यंगोघ
नसंवृतिकंचुकः ॥ ॥चारेक्षणोदूतमुखःपुरुषःकोपिपार्थिवः ॥८२॥रामचन्द्रायनमः ॥ ॥ ॥ ॥ ॥ ॥

जीषुर्द्वादश ।अरेश्चविजीगीषोश्चमध्यमोभूम्यनन्तरः ।अनुग्रहेद्वयोःसमर्थोव्यस्तयोर्वधे ।मण्डलाद्बहिरेतेषांउदासीनोबलाधिकः ॥इतिमध्यमोदासीना८
भ्यांसहद्वादशवेतितव्याः ।पुराणोपमा ।८१॥ ॥८२॥उपमायमास्थितस्यात्रराजानंप्रमाद्योदतयुक्तम् ॥अप्रमादप्रकारमाह ।बुद्धीति ।बुद्धिरितिशास्त्रंयप८
स्यसबुद्धिशास्त्रः अमोघधारेणात्वाज्ञस्यादितिभावः ॥प्रकृतयःस्वाम्यमात्यादिराज्यांगानि ।राज्यांगानिप्रकृतयइत्यमरः ।ताएवांगानिशारीरंयस्यप्रकृत्यं
९१ गः ।तदेकैकस्यैवराज्यैवकस्यादितिभावः ॥घनादुर्भेद्यासंवृतिर्मन्त्रगुप्तिरेवकंचुकः ।कवचोयस्यसतथोक्तः ।मंत्रभेदेराज्यभेदादितिभावः ॥चरतीतिचरः ।प राम: ९७
अनुग्रहेसंहतानांव्यस्तानांचवधेप्रभुः ४+

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गूढपुरुषद्वितीयः । स एवाक्षराणां चक्षुर्यस्य स चारेक्षणः ॥ अन्यथा स्वपरराष्ट्रवृत्तान्तादर्शनादन्धस्येव परदेशे विपात इति भावः स्यात् । सन्देशहरो दूत इत्यमरः ॥ दूत एव मुखं यस्य स दूतमुखः ॥ अन्यथा मूकस्येव वाग्व्यवहाराभावात्तत्साध्यसंवादिकार्यप्रतिबन्धः स्यादिति भावः । एवंभूतः कोपि पार्थिवः कोपि पुरुषः ॥ अन्य एवायं लोकविलक्षणः पुमानित्यर्थः ॥ अतो राज्ञा सर्वदा बुद्ध्यादिसंपन्नेन भवितव्यमित्यर्थः ॥ एतदेवाप्रमत्तं अन्यथा स्वपुरुषहानिः स्यादिति भावः ॥ अत्र कोपीति राज्ञि लोकसर्वधर्षसंबन्धोत्पादनरूपातिशयोक्तिः ॥ सा च बुद्धिशस्त्र इत्यादिरूपकनिर्व्यूढेति तेन सहाङ्गाङ्गिभावेन सङ्करः ॥ ८२ ॥ ननु थौपायसाध्य इति । यदुक्तं क्षात्रमेव कर्त्तव्यमिति तत्रोत्तरमाह ॥ तेज इति ॥ कालं जानातीति कालज्ञः अस्यायं काल इति विदुष इत्यर्थः ॥ आतोनुपसर्गे कः न(

तेजः क्षमा वा नैकान्तः कालज्ञस्य महीपते । नैकमोजः प्रसादो वा रसभावविदः कवेः ॥ ८३ ॥
कृतापचारोपि परैरनाविष्कृतविक्रियः ॥ असाध्यं कुरुते कोपं प्राप्ते काले गदो यथा ॥ ८४ ॥ ॥ ॥

त्रिगुपधेत्यादिना कविधेः समासे कर्मोपपदस्येव बलवत्त्वभाषणात् ॥ तस्य महीपते तेजः क्षात्रमेवेति क्षमैवेति वा । एकान्तो नियमो नास्ति ॥ किन्तु यथाकालमुभयमप्याश्रयणीयमिति भावः ॥ तथाहि रसान् शृङ्गारादीन् भावान्निर्वेदादीँश्च वेत्तीति वित्तस्य रसभावविदः भावग्रहणं संकरात्पन्तः कवेः कर्यपि तु रेकं केवलमोजः प्रौढत्वं यत्नमेकः प्रसादः सुकुमारत्वं वा । नकिन्तु तत्तद्रसानुगुणेन यथायोगमुभयमप्युपादेयं दृष्टान्तालङ्कारः ॥ ८३ ॥ यदुक्तं क्रियासमभिहारेण विराध्यन्तं क्षमेत क इति तत्रोत्तरमाह ॥ कृतेति ॥ परैः शत्रुभिः कृतोपचारोऽपकारो यथान्वयस्य सः तथापि अनाविष्कृतविक्रियः अन्तर्गूढविकारः अत एव साध्यो(

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पा.टि.द्वि मतिसमाधेयः सनारदोयथा रोगइव इवव क्षयथाशब्दइति दशाडीकालेवलक्षयावसरेप्राप्तेसति कोपंकुरुते प्रकुप्यतीत्यर्थः ॥ न दुर्गतम् ॥ वहेदमित्रं स्कंधेन
१८ यावत्तृप्यकाल स्यपर्यस्ययः तमेव वागते कालेभिन्द्याद्घटमिवाश्मसीति ॥८४॥ इत्तम्परीक्षन्तव्य मित्याह ॥ मृदीति ॥ मृदुनाम्दुवृत्तिनाव्यवाहितं अन्त
हितंतेजः अर्थान्भोक्तुंप्रकल्पते ॥ प्रभवति ॥ तथाहि ॥ प्रदीपोप्यन्नरस्थयामध्यस्थयाद्शापावर्त्मास्नेहः तैलादिकमोदत्ते ॥ अन्यथाश्रयमेवनिर्वापयादिति ॥ तत्रक्षान्त
पूर्वकंक्षात्रंफलतीतिसर्वथाप्रथमतः क्षन्तव्यमितिभावः ॥ दशावर्त्मावस्थायांस्नेहंतैलादिंकेसरइतिविग्रहः ॥ विशेषणसामान्यसमर्पणादर्थान्तरन्यासः
॥८५॥ तर्हिपौरुषंमाभून्नित्यंक्षममाणस्यदैवमेव श्रेयो विश्वास्यतीत्याशंक्याह ॥ नेति ॥ विनकाभिन्नः ॥ दिष्टमितिमतिरस्येतिदैष्टिकः ॥ गृहीतदैव

मृदुव्यवहितंतेजो भोक्तुमर्थान्प्रकल्पते ॥ प्रदीपः स्नेहमादत्ते दशयाभ्यन्तरस्थया ॥८५॥
नालम्बते दैष्टिकतां न निषीदति पौरुषे ॥ शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ॥८६॥ ॥ ॥

प्रमाणक इत्यर्थः ॥ दैवंदिष्टंभागधेयंमित्यमरः ॥ अस्तिनास्तिदिष्टंमतिरितिठक् ॥ तस्यभावोदैष्टिकतामेवनालंबते सर्वथायत्नरहितस्यविनाशादितिभा
वः ॥ तथापौरुषेपौरुषकारेप्यवाधरप्रत्ययः ॥ ननिषीदतिनतिष्ठ[illegible]ति दैवप्रातिकूल्येतस्यवैफल्यादितिभावः ॥ किन्तुसत्कविः सम्यक्रूपयिताशब्दार्थौ
विवतयोः काव्यशरीरत्वादितिभावः ॥ यथाहवामनः ॥ अदोषौसालंकारौशब्दार्थौकाव्यमिति ॥ द्वयंदैवंपौरुषंचापेक्षते अतः पौरुषमप्यावश्यकमेवकि रामः
मु मगुरगोर ॥ ॥ ॥ ॥ ॥ ॥ न्तुकालेकर्त्तव्यमितिशेषः ॥८६॥ ॥ ॥ ॥ ॥ ॥ ॥ १८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अक्षान्ते ॥ फलमाह ॥ स्थायिनइति ॥ रस्यते स्वाद्यत इति रसः । शृङ्गारादिरसने स्वादनार्थत्वात् ॥ रस्यन्त इति ते रसा इति निर्वचनात् । तस्य रसस्य
रसवत्तः स्थायिभावस्य रत्यादेः रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा । जुगुप्सा विस्मयस्तथा ॥ स्थायिभावाः प्रकीर्त्तिता इत्युक्तेः । तस्यैकस्यैव कै
वार्थे स्वानुरूपे प्रयोजने भूयांसः संचारिणो व्यभिचारिणो भावा निर्वेदादयः । विभावादीनामप्युपलक्षणमेतत् । यथा प्रवर्त्तन्ते । तदुक्तम् । विभावेष्वनु
भावेष्व सात्त्विके व्यभिचारिषि । आनीयमानस्स्वादुत्वं स्थायीभावो रसस्स्मृतः इति ॥ तथा स्थायिनः स्थिरस्य क्षान्त्या कालप्रतीक्षमाणस्येत्यर्थः ॥ त ८
स्यैकस्य नेतुर्जिगीषोर्नायकस्यार्थे प्रयोजने भूयांसो महीभृतो राजानः प्रवर्त्तन्ते स्वयमेवास्य कार्यं साधयन्तीत्यर्थः ॥ अत्र क्षत्रिय इति भावः । केचित्तु

स्थायिनोर्थे प्रवर्त्तन्ते भावाः संचारिणो यथा ॥ रसस्यैकस्य भूयांसस्तथा नेतुर्महीभृतः ॥ ८७ ॥
तन्त्रावापविदा योगैर्मण्डलान्यधितिष्ठता ॥ सुनिग्रहा नरेन्द्रेण फणीन्द्रा इव शत्रवः ॥ ८८ ॥

भावशब्दस्यापि रसपरत्वमाश्रित्य यथा संचारिणः शृङ्गारादयः अन्ये रसाः स्थायिनः स्थिरस्यैकस्य मुख्यस्य रसस्यार्थे प्रवर्त्तन्ते । तथास्मिन्नेकस्य
वीरस्य शृङ्गारादय इति व्याचक्षते । उपमालङ्कारः ॥ ८७ ॥ श्रीकृष्णाय वक्रो विजयते ॥ ॥ हरे ॥ ८७ ॥ क्षान्तिपक्षे गुणान्तरमाह ॥ तन्त्रेति । तन्त्रावापौ स्वपर
राष्ट्रचिन्तने अपन्यत्र तन्त्रावापशास्त्रौ षट्प्रयोगं च वेत्तीति यस्तेन तन्त्रावापविदा तन्त्रं स्वराष्ट्रचिन्ता । आवापः परचिन्तनं । शास्त्रौषधान्नमुख्येषु तन्त्र
मिति वैजयन्ती । योगैः समाद्युपायैरन्यत्र देवताध्यानेज्यायोगः संहननोपायध्यानसङ्गतिशक्तिष्विति अमरः ॥ मण्डलानि स्वपरराष्ट्राणि गामं हे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टी·द्वि· ऊर्द्धिदेवतायतनानि विधाधितिष्ठतान रेन्द्रेणाराज्ञा विषयैर्घेनवा नरेन्द्रोवान्निके राज्ञि विषयैर्घेव कष्यतइति विग्रहः॥ शात्रवं फलाशीङ्गइवस्फनि
१९ ग्रहाइवस्फनिग्रहामुख्येनगाद्या· एषवपक्ष्कतापक्तविषः॥ श्लोकः॥ उपमैवेति कृचित्॥८८॥ प्रज्ञोत्साहवतः स्वामीत्यत्रेतावतैव प्रभुशक्तेर्मू
लमित्युक्तम्॥ तदेव व्यनक्ति· करोति॥ उत्तुङ्गोमहोन्नमः प्रज्ञाबलंमंत्रशक्तिरेव बृहत्प्रधानमूलं यस्य सः उत्साह एव पादपः करेणावलि
नापूर्वेषां वर्द्धनीयां वर्द्धनीयामाद्यात्र-बलिहस्तान्नावरुःकराद्रुत्समरः॥ पृथयसीं पृथुतरां· रत्नतोहलादेर्लघोरिति रफादेशः॥ प्रभुशक्तिं
म तेजोविशेषां सप्रताप·प्रभावस्यपत्तेजः कोशदण्डजमित्यमरः॥ फलति॥ प्रसूयते॥ फलनिष्पत्तौ स्वतः प्रज्ञापूर्वक एवोत्साह फलतित्वतो विपरी

करष्वेषामुत्तुङ्गः प्रभुशक्तिं पृथीयसीम्॥ प्रज्ञाबलबृहन्मूलः फलत्युत्साहपादपः॥८९॥
अनल्पत्वात्प्रधानत्वाद्वंशस्येवेतरे स्वराः॥ विजिगीषोर्नृपतयः प्रयान्ति परिवारिताम्॥९०॥

तस्तु क्षिन्नमूलो वृक्षइव शुष्यतीति भावः॥ रूपकालंकारः॥८९॥ विम्बरूपकारिणा स्तु विश्वमपि विधेयं स्यादित्याशयेनाह॥ अनल्पेति॥ अनल्पत्वात्प्रा
शोत्साहाधिककालाभिज्ञत्वादत एव प्रधानत्वान्मुख्यत्वाल्लाभिज्ञत्वात्। अन्यत्रानल्पत्वात्प्रधानत्वान्नायकस्वरत्वाद्वंशस्य वंशवाद्यस्य षड्जरेखा वीणायाश्च स्वराः
दिश्वाद्याइव अथवा आश्रयत्वाद्वंशइव वंशस्तत्कालविहितस्वरउच्यते· तस्मेतरेस्वरा·षड्जादयइव विजिगीषोर्नृपतयो ऽन्ये परा इल वर्त्तिनो राजानः परिवारि
तां विधेयतां प्रयान्ति॥ तत्कार्यमेवसाधयन्तीत्यर्थः॥ तस्मादिह परूपकर्त्तव्यमित्यर्थः॥९०॥ अपीति॥ किञ्च अनारंभमाराम्यस्वयमकिञ्चित्कुर्वाणस्यापि रामः
१९

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विभोः प्रभोः व्यापकस्य च परैरन्यैर्न पतिभिः शत्रुभिर्यादिभिश्चोत्पातितताः संपादिताः जनिताश्चार्थाः प्रयोजनानि विहायस आकाशस्य शब्दा इव गुणा
तां विशेषगुणतां क शब्दोक्तगुणास्तं व्रजन्ति॥ शक्तो हि राजा स्वयमुदासीन एव आकाशवत् स्वयं हि प्रवक्ता यस्य संदेशः प्राप्नुवन् शब्दानिव स्वार्थमपि स्वकीयतां
नयतीत्यर्थः॥ गुणास्त्वाकृतिशब्दादित्येन्द्रियग्राह्यत्वेन निर्विशिष्टा इति वैजयन्ती॥ २१॥ यातव्येति॥ किञ्च एकार्थमेकप्रयोजनं स एव तनुः सूत्रं तन्तु प्रोतायां (
स्यूतायां एकगुणाभिलाषिणामित्यर्थः। प्रपूर्वाद्वेञः कर्मणि क्तः। वचिस्वपि यजादीनां सम्प्रसारणम्। यातव्यो भियेण यितव्यः। अरिः पार्ष्णिग्राहः पृष्ठ
उपधावी ते आदियेषां ते पूर्वोक्ताः पंक्तिराः स्थिताः अतएव सा नाना रत्नमालिकान्तस्य प्रसाधिकद्युतिर्महातेजा नायकः शक्तिसम्पन्नो जिगीषुर्नायकायते य

अन्योऽन्यपरंभ माणस्य विभोरुत्पातितताः परैः॥ व्रजन्ति गुणतामर्थाः शब्दा इव विहायसः॥ २१॥ यातव्य
पार्ष्णिग्राहादिमालायामधिकद्युतिः॥ एकार्थतन्तुप्रोतायां नायको नायकायते॥ २२॥ षाड्गुण्य
मुपयुञ्जीत शक्त्यपेक्षो रसायनम्॥ भवन्त्यस्यैवमङ्गानि स्थास्नूनि बलवन्ति च॥ २३॥ ॥ राम॥

ध्यम इति रिवाचरति॥ स्वयं पेव सर्वोत्कर्षेण वर्त्तत इत्यर्थः॥ नस्माद्धि मत्पकर्त्तव्यमिति भावः। नायको नेता श्रेष्ठो हारमध्यमणिश्चेतीति विश्वः। उपमानादाचारे इ ऐ(
इति क्यङ्। अकृत्सार्वधातुकयोर्दीर्घः॥ नायक इत्युपमा। अन्यथा शास्त्रविरोधादेकार्थत्वं लिन्मत्ररूपकत्वेऽधिष्ठाननिरोधात्। त्वेनारोप्यमाणतन्तुत्वं स्यैवो
दाहृतत्वात् तन्व क्षिप्तं स्तपेव युक्तं तद्रूप्त्वात् पार्ष्णिग्राहादिमालायामिसत्रापि रूपकमेव तदनुप्राणितात्रेयं उपमेत्य साङ्गि थावेन सङ्करः॥ २२॥ अथ विम्बरूप
करणप्रकारमाह॥ षाड्गुण्यमिति॥ शक्तिं प्रभावादित्रयबलं वापेत घ्नतिशक्त्यपेक्षः सन्नुपयायद्युः शक्तिर्बले प्रभावादाविति विश्वः॥ बहुणाएव षाड्गुण्य

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



संधिविग्रहादिषट्कं चानुवर्णपादिनामस्वार्थे घ्यञ्जन्तदेव रसायनं औषधमुपभुञ्जीत सेवेत रसायनं विहंगोपि जराव्याधिभयौ धुष्वयति विग्रहः॥ एवसति अ
स्योपयोकुरंगानि स्वाम्यादीनि गाङ्गानि व स्थास्नूनि॰ स्थिराणि कालान्तरक्षमाणीत्यर्थः॥ जिस्थ्यश्च ८ वलवन्ति व परपीडाक्षमाणि व भ
वन्ति॥ श्लिष्टपरंपरितरूपकम्॥ २३॥ स्थानइति॰ किञ्च॰ स्थानेअत्राकथ विषयेप्राप्तवतांक्षमावतां॰ अंगिनां सप्ताङ्गिनां राज्ञां नृशीरिणां वृशात्त्वाप
भावाद्यनुसारेण व॰ व्यायामेपारे॰ षाड्गुण्य प्रयोगे गमना देव सतीत्यर्थः॥ वृद्धिरूपवयोराज्यस्याशरीरस्यानिभावः॥ विपक्षे वाध कमाह॥ अय८
॰ थावलंब्यात्यातिक्रमेण॰ यथासादृश्ये घति॰ अव्ययीभावेन समासः॥ आरम्भो व्यायामः॥ क्षयसम्पदो॰ न्त्पन्नहानि निदानमादिकारणम्॥

स्थानेप्राप्तवतांप्रात्याव्यायामे वृद्धिरङ्गिनाम्॥ अयथावलमारम्भो निदानं क्ष
यसम्पदः॥ २४॥ नदीधीतारं वैदीनां भवांत्तमवमंत्तमा॰॥ निह्नत्यरीनेकपदे

॥ ॥ यउदात्तस्वराविव॥ २५॥ ॥

ति१ अङ्गनामितिः॥ तस्मादस्माकमुस्माच्चेद्यात्क्रन्दनमश्नेयस्करमिभावः॥ अत्र विन्नो घस्यापि श्लिष्टत्वात्तद्वाक्तिमूलो व सुनाव स्त्रध्वनि ४॥ अत्तोद
यायकुङ्गिनायोपस्यं गम्यत इति संक्षेपः॥ ॥ २४॥ ॥ फलितमाह॥ तदिति॥ तत्तस्मादस्त्यात्अकार्यत्वात्त्वं वैदीनांमीनानां रक्षिभुपालं भवान्मा
वमंस्त॰ नावन्यस्व॰ मन्यतेर्माङि॰ लुङ्॰ अनुदात्तत्वादिडागमाभावः॥ कुतः॰ यश्चेद्यः॰ उदात्तः॰ सतिशिष्टोदात्तस्वरस्सतिशिष्टानुदात्तानिवादरीन्
एकपदे एकस्मिन्पदेन्यासे॰ स्कृतिङन्त पदलक्षणेवा निहन्ति॥ हिनस्ति॰ नीचैः करोतिव॥ अतिक्रूरत्वात्ता अनुदात्तं पदमेकवर्जमिति पीथाषावल॰ ॥ अह्मप्रुतः॥ २५॥ ॥ राम: २०



Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



[illegible]

नवायमेकाकी किन्नः करिष्यतीति मन्तव्यमित्याह ॥ मावेदीति ॥ असौ वेदिराडेकएकाकी नतो जेतव्यः सुजय इति मावेदि ॥ मान्नापि वेनेकं संमिता माड्
लुङ् । यद्यस्माद्वेदिराट् राज्ञश्चन्द्रस्य यक्ष्मा राजा वा सौ यक्ष्मेति वा क्षयरोगो रोगाणामिव महीभृतां समूलः । समष्टिरूपः ॥ यथाह वाराहः ॥ अने
करोगानुगतो बहुरोगपुरोगमः ॥ राजयक्ष्मा क्षयः शोषो रोगराडिति विश्रुतः । नक्षत्राणां द्विजानां च राजाभूग्न दयं पुरा ॥ यच्च राजा च यक्ष्मा वा राय
जक्ष्मा ततो मत इति ॥ अतो दुर्जेय इति भावः ॥ एतेन विरस्य मित्रव्यसनी सुदमोदम घोषजः इति निरस्तम् ॥ २६ ॥ अतोऽस्य सर्वराजसमष्टिता
मेव द्राष्यं भावयति ॥ सम्पादितेति । संपादितफललाभः शारायत्वयस्य सः फलं लाभश्च राग्र योधिति विश्वः । सपक्षः सुंकं कादिपत्रयुक्तश्च परे

मावेदिपदसावेको जेतव्यश्चेदिराडिति ॥ राजयक्ष्मेव रोगाणां समूहस्स महीभृताम् ॥ २६ ॥ सम्पादितफलस्तेन सप
पक्षः परभेदिनः । कौर्मुकेणेव गुणिना वाणः सन्धानमेष्यति ॥ २७ ॥ ये चान्ये कालयवनशाल्वरुक्मिद्रुमादयः ॥
तमःस्वभावास्तेऽप्येनं प्रदोषमनुगामिनः ॥ २८ ॥

षी ये दन्तः शत्रुविदारणः बाणो वा णासुरः शारश्च गुणिना शौर्यादिगुणवता अधिजेन यतेन वैधेन कर्मणोऽप्रमवतीति कार्मुकं कर्मणाउकञ् । तेनैव सन्धा
नं संधिमेष्यति । अतो नैकाकीति भावः । अत्राप्युपमाश्लेषोपंअतङ्गेदात् ॥ २७ ॥ ये चेति । किञ्च । अन्ये च कालयवनशाल्वरुक्मिद्रुमादयो राजानस्तमस्स्व
भावास्तमोगुणात् ॥ मका । अत एवेति प्रदोषं तमसमेनं चैद्यमनुयायिनः अनुयास्यन्तः साहाय्यादिति भावः । भविष्यति गम्यादय इति णिनिः भ
विष्यदर्थे । अकेनोर्भविष्यदाधमर्णयोरिति प्रतिषेधात् द्वितीया । यथा ध्वान्तरजनीमुखं यातीति । तं । छिदिति वर्जुनालक्ष्माराध्वानिः । राहोध्वान्ते गु

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi ५

२+ प्रकोपवतः । प्रा. टि. दी. २१

ननु वाणादयोऽस्माभिरिदानीं कृतसंधाना विरोत्स्यन्तीत्यत आह ॥ उपजापइति । तेन वैयेनकृतोऽल्पोऽप्युपजापो भेदः भेजो दोपजापावित्यमरः ॥ त्व
यि कोपवतः तान् वाणादीन् अनिलः साग्नीनेधानिव काष्ठं दार्विन्धनं त्वेधइध्ममेधस्समित्स्त्रियाम् ॥ ॥ इत्यमरः ॥ आशु दीपयिता प्रज्वल
यिष्यति । दीपेर्ण्यन्ताल्लुट् । अन्तर्वैराः संहता आपदि सति शत्रौ विश्लेष्यन्तीति भावः ॥ ९९ ॥ ततः किमत आह । बृहदिति । बृहत्सहायो महास
हायवान् ॥ क्षोदीयान् क्षुद्रतरोऽपि । स्थूलदूरेत्यादिना यणादिपरलोपः ॥ पूर्वगुणश्चाकार्यान्तं गच्छति ॥ तथा हि । अपां समूहं आपः तस्य समूहइ
त्यण् ॥ तेन गच्छतीत्यापगा नगापगा गिरिनदी महानद्या गंगादिकया संभूय मिलित्वा अंभोधिमभ्येति । क्षुद्रोऽप्येवं ताद्दक्सहायवीर्येण घ

उपजापं कृतस्तेन तानाकोपवतस्त्वयि ॥ आशु दीपयिताल्पोऽपि साग्नीनेधानिवानिलः ॥ ९९ ॥ बृहत्सहायः कार्या
न्तं क्षोदीयानपि गच्छति ॥ संभूयांभोधिमभ्येति महानद्या नगापगा ॥ १०० ॥ तस्मादिद्वारणपमिञ्चात्तेयेव येवोभयोनृपाः
॥ अभियुक्तं त्वयेनन्तेगन्तारस्त्वामतः परे ॥ १०१ ॥ मखविघ्नाय सकलमित्यमुत्याप्य राजकम् ॥ हन्त जातमजाता

र्कि मुवक्तव्यइत्यविघ्नवदार्थः ॥ विशेषेण सामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ॥ किञ्च न केवलं शत्रोरसाध्यत्वं मित्रविरोधश्चाधिको नर्थ इत्या
ह ॥ तस्मेत्यादिना । एतस्य चैद्यस्य मित्राणि नृपाः ये चैते तव अमित्रान् पान्ति उभये । त्वया ऽभियुक्तम भियातं एनं चैद्यं गन्तारो गमिष्यन्ति गमेः
कर्तरि लुट् । अतः परे उक्तोभयव्यतिरिक्ता स्तव मित्राणि तस्यामित्राश्चेत्यर्थः त्वां गन्तारः ॥ १०१ ॥ ततः किमत आह । मखेति । इत्यमनेन प्रकारेण
इत्यमस्थमुरिति थमुप्रत्ययः । मखस्य विघ्नाय विघातायसकलं राजकं राजसमूहं गोत्रोक्षोक्षेत्यादिना वुञ् । इत्याप्य क्षोभयित्वा हन्त अजाता

भावः । २१

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टी·ष·
५

अजगणन्निति· याः कुकुरस्त्रियो यादवांगनाः शोवहुशाः· वह्वल्पार्थाच्छस्कारकादन्यतरस्यामिति शस्प्रत्ययः· अग्रतमपि प्रियं जाता-
वेकवचनं प्रियानित्यर्थः· अभिमानिनीनां भावो अभिमानिता· त्वतलोर्गुणवचनस्य पुम्वद्भावो वक्तव्यः· नाजगणन्नगणयन्तिस्म· गणेः
चौरादिकाल्लुङि· ईद्गणादन्यतरस्यामस्य पाक्षिकमीत्वं· ताः कुकुरस्त्रियो मधौ वसन्ते सति प्रवर्त्तमाने सति· मधुश्चैत्रे वसन्ते चेति

अजगणन्नगणशाः प्रियमग्रतः प्रणतमप्यभिमानितयानयाः॥ सति मधावभवन्मदनव्यथाविधुरिता धुरि ताः कुकु-
रस्त्रियः॥१५॥ कुसुमकार्मुककार्मुकसंहितद्रुतशिलीमुखखण्डितविग्रहाः॥ मरणमप्यपराः प्रतिपेदिरे किमु मुहु-
र्मुमुहुर्गतभर्तृकाः॥१६॥

विश्वः· मदनव्यथयाविधुरिताः विह्वलिताः सत्यः· धुरि अग्रे अभवन् अवर्त्तन्त· स्वयमेव पुरः प्रवृत्ता इत्यर्थः॥१५॥ कुसुमेति· गतभर्तृकाः
वियोगिन्यः· नद्यृतश्चेति कप· अपराः काश्चिदङ्गनाः कुसुमकार्मुकस्य कामस्य कार्मुके संहितैर्द्रुतैर्जवलैः शिलीमुखैः शरैः खण्डि-
तविग्रहाः पाटितशरीराः सत्यो मरणमपि प्रतिपेदिरे· पुनः पुनः मुहुर्मुहुर्मूर्छुरिति· किमु वक्तव्यमित्यर्थः॥१६॥ ॥ ॥·

श्रीहरिः
५

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अथ कस्याञ्चित्प्रोषितभर्तृकायां बन्धुजनाभ्यामनंत्रिभिः कुलकेनाह॥ हृदि स्थितेति॥ हे सुतनु शुभांगि॥ अंबार्थनद्योर्ह्रस्वः॥ दीर्घान्तरपदो
बहुव्रीहिः॥ अस्यथागुणः स्यात्॥ हृदि स्थितो इनेष्ठा॥ अस्क विमोचनमित्यर्थः॥ हृदः सञ्ज्ञा दप्रत्ययेन अप्॥ तेन ववदनाम्बुभियोः लंकरणा
यमस्तं॥ रत्नाणांविकृतिरपि अयं तनोति इति स्यायादिति भावः॥ गम्यमानक्रियापेक्षया चतुर्थी॥ तदपि तथापि सम्प्रति मयोर्व संते
सन्निहिते सन्निहितो त्सवे सति अभुणोधिगमं प्राप्तं अमंगलं धिक् निंदतीत्यर्थः॥ धिक् भर्त्सन निन्दयोरित्यमरः॥ धिग्पर्यादिषु त्रिषु द्वि

हृदिस्थितांवदनां गुरु हृश्रियः सुतनु सत्यमलंकरणायते॥ तदपि सम्प्रति सन्निहिते मधावधिगमं धिगमंगलमश्रुणः॥ ७८॥
त्यजतिक ष्टमसौ वविरादसून्विरहवेदनयेत्यघशंकिभिः॥ प्रियतया गदितां स्त्वयि बांधवैरवितथावितथा सखिमा गिरः॥ ७९॥ ॥

तिद्वितीया॥ अतोमा हरेत्यर्थः॥ ७८॥ त्यजतीति॥ प्रियतया इष्टतया॥ अघशंकिभिरनर्थोत्प्रेक्षिभिः प्रेम यस्य अतिभयाद्यपदेयाति भावः॥ वा
न्धवैस्त्वयि विषये गदिताः उच्चारिताः कष्टं असौ अबलाविरहवेदनाया अविरादसून् प्राणान्त्यजति त्यक्ष्यति॥ वर्तमानसामीप्ये लङि
ति एवंविधा गिरः उक्ताः हे सखि॥ विगतं तथात्वं यासां ताः वितथाः अनृताः वितथं त्वनृतं वच इत्यमरः॥ बहुव्रीहावि शेष्य लिंगता॥ प्राप्य
णादित्वाद्ध्रस्वः॥ ततोनञ्समासः॥ अतथाः सत्या मा वितथाः मा भूताः॥ वृथातिशोके न मामस्थाद इत्यर्थः॥ विपूर्वात्तनोतेर्लङि॥ थासः॥ त
नादित्वात्तथासोरिति विभाषा असि वोलक्॥ अनुदात्तोपदेशेत्यादिना अनुनासिकलोपः॥ न माङ्योग इति अडागमप्रतिषेधः॥ ७९॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



मा॰टी॰प॰
६

नेति॰ किंच॰ असौ ते प्रणयी दूरगतो दूरस्थोपि महं वसन्तोत्सवं॰ मह उत्सव उद्धव इत्यमरः॰ नातिवर्त्तते नातिक्रामति इति वन्धुतया वन्धु
समूहेन॰ ग्रामजनवन्धुसहायमप्यस्तु ल॰ उदितैः हृक्तैः॰ वदेः॰ कर्मणि क्तः॰ अतैः सत्यवचनैः॰ सत्यं तथ्यमृतं सम्यगित्यमरः॰ वहिः॰ प्रणयि
नः तद्देवं दैवागतस्य स्वरं कंठगतं शब्दं निशम्य श्रुत्वा॰ शमु दर्शन इति चौरादिकात् ल्यप्॰ मित्वाद्ध्रस्वः॰ ल्यपि लघुपूर्वादित्ययादेशः॰ वधूः॰
अमृतैः सुधाभिरिव निर्ववौ निर्ववार॰ वातेर्लिट्॰ निर्वारं सा निवृत्तिसुखं॰ ॥१८॥ मधुरयेति॰ मधुरया मनोहरया मधुना वसन्तेन वो

नखलु दूरगतोप्यतिवर्त्तते महमसाविति वन्धुतयोदितैः॥ प्रणयिनो निशमय्य वधूर्वहिः स्वरमृतैरमृतैरिव निर्ववौ॥
॥१९॥ त्रिभिर्विशेषकम्॥ मधुरया मधुबोधितमाधवीमधुसमृद्धिसमेधितमेधया॥ मधुकरांगनया मुहुरुन्मदध्वनिभृता नि

धिता विकासिता॰ पुष्पधर्मः पुष्पिता सूपवर्धते॰ तासां माधवीनां अतिमुक्तलतानां॰ अतिमुक्तः पुण्ड्रकः स्याद्वासन्ती माधवी तथेत्य निभृता॰ मू॰ २
मरः॰ मधुसमृद्ध्या मकरन्दसंपदा समेधितमेधया संवर्द्धितप्रतिभया॰ अत एवोन्मदस्य तीव्रस्य मधुरैः पवाधव॰ तद्ध्वनिवि
भर्त्ती त्युन्मदध्वनिभृत॰ तया तद्भृता मधुकरांगनया मुहुर्निभृताक्षरमलक्षणया स्थितनादं यथा तथेत्यर्थः॰ अथवा सर्वः शब्दो वर्णा श्रीरामः
त्मक एव व्यंजकविशेषाभावादस्फुट इति मतमाश्रित्य उक्तं॰ सर्वपथीनाः कवय इति॰ उज्जगे॰ उच्चैर्गीतं गायतेरविवक्षितकर्म ६
काद्भावे लिट्॰ वन्धवैषम्याद्हितसममतापदगुंफन इति लक्षणात् समताख्यो गुणः॥२०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

म्लानेति॰ अरुणिताः अरुणीकृतानि अविलानि शैलवनानि यया सा मुहुः पथिकान् विरहिणः अपि तापिनः सन्तापवतो विदधती॰ उर्वरे
वोर्व्वीकेरुन्नता॰ अव्ययः सर्वनाम्नामकच् प्राक्टेरित्यकच् प्रत्ययः॰ विकचा विकसिता या किंशुकसंहतिः॰ पलाशकुसुमराशिः॰ सा द्रव
यवहह्निश्रियं दवाग्निशोभामुद्वहत्॰ निदर्शनालंकारः॰ इति वसन्तवर्णनं॥२१॥ अथ ग्रीष्मवर्णनमारभते॰ रवीत्यादि॰ यत्र भुवो शिरी

अरुणिताखिलशैलवना मुहुर्विदधती पथिकान्परितापिनः॥ विकचकिंशुकसंहतिरुच्चकैरुदवहद्दवहव्यभु
जः श्रियं॥२१॥ ग्रीष्मवर्णनं॥ रवितुरंगतनूरुहतुल्यतां दधति यत्र शिरीषरजो हरौ॥ उपययौ विदधन्नवमल्लि
काः शुचिरसौ चिरसौरभसंपदः॥२२॥

षरजांसि हरवः कान्तयः॰ रवितुरंगतनूरुहतुल्यता सूर्याश्वरोमसावर्ण्यं दधति॥ हरिद्वर्णा भवन्तीत्यर्थः॥ असौ शुचिः॰ ग्रीष्मः॰ शुचिः शुक्रे नृप
हूते भृंगाराषाढयोस्तथा॥ ग्रीष्मे ऋतौ॰ पिस्याहितिविश्वः॰ नवमल्लिकाः॰ पुष्पजातीप्रभृतयः स्त्रीलिंगा इत्यमरः॰ पुष्पमूलेषु बहुल
मिति लुपिति बहुलग्रहणात् लुप्॰ लुपियुक्तवद्व्यक्तिवचने भवतः॰ चिराच्चिरस्थायिनी सौरभसंपद्यासां ताः स्थिरगंधा इत्यर्थः॰ वि
दधन् कुर्वन्नुपाययौ प्राप्तः॥२२॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा.टी.ष. दलितेति·पाटलायाः अवयवाः पाटलाः·लुकप्रकरणेषु मूलेषु वकुलमितिवकुलग्रहणाद्लुक·तेषां ते कुड्मलाश्च दलिता विभिन्नाः कोमलपाट
७ लकुड्मलायेन तस्मिन्निजवधूनां श्वसितं तं निश्वासं विधत्ते अनुकरोतीति तथोक्तं ताद्दशी त्यर्थः·उन्मदाभ्रमन्तश्चालयो यस्मिंस्तस्मिन्नुन्मदभ्रम
दलौ मरुति ग्रीष्मानिले वातिवहतिसति·वातेर्लटः शत्रादेशः·विलासिभिर्विलसनशीलैः कामिभिः·वैवकलसकत्थश्रंभ इति घिनुण प्रत्ययः·
मदेन लोलं स्वापल्पमुपाददे म तेजातमित्यर्थः॥५३॥ निदधिर इति·वरोरुभिः स्त्रीभिः तत्क्षणात्स्नपनेन सद्यः सेकेन वारि तुषारभृता जलशीकर

दलितकोमलपाटलकुड्मले निजवधूश्वसितानुविधायिनि। मरुति वाति विलासिभिरुन्मदभ्रमदलौ मदलोलमल्पमुपाददे॥
॥५३॥ निदधिरे दयितोरसि तत्क्षणात्स्नपनवारि तुषारभृतस्तनाः। सरसचन्दनरेणुरनुक्षणं विचकरे च करेण वरोरुभिः॥५४॥

धारिण इत्यर्थः॥ तुषारो हिमक्षीरावितिशाश्वतः·स्तनाः दयितोरसि निदधिरे निहिताः·तेषां सन्तापशान्तये स्नानार्द्राश्चालिलिंगुरित्यर्थः·किं
च·करेण पाणिना·सरस आर्द्रश्चन्दनरेणुः घृष्टचन्दनपंकजश्चविच करे·विकीर्णः किरतेः कर्मणि लिट्·अद्धृततामिति गुणः·करेण श्रीहरि·
करोरुभिरिति पाठस्तु उत्तरपदक्षेपस्य इत्यूङ्प्रसंगाद्धेयः॥५४॥ ॥ ॥ ॥ ॥ ॥ ॥ ७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अथवर्षावर्णनमाह स्फुरती अधीरे चञ्चले तडितौ नयने इव तडिन्नयने यस्याः सा अगलिता अरिक्ता उरू पयोधरा महामेघा यस्याः सा अन्यत्र उरू वृत्तौ
पयोधरौ शरणं गत्वा मेघैकवल्लभाः तद्गलितं न पतितं न पलितं यस्याः सा जलधारावलिर्मेघपङ्क्तिः अत्र जलधरावलेर्मेघपयोधराणामवयवा
वयवविभागात्पृथक्निर्देशः अप्रतिपालितस्वसमया अनपेक्षितनिजवेलासती एकत्रयोगपद्यादन्यत्रार्थेर्याश्वेति जगतीधरं रैवतकं भूधरं प्रिय
मिव समयात् समागच्छत् याते र्लुङ् पयोजगतीशब्दयोः पचाद्यजन्तेन धरशब्देन षष्ठीसमासः अत्र विशेषणमहिम्ना जलधरावलो नायि

स्फुरदधीरतडिन्नयना मुहुः प्रियमिवागलितोरुपयोधरा। जलधरावलिरप्रतिपालितस्वसमयासमयाऽऽजगतीधरं॥
॥२५॥ गजकदंबकमेचकमुच्चकैर्नभसि वीक्ष्य नवाम्बुदमम्बरे। अभिससार न वल्लभमङ्गना न चकमे चकमेकरसं रहः॥२६॥

कालप्रतीतेः समासोक्तिः सति प्रियकमिवेत्युपमाङ्गेन संकीर्यते॥२५॥ गजेति नभसि श्रावणे मासि नभाः श्रावणिकश्च सः इत्यमरः अ
म्बरे व्योम्नि गजकदंबकमेचकमिव मेचकं श्यामलं कालश्यामलमेचकाः इत्यमरः उच्चैरत्युच्चैः उन्नतं नवाम्बुदं वीक्ष्याङ्गना एकः एकायनः
रसो रागो यस्य तमेकरसं रसान्तरातिरस्कृतरसमित्यर्थः कं वल्लभं प्रियं रहः एकान्ते न चकमे न कामयते स्म तथा नाभिससार च सर्वं वल्लभं स
र्वीपितन्नङ्गना चकमे अभिससार चेति नवाम्बुदस्योद्दीपकत्वादतिशयोक्तिः इच्छा कामनापूर्वकत्वादभिसरणस्य तयोरर्थक्रमबलीयस्त्वन्त्या
([illegible]) येन यमकवशात् पाठक्रमबाधेन योजना व्याख्येव॥२६॥ श्रीगणे

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा·टी·ष· ८

अनुपयाविति· धृतधनुर्वलयस्य धृतेन्द्रचापवलयस्य पयोमुचो मेघस्य संवन्धी निशावलस्य भावो शवलिमा विविक्ता· पृथ्वादित्वादिमनिज्वा· विर
विधाना नावर्णा उपला मणयो ययोस्तयोः कुराग्र लयोर्द्युतिविताने न कान्तिपुंजेन संवलिता मिलिता अंशवो निजनीली मभासो यस्य तथोक्तं· शेषा
द्विभाषेति कप्रत्ययः· वालिमान मुषो वत्स्यसुराहंकाराय हास्य हरेर्वपुरनुपयावनुवकार· तद्वद्भावित्यर्थः· उपमालंकारः· ॥२७॥ द्रुतेति· द्रुत
समीरणशीघ्रमारुतेन वलैर्वारिदैः क्षणं लक्षित व्यवहिता क्षणिका विभावतिरोधाने त्यर्थः· स्नातानुलिप्तवत्पूर्वकाले केत्यादिना समा

अनुपयौ विविधोपलकुण्डलघुतिवितानकसंवलितांशुकम्॥ धृतधनुर्वलयस्य पयोमुचः शवलिमा वलिमानमुषो वपुः॥२७॥
द्रुतसमीरचलैः क्षणलक्षितव्यवहितौ विटपैरिव मंजरी॥ नवतमालनिभस्य नभस्तरोरचिररोचिररोचत वारिदैः॥ ॥२८॥

सः· अचिररोचिर्यस्याः सा अचिररोचिर्विद्युत् द्रुतसमीरचलैर्विटपैः शाखाभिः क्षणलक्षितव्यवहिता नवतमालनिभस्य नवतमालेन सदृशस्य तद्वन्नील
स्येत्यर्थः· नित्यसमासः· नभस्तरुरिव तस्य नभस्तरोर्मंजरी गुच्छ इवारोचत· उपमालंकारः· अत्र नभस्तरोर्नभः श्लेषस्येति व्याख्यानेन तरुशब्दस्य व्याघ्रा
दिकृष्टार्थगोचरत्वात् तमालशब्देन विशेषवाचिना तन्नीलसामान्ये तत्पौनरुक्त्यमिति वच्छ्रमः· तमालशब्दस्येन्द्रनीलादिवन्नैल्यमात्रोपमा
नत्वात् तरुशब्दस्य स्वार्थवृत्तित्वेपि न पौनरुक्त्यमित्यन्ये·॥२८॥ श्रीहरिः ८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पटलमिति· पथिकांगनाकाचित्प्रोषितभर्त्तृका अतएवसपदि जीवितसंशयं मरणमेष्यती· निश्चितमरणेत्यर्थः· आशीनद्योर्नुमितिनुमभावः· अतएवसन
यनांबोः सबाष्पसखीजनस्य संभ्रमात् क्षोभात्· विधुरबंधुः संभ्रमदर्शनाद्विह्वलबन्धुजनाम् सती अंबुमुचां पटलं अबंधुरमशोभनं सदैन्यरोषमिति यावत्
प्रेक्षत· लङ्प्राट्श्चेतिश्रुद्धिः· तत्रविरहवेदनाक्षमायानायिकायामरणसाधनमेघपटलं वीक्षणवर्णनायां तद्वियोगलक्षणावस्थोक्ता· सा द्विविधा·
तद्वियोगस्तत्रैवस्यात् स्वप्नः संगमसंकल्पा जागरः कृशतारतिः ह्रीत्यागोन्माद मूर्छान्त इत्यनंगदशा दशैतावस्था संग्रहः· ॥२९॥ प्रवसत इति· ॥

पटलमंबुमुचां पथिकांगना सपदि जीवितसंशयमेष्यति· सनयनांबुसखीजनसंभ्रमाद्विधुरबंधुरबंधुरमैक्षत ॥२९॥
प्रवसतः सुतरामुदकंपयद्विदलकन्दलकंपनलालितः॥ नमयति स्म वनानि मनस्विनीजनमनोनमनो घनमारुतः॥३०॥

कंदलीभूकंदली· द्रोणपर्णी स्निग्धकंदा कंदलीभूकदल्यपीति शब्दार्णवे· तस्याः पुष्पाणि कंदलानि· फलेलुगित्यणो लुक्· विदलानां
कंदलानां कंपनेन लालित उपस्कृतः मनस्विनीजनस्य मनसां नमनो न्नमथिता मानिनीमानभंजन इत्यर्थः· कर्त्तरि ल्युट्· घनमाहतो मेघ
वायुः वनानि नमयति स्म· प्रवसतः प्रोषितान् सुतरामुदकंपयत्· उद्वेजितवान्· मनस्विनीमानमर्दनस्य वनमनं प्रोषितकंपाकिं यदि
तिभावः॥३०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लानां

मा·टी·ष जलदेति· निजया आत्मीयया स्वनसंपदा कृतः संमार्जनस्य मार्जनाख्यसंस्कारसहितस्य मर्द्दलमंडलस्य ध्वनेर्जयो यया सा तथोक्ता· मार्जनं नाम मर्दंगध्व
९ न्यर्थं भस्ममृद्दितास्येन पुष्करलेपनं जलदपंक्तिरुन्मदमुत्कटमदेन कलविलापिकलापिकदंबकमयूरवृन्दमनर्त्तयत्·॥३१॥ नवेति· नवकदंबरजो
भिररुणितमरुणीकृतमंबरमाकाशं यैस्तैः शिलीन्ध्राणां कदलीकुसुमानां यः सुगन्धः स एषामस्तीति शिलीन्ध्रसुगन्धिनः तैः गन्धस्येत्वे तदेका
न्तग्रहणादिप्रत्ययाश्रवणं· कंदल्यां च शिलीन्ध्रः स्यादिति शाश्वतः· नववायुभिः पुरन्ध्रिषु स्त्रीषु विषये अधिपुरंध्रि विभक्त्यर्थेऽव्ययीभावः·

जलदपंक्तिरनर्त्तयदुन्मदं कलविलापिकलापिकदंबकं· कृतसमार्जनमर्द्दलमण्डलध्वनिजयां निजया स्वनसंपदा॥३१॥
नवकदम्बरजोरुणिताम्बरैरधिपुरन्ध्रि शिलिंध्रसुगन्धिभिः· मनसि रागवतामनुरागिता नवनवा वनवायुभिरादधे॥३२॥
शमिततापमपोढमहीरजः प्रथमबिन्दुभिरंबुमुचोंभसां॥ प्रविरलैरचलांगणमंगनाजनसुगं न सुगन्धि न चक्रिरे॥३३॥

रागवतां कामिनां मनसि नवनवाः प्रकाराः· प्रकारे गुणवचनस्येति द्विर्भावः· कर्मधारयवद्भावात्सुपो लुक्· अनुरागिता आदधे· अनुरागमुत्पा
दित इत्यर्थः॥३२॥ शमितेति· अंबुमुचो मेघाः प्रविरलैः अंभसां प्रथमबिन्दुभिः शमिततापं अपोढमहीरजो निरस्तधूलिकं न तु पङ्कितमिति श्रीरामः
भावः· सुगन्धि सतप्रत्वात्तं काद्भूतसौरभं इह तदेकान्तत्वाद्गन्धस्येत्वं· अचलांगणं रैवतकांगणं· अंगणं चत्वराजिरे इत्यमरः· अंगनाजनस्य सुखेन ९
गच्छत्यस्मिन्निति सुगं· सुखसंचारमित्यर्थः· सुदुरोरधिकरण इति गमेर्डप्रत्यये टिलोपः· न न चक्रिरे· चक्रिर इत्यर्थः· द्वौ नञौ प्रकृतमर्थं गमयतः॥३३॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्विरदेति॰ द्विरददन्तवलक्षमं॰ वलक्षो धवलोऽर्जुन इत्यमरः॰ अंगोमगइव अंगमगस्तस्य छविः सा स्फुरिता यस्मिन् यस्मिन्न तथोक्तं॰ केतक्याः पुष्पं केत
कं॰ पुष्पमूलेषु बहुलमित्यणो लुक् लाद्धिस्त्रियः लुक तद्धितलुकीति ङीप्रत्ययस्यापि लुक्॰ घनघनौघविघट्टनया इति विश्वसंघो मेघौघो दिवोन्तरि
क्षाच्च्युतं कृशशिखं सूक्ष्माग्रं शशिखण्डमिवालक्ष्यत इत्युत्प्रेक्षा॥ २४॥ दलितेति॰ दलितमौक्तिकानां निष्पिष्टमुक्ताफलानां चूर्णं इव पाण्डुवो तिशुभ्रा
स्फुरिता ये निर्झराणां निर्झरशीकराः कणा इव धारवः कुटजपुष्पपरागकणाः स्फुटं दधिरे गृह्विडवनां दधिचूर्णानुकारविदधिरे चक्रिरे तदद्भु

द्विरददन्तवलक्षमलक्ष्यत स्फुरितमंगमगच्छविकेतकं॥ घनघनौघविघट्टनया दिवः कृशशिखं समशिखण्डमिवच्युतं॥
॥२४॥ दलितमौक्तिकचूर्णविपाण्डवः स्फुरितनिर्झरशीकरचारवः॥ कुटजपुष्पपरागकणाः स्फुटं विदधिरे दधिरेणु
विडम्बनाम्॥ २५॥ नवपयःकणकोमलमालतीकुसुमसन्ततिसन्ततसंगिभिः॰ प्रचलितोडुनिभैः परिपाण्डिमा शुभ
रजोभरजोलिभिरादधे॥ २६॥

रित्यर्थः॰ पूर्वोपमानुद्धृतानुप्राणितेयमुपमेति शंकरः॥ २५॥ नवेति॰ नवपयःकणावन्तवो दकविन्दुवत्कोमलानां मालतीकुसुमानां जातीपुष्पाणां सन्ततिषु
सन्तततसंगिभिः निरन्तरासक्तैः सुमनामालती जातीत्यमरः॥ अतएव प्रचलितोडुनिभैः परागभूषणात्संचरन्नक्षत्रकल्पैरित्यर्थः अलिभिः शुभ्रा द्विजो
भरात्परागपुंजाज्जातः शुभ्ररजोभरजः परिपाण्डिमा धवलिमा आदधे स्वीकृतः॥ २६॥ ॥६३॥ ॥२६॥ ॥६३॥ श्रीरामः॥ श्रीरामः

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥मा॰टि॰ घ॥ निजेति॰ प्रियविप्रयुक्तवधूजनचेतसां कमिति षष्ठी॰ अनवमी अक्षरशी किन्तु हन्त्री इत्यर्थः॰ अवतेः कर्त्तरि ल्युट् टिड्ढाणञ् इति ङीष्॰ नवनीपवनावलिः नवकदम्बकाननपंक्तिः॰ धृताः प
१० टोपमाः पटकल्पा वारिमुचो मेघा याभिस्ताः मेघपटच्छन्नाः इत्यर्थः तासां दिशां निजरजः स्वपरागं पटवासं विवितानामिव उत्प्रेक्षा॰ अधिकरते॰॥३७॥ प्रणा
येति॰ प्रणयकोपभृतः अतएव पराङ्मुखा रोषात् विमुखाः सांगाश्चोपसर्जनादसंयोगोपधादिति विकल्पात् ङाकारः॰ सपदि वारिधरारवभीरवः भीताः

निजरजः पटवासमिवांकिरद्धृतपटोपमवारिमुचां दिशां॰ प्रियविप्रयुक्तवधूजनचेतसामनवमीनवनीपवनावलिः॥३७॥ प्रणयकोप
भृतोऽपि पराङ्मुखाः सपदि वारिधरारवभीरवः॰ प्रणयिनः परिरब्धुमथांगनाववलिरे वलिरेचितमध्यमाः॥३८॥ विगतरागगुणोऽपि
न कोनकं ध्वलति वाति पयोदनभस्वति॥ अभिहितेऽलिभिरेवमिवोच्चकैरनन्ततेऽनन्ततेऽनवपट्पदैः॥३९॥ ॥३९॥ ॥

प्रियइति शेषः॰ अनन्तरं गर्जिताकर्णनानन्तरमेव प्रणयिन प्रियान्परिरब्धुमालिंगितुं वलिरेचितान्यालिंगनार्थमंगप्रसारणात्त्रिवलि रेचीकृ
तानि मध्यमान्यवलग्नानि यासां ताः सत्यो ववलिरे परिवृत्ताः॰ वलतेर्वकारादित्वान्न शशददवादिगुणानामिति एत्वाभ्यासलोपप्रतिषेधः॥३८॥ ॥
विगतेति॰ पयोदनभस्वति मेघमारुते वाति वहति सति॰ वातेर्लटः शत्रादेशः॰ विगतरागगुणोऽपि विरक्तोऽपि कोनवलति॰ सर्वोऽपि वलत्येवेत्य श्रीरामः
र्थः॰ एवमलिभिरुच्चकैः उच्चैस्तरां अनन्ततेऽनन्ते तस्मिन्नवनेऽभिहिते सति नवपट्पदैर्नन्दतइव नन्दते तत ॥१०॥
अ॰१ भिर्वेत्युत्प्रेक्षा नन्दतेर्भावे लिट्॥३९॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आरमयन्निति· अविरघुतेर्विघुतोभयादिवनतु तथा किन्तु रागादेवेतिभावः· किलेत्यलीके· भवनाद्भमराणां हादपयातुं निर्गन्तुं अनिह्नवः· भयगा
जान्तधैर्यवस्थिताइतिभावः· विन्दुरिच्छुरित्युप्रत्ययान्तो निपातितः· मन्मथेन मंथरं मलिनं संभाषन्त इति मन्मथमन्थरभाषिणः· कामपरवशा इतिभावः·
तरुणीगणास्तं प्रकृतं यदुवरं वनरेन्द्रस्तेषां गणामरमयन्नरमयन्तिस्म· अत्र भयेन रागनिगूहनान्मीलनालंकारः· मीलनं वस्तुना यत्र वस्त्वन्तर
निगूहनमिति लक्षणात्· तोष्पागन्तुकेन भयेन सहजं गतिरोधानात् आगन्तुकेन सहजतिरोधानः ॥७०॥ अथ शारदवर्णनमारभते ॥ ददतमि

आरमयन्भवनादविरघुतेः किल भयादपयातुमनिह्नवः ॥ यदुनरेन्द्रगणांस्तरुणीगणास्तमथ मन्मथमन्थरभाषिणः ॥७०॥
ददतमन्तरिताहिमदीधितिं खगकुलाय कुलायनिलायितां ॥ जलदकालमबोधकृतं दिशामपरथापरथावयवायुधः ॥७१॥

ति· रथावयवायुधश्चक्रायुधो हरिरन्तरिता हिमदीधितिं तिरोहितोष्णांशुं तथा खगाः कुलायपक्षिसंघाय कुलायेषु नीडेषु निलीयन्त इति कु
लायनिलायिनः· कुलायो नीडमस्त्रियामित्यमरः· तेषां भावस्तत्ता तां ददतं प्रयच्छन्तं पक्षिसंचारं प्रतिबध्नन्तमित्यर्थः· नाप्यत्ताछतुरिति
नुम्प्रतिषेधः· दिशामिति कर्मणि षष्ठी· अबोधकृतमबोधकारिणं· मेघावरणेन प्राच्यादिलुपतमित्यर्थः· जलदकालं प्रावृट्कालं अप
रथा प्रकारान्तरेणापप्राप मेघोदयोपाधिना प्रावृट् व्यवहारभाजं तमेव कालं मेघापायोपाधिना शारत्संज्ञयोपलेभ इत्यर्थः· कालोपेक

क्षिवेकेर

[illegible]

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



सहेति॰ अथ नाशकं निवर्त्तकं कीर्त्तनं यस्य सो घनाशनकीर्त्तनः॰ सहीरविकचमुत्पलमेव चक्षुर्यस्यास्तां॰ अच्छं शुभ्रं गलत्स्रंसमानं पयः दसनं तस्योपमामादृ
रूपं तस्याः क्षमा योग्या घनाभे घाधस्यास्ता तां अतएव क्षितिभृतोङ्कगतामुत्संगगतां दयितामिवेत्युत्प्रेक्षा॰ शरदमैक्षत॰॥४२॥ जगतीति॰ अशीतकरउ
ष्णांशुः करैः स्वांशुभिः जगति लोके निशायां भवं नैशं॰ निषाप्रदोषाभ्यां वेति विकल्पादण्प्रत्ययः॰ तमस्तिमिरमद्गुवत्॰ द्रावयति स्म॰ निरस्तवानित्य
र्थः॰ द्रुगतौ॰ णौ चङ्युपधाया ह्रस्वः॰ सन्वद्भावः॰ स्रवति द्रवति श्रृणोति प्रवति प्लवति च्यवतीनां वेत्यभ्यासस्येति विकल्पादित्वं॰ वियत्याकाशे वारिदवृ

सविकचोत्पलचक्षुषमैक्षत क्षितिभृतोङ्कगतां दयितामिव॥ शरदमच्छगलद्वसनोपमाक्षमघनां मघनाशनकीर्त्तनः॥४२॥
जगति नैशमशीतकरः करैर्वियति वारिदवृन्दमयं तमः॥ जलजराजिषु नैद्रमदुद्रवन्न महतामहताः क्व च नारयः॥ ॥४३॥

न्दमयं मेघसंघरूपं स्वार्थे मयट् प्रत्ययः॰ तमः अदुद्रुवत्॰ जलजराजिषु निद्राभवं नैद्रं॰ निमीलनं तदेव तमः॰ अदुद्रुवत्॰ तथाहि महतां महात्म
नामरयः क्व च क्वचनाप्यहताः॰ तत्किंतु सर्वत्र हता भवतीत्यर्थः॰ द्वितीयनिषेधप्रापितस्य प्रकृतार्थस्य हननस्य प्रतीयेन निषेधः॰ पुनः क्वेति॰ क्व
चारसामर्थ्यात्प्रकृतार्थपर्यवसानं वैधर्म्येण सामान्याद्विशेषणसमर्थनरूपोऽर्थान्तरन्यासः॥४३॥ ॥४३॥ ॥४३॥ ॥॰ श्रीरामः
११

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समयइति·समयःकालएवशरीरिणां·वलावलंवलावलेविप्रतिषिद्धं वानधिकारणावावीतिविकल्पाद्द्वन्द्वैकवद्भावः·करोतीतिप्रणिगदन्तः
प्रणिपादयन्तइवेत्युत्प्रेक्षा·नेर्गदनदपदपतेत्यादिनाणत्वं·शरदिहंसरवाःपुरुषीकृतस्वरानिष्ठुरीकृतेनाशमयूरायस्मिन्कर्मणितत्परुषीकृ
तस्वरमयूरंयथातथारमणीयतामपुःप्रापुः·पातेर्लिट्·लङःशाकटायनस्यैवेतिझेर्जुसादेशः·उस्यपदान्तादितिपररूपता·संहितायांछ
लोपेपूर्वस्यदीर्घोणः·शरत्प्रावृषोर्हंसमयूरकूजितमाधुर्यामाधुर्यविपर्ययदर्शनात्·कालएवप्राणिवलावलयोर्निदानमितिवक्तव्यमभू

समयएवकरोतिवलावलंप्रणिगदन्तइतीवशरीरिणाम्॥शरदिहंसरवाःपरुषीकृतस्वरमयूरंमयूरमणीय
ताम्॥४४॥तनुरुहाणिपुरोविजितध्वनैर्धवलपक्षविहंगमकूजितैः·जगलुरक्षमयेवशिखण्डिनःपरिभवो
ऽभिभवोहिमृदुःसहः॥४५॥

इत्यर्थः॥४४॥तनुरुहाणीति·पुरोग्रेधवलपक्षाविहंगमाःहंसपक्षिणः·हंसास्तुश्वेतगरुतइत्यमरः·तेषांकूजितैःविजितध्वनेःशिखण्डिनो
मयूरस्यतनोरुहाणिवर्हाणि·इगुपधलक्षणःकः·प्रत्ययः·अक्षमयाहंसजनेर्ष्ययेवजगलुर्गलन्तिस्म·कालप्रयुक्तस्यवर्हगलनस्याक्षमहेतुक
त्वमुत्प्रेक्ष्यइतिगुणहेतूत्प्रेक्षा·युक्तंचैतदित्याह·अभिभवःपरिभवःमृदुःसहः·असमसत्वोद्धिःपराजयदुःखितस्यागमात्शपुडपतइतिभावः·कारणे

नकार्यमर्थनरहलीर्णांनारसानसः·सकल्लस
मथर्णीविकृभ्यो·संकृ॰कृते·॥४४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



॥मा॰टी॰घ॥ अनुवनमिति॰ अनुवनं प्रतिवनं वहलो रागो यस्याः सा सा चासौ जपा च॰ ओड्रपुष्पं जपेत्यमरः॰ पुष्पेषु जातीप्रभृति त्वाँ विंगतामे वाधरस्तेन वा
॥९२॥ हारि प्रियवनराजिरेव वधूस्तस्याः मुखं प्राग्भागः स एव मुखं वक्रमिति श्लिष्टरूपकं तस्मिन् रुचिराणामीक्षणानां विभ्रम इव विभ्रमः शोभा या
सां ताः विकचवाणदलावलयो नीलझिंटीपत्रपंक्तयः॰ वाणो नीलझिंटी नीलझिंटी वैजयन्ती॰ अधिकं रुरुचिरे शुशुभिरे॰ उपमारूपयोः संकरः॥८

अनुवनं वनराजिवधूमुखे बहलरागजपाधरचारुणि॥ विकचवाणदलावलयोऽधिकं रुरुचिरे रुचिरेक्षणविभ्रमाः॥
॥४९॥ कनकभंगपिशंगदलैर्दधे सरजसारुणकेशरचारुभिः॥ प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता॥
॥५०॥

॥४९॥ कनकेति॰ कनकभंगाः स्वर्णखण्डा इव पिशंगानि दलानि येषां तैः सरजसा सरजसं सरजस्का इत्यर्थः॰ अत एव सरजसमिति सिद्ध
वीभाव इति वामनः॰ अथवा महाकविप्रयोगप्रामाण्यदर्शनात् अव्ययीभावदर्शनम् प्रायिकमिति पक्षाश्रयणात् बहुव्रीह्यर्थोपि साधुरेव॰ ॥श्रीरामः॥
तथा च सरजसं सरजसां वापि अरुणाकेसरास्तैः चारुभिः प्रियैः विमानिताः अवमानिताः मानवत्यो मानिन्यः तासां याः रुषो रोषास्तासां निर
सनैर्निरासकैः असनैः तन्नामकैः तरुभिः कर्तृभिः॰ असनः प्रियकः पत्रश्रेष्ठः सर्जकासनबन्धूकपुष्पाः प्रियकजीवकौ इत्यमरः॰ अवृथार्थता मानिरास ॥९२॥
कत्वाद् यथार्थता न्यायमानि इत्यन्वर्थकत्वं दधे॰ दधाते॰ कर्मणि लिट्॥५०॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मुखेवाति· ध्वस्तोनवातपो येनतद्ध्वस्तनवातपं· वालातपतामित्यर्थः· अंभसिकमलं· अंभोग्रहणांस्थलकमलनिवृत्त्यर्थं· अम्लानताद्योतनार्थं वा· यतोमदपा
टलाऽप्यकोरदृशांस्त्रीणांमुखसरोजरूपंमुखारविन्दशोभामनुचकार·॥ अनुपरत्याक्रमइतिपरस्मैपदंनिपातः· अतोनुकरणाद्धेतोः· कंपुमांसमु
त्सुकतांप्रेयसीमुखावलोकनकौतुकितांनालंभयत· नागमयत· सर्वथालंभयदेवतस्मात्कृत्वादित्यर्थः· एतेनोत्सुक्यवस्तुनाकार्यरूपकारणभूताकम
लदर्शनोत्थामुखस्मृतिर्व्यज्यतइतिवस्तुनालंकारध्वनिः· एतेनस्त्रीमुखसादृश्यपतयाकमलंत्वाधारेभासितपुंसउत्सुकतामलंभयदितिरंगराजव्याख्
यानंकाकस्यकार्ष्ण्यंधवलप्रसादशनिवदसंगतमितिमन्तव्यं· अलंभयदितिलभतेर्णिजन्तात्कर्मकर्तरिलङ्·। लभेश्चेतिनुमागमः· लभेश्चात्र

मुखसरोजरुचंमदपाटलामनुचकारचकोरदृशांयतः। ध्वस्तनवातपमुत्सुकतामतोनकमलंकमलंभयदंभसि॥ ४८ ॥ विगतस
स्यजिघत्समघट्टयत्कलमगोपवधूर्नमृगव्रजम्॥ श्रुततदीरितकोमलगीतकध्वनिमिषेनिमिषेक्षणमग्रतः॥ ४९ ॥ ॥ ॥

प्राप्त्युपसर्जनकगत्यर्थत्वात्कृतिबुद्धीत्यादिनाऽणिकर्तुः कर्मत्वे द्विकर्मकता· गत्युपसर्जनकप्राप्त्यर्थत्वेनैवेपरीत्यमित्युक्तम्· क्षितिंक्षितिंनेत्यर्थः·
॥ ४८ ॥ विगतेति·॥ इषेआश्वयुजमासि· स्यादाश्विनइषोप्याश्वयुजइत्यमरः॥ कलमगोपी· शालिगोप्त्री सा च सा वधूश्च कलमगोपवधूः·
स्त्रियाःपुंवदित्यादिनापुंवद्भावः· श्रुतः आकर्णितस्तयावध्वाईरितस्यश्रावयितस्यकोमलगीतस्यमधुरगानस्यध्वनिर्येनतं श्रुततदीरितकोमल
गीतध्वनिंश्रुतएवाग्रतोग्रेननिमिषतिविस्मयेनंहाभ्यामित्यनिमिषं· इगुपधलक्षणःकप्रत्ययः· तदीक्षणंयस्यतमनिमिषेक्षणं· घत्तुमर्तुवा·
काकतालीयन्यायेनसुखार्थस्यगानस्यकारणत्वकथनात्समाधिरलंकारः· कारणान्तरयोगात्कार्यसुकरंसमाधिरितिसूत्रं॥ ४९ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

 CC-0. Digitized by eGangotri and MDR-Delhi 

॥मा. टी. ष.

॥२७॥

लोलेति· अयुजो विषमच्छदा येषां ते अयुकच्छदाः सप्तपर्णास्तेषां गुच्छैस्तवकैः सुगन्धयः शोभनगंधाः गजमदगंधिन इति भावः· अलिभिर्भ्र
मेस्तता विस्तृता गा नगिरो येषां ते अलिभिर्गीयमाना इत्यर्थः· सततं गच्छन्तीति सततगाः सदागतयो वायव इति यावत्· छतमदं जनि
तमदं· अत एव वाकुलीकृतजगत्त्रयं कुर्जः कार्त्तिकः· वाहुलोर्जौ कार्त्तिकिक इत्यमरः· स एव मतंगजस्तमिवापवन् इति यावत्· कौ इति रूपकं तं
निगदन्त इव अथमागच्छतीत्यावेदयन्त इव ववुः· वान्ति स्म· मत्तमातंगगमने एवं विधवायुसंभवादियमुत्प्रेक्षा रूपकालंकारः· ॥५०॥ विग

विगतवारिधरावरणाः क्वचिद्ददृशुरुद्धतसितासितताः· क्वचिदिवेन्द्रगजाजिनकंचुकाः शरदिनीरदिनीर्यदवो दिशः ॥५१॥·

विलुलितामलिलैः शरदंगनां नवसरोरुहकेसरसंभवां· विकिरितुं परिहासविधित्सयां हरिवधूरिव धूलिमुदक्षिपत्· ॥५२॥

तेति· शारदियदवो यादवाः यदुशब्दस्य युशब्दवत्तद्यपसेलक्षणा· जनपदशब्दनामतद्राजलाद्युत्लुगसंभवादितिक्वचिद्विगतवारि
धरावरणाः निवृत्तमेघावरणाः अत एवोद्धतसितासिता केशा उद्धता असिलैर्वा क्षिलता तद्दासिताः श्यामा इत्युपमा· क्वचिन्नीरदिनीर्मे
घवतीः शुभ्राभ्रपटलच्छन्ना इत्यर्थः· अत एवेन्द्रगजाजिनैरावतवर्मतद्वद्वर्कंचुकः· कूर्पासको यासान्ताः इव स्थिता इत्युत्प्रेक्षा दिशो
ददृशुः· उक्तालंकारयोः संसृष्टिः ॥५१॥ विलुलितामिति· शारदेवांगना इति रूपकं अनिलैर्विलुलितां विक्षालितां· नवसरोरुहकेस
रसंभवां धूलिं परागं परिहासविधित्सया नर्मरीतिविकीर्षया· दधातेः सन्नन्तात्स्त्रियामप्रत्ययेटाप्· हरिवधूः विकिरितुं विक्षिप्तुमि

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हरितेति॥ अभिताम्रमुखीअत्र ताम्रमुखी॥ स्वाङ्गाच्चेतिविकल्पात् ङीप्॥ भुकावलिर्महद्रुणोर्द्विविततातहरिप्रियार्थमाकाशेविततातहरिता नांहरिद्वर्णानांविकारोहरितपत्रमयी॥ टिड्ढाणञित्यादिनाङीप्॥ तथाश्ववनद्रुमग्रथिताःमनोरमाःपङ्क्तयोयस्यांसामालाङ्गिवेत्युत्प्रेक्षा॥ मधुरिपोःकृष्णस्यमुदंविततान॥५३॥ स्मितेति॥ महरिः स्मितानिविकसितानिसरोरुहाण्येवनेत्राणियेषांतानिसरोजलानियस्यां तांतथोक्तां॥ अतिसितांगाधवलपक्षायेविहगाहंसास्तैर्हसन्तीम्॥ यमानेवस्थिताघोर्यस्यास्तांतथोक्तां॥ शरैस्तणविशेषैःदन्तुरा लुन्नतदन्तानिहासास्त्रकाशद्दशनानीतियावत्॥ दन्तउन्नतउरजितिउरस्प्रत्ययोमत्वर्थीयः॥ आनिदिङ्मुखारदं सर्वतोमुदितामिवा

हरितपत्रमयीवमहद्रुणोःस्रग्वनद्रुमनोरमपङ्क्तयः॥ मधुरिपोरभिताम्रमुखीमुदंदिविततांविततानभुकावलिः॥५३॥
स्मितसरोरुहनेत्रसरोजलामतिसितांगविहंगहसद्दिवां॥ अकलयन्मुदितामिवसर्वतःसशरदंशरदन्तुरदिङ्मुखाम्॥५४॥
गजपतिद्वयसीरपिहैमनस्तुहिनयन्सरितःपृषतांपतिः॥ सलिलसन्ततिमध्वगयोषितामतनुतातनुतापकृतंदशाम्॥५५॥

कलयतः सर्वत्रनेत्रविकासादिलिङ्गैर्दृष्टामिवामन्यतेत्यर्थः॥ अत्रसरोजहंसशरेषुनेत्रहासदन्तत्वरोपणाद्रूपकालंकारः॥ तेन शात्प्रतीयमानो गनाभेदाध्यवसायात्कृत्वादिमुदितत्वोत्प्रेक्षेतिसंकरः॥५४॥ अथहेमन्तवर्णयति॥ गजपतीति॥ गजपतिःप्रमाणमासांगजपतिद्वयस्यःमहागज प्रमाणाः॥ प्रमाणेद्वयसज्दघ्नञ्मात्रचइतिप्रमाणार्थेद्वयसच्प्रत्ययः॥ टिड्ढाणञित्यादिनाङीप्॥ तथापिसरितस्तुहिनयन्हिमीकुर्वन्॥ तत्करो तीतिणिच्॥ तान्तात्कृत्॥ शत्रादेशः॥ हेमन्तेभवोहैमनः॥ सर्वत्राणखतलोपश्चेतिहेमन्तशब्दात्कृषिकोणप्रत्ययः॥ तकारलोपश्च॥ पृषतांबिन्दूनांपतिः

मल्८

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥मा॰टी॰प॰॥

सर्वदा वियोगिनामुद्दीपयस्यापि वायोर्हेमन्ते वैशिष्ट्यमावष्टे ॥ इदमिति ॥ अनिलो वायुरन्यस्मिन्काले अन्यदा ग्रीष्मादावित्यर्थः सर्वैकान्यत्यादिना दाप्रत्ययः वियोगिनो वियुक्तान् गतिबुद्धीत्यादिना अणिकर्तुः कर्मत्वं वा तनोर्वितनुमित्यर्थः अधीगर्थेत्यादिना कर्मणि शेषे षष्ठी स्मरयतीति यत स्मरतेराध्याने मित्वाद्ध्रस्वत्वं इदं स्मारकत्वमपि महदत्यन्तमयुक्तमेव सहकारिविरहादिति भावः अहो अत्यन्ताकिं चित्करत्वाद्विस्मयः हेमन्ते तु हन्त त्वमप्यस्य सम्भवतीत्याह सतु हिनस्तु तु हिनसहितस्तुसमयो वनाः यौवनयुक्ताः अतएव सोष्माणः सोष्मा पयोधराः येकुचास्ते

इदमयुक्तं महो महद्देवं यद्वातनोः स्मारयत्यनिलोऽन्यदा ॥ सत्सु समयौवनसोष्मपयोधरानहन्तु हिनस्तु हिनस्तु वियोगिनः ॥५६॥

प्रियतमेन यया सह षा स्थितं सह सा सह सा परिरभ्यताम् ॥ अथयितुं क्षणमक्षमतांगना न सहसा सहसा कृतवेपथुः ॥५७॥

मदशमदूयतया धरपल्लवक्षतिरनावरणा हिम मारुतैः ॥ दशनरश्मि पटेन च सीत्कृतैर्निवसितेव सितेन सुभ्रुवी ॥५८॥

यौवनसोष्मपयोधरान्वियोगिनो वियुक्तान् तथा युक्तं वानीफितमितिकर्मत्वं हिनस्तु हन्तु वा संभावनायां लोट् हे मन्तोहिमसहकारात्कृशोको साध्य दुःखोत्पादनसामर्थ्याद्वियोगिमारकत्वमपि संभाव्यते ग्रीष्मादौ तु यादृक् सहकारिविरहात् मारकत्वमप्ययुक्तमित्यर्थः अनाके मारक संबन्धे ऽकैर तिशयोक्तिभेदः सहजकविप्रौढोक्तिः सिद्धयोरातिशययोरभेदाध्यवसाय इति रहस्यम् ॥५६॥ प्रियतमेनेति अगाद्यपर्यायेन महसा इति ऽध्यायमविभागः यत्र सहसेत्येकं पदं सहषा सरोषया यया स्त्रिया कर्त्या प्रियतमेन सह न स्थितम् नपुंसके भावे क्तः ताञ्चीसहसा मार्गशीर्षमासेन मार्गशीर्षसहा मार्ग इत्यमरः कृतवेपथुः जनितकम्पा सती द्वितोथुजित्यथुप्रत्ययः अपूर्वमगाणितमेव प्रियं हसेन सह वर्तते इति सहसा सहास्यामिति अथो हसः हासो हास्यं च इत्यमरः स्वनहसोर्वेति विकल्पादप्प्रत्ययः सहसाशीघ्रं स्वतादिपाठादव्ययत्वं परिरब्धाभिश्लेषात् क्षणमपीत्यर्थः अन्यथाविरस्यात् अतएव सामर्थ्यात् स्वार्थत्वादपेरप्रयोगः अथयितुं वाक्षमतांगना शिथिलीकर्तुं नोत्सहते सोऽर्थः मानिनीमानभञ्जनक्षमोऽयं मास इति भावः कल

( हूत ताये तान् स्मृतस मिद

पयघ्राद्गतेहेतुत्वोत्प्रेक्षणाद्रूपकोत्प्रेक्षयोः संकरः ॥५८॥

॥श्रीहरिः॥ ॥५४॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उत्कमेवार्थं भंग्यन्तरेणाह । छ्रुणोति । भद्रुतयामार्द्दवेन हेतुना हिममारुतैर्द्दूतयापीडितया । दु दु उपतापे इति धातोः ओवादिकाल्कर्म्मणि क्तः । ध्रुणाभ्रताइन्तेव
णावत्या सुतनोः स्त्रिया अधरो लेखवत्तया अधरलेखया कं श्रीकलसीकृतैर्हेतुना स्फुरिताः प्रकाशिता ये दन्तमरीचयस्तन्मयं तद्रूपं स्फुटमावरणं आच्छादनं दधे इव
धृतमुत्प्रेक्षायां । स्थाने कर्म्मणि लिट् ॥५९॥ धृतेति । धृता स्तुषाः करणाः स्तुहिनशीकरा येन तस्य नभस्वतः पवनस्य संबंधिनः तरुलता एवाङ्गुलयः ताभिस्तर्ज्जनानि या
नि तान्येव विभ्रमाः विलासाः पृथुविलासे दृष्टस्पर्द्धितस्य भुजान्तरं भुजमध्यं वक्षःस्थलं निरन्तरमनितया अप्राप्य गाढालिंगनमलभमानयेत्यर्थः । इणः
कर्त्तरि क्तः । वनितया स्त्रिया न विषेहिरे न सोढाः विरहिणः पत्तर्जिता इव नभस्वतो बिभ्यतीति भावः ॥६०॥ हिमेति । स्मरमयं स्मरादागतं स्मरप्रयुक्तमित्य

ध्रुणाभ्रतां सुतनोः कलसीकृत स्फुरितदन्तमरीचिमयं दधे ॥ स्फुटमिवावरणं हिममारुतैर्मृदुतया दुतयाधरलेखया ॥५९॥ धृततुषा
रकणस्य नभस्वतस्तरुलतांगुलितर्ज्जनविभ्रमाः ॥ पृथुनिरन्तरमिष्टभुजान्तरं वनितयामितया न विषेहिरे ॥६०॥ हिमऋतावपिताः स्म
भृशाक्षिदो युवतयः सुतरामुपकारिणी ॥ प्रकटयत्यनुरागमकृत्रिमं स्मरमयं रमयत्यतिविलासिनः ॥६१॥

((र्थः । तस्मादागत इति मयट् । अकृत्रिमम
नुरागं सहजं प्रेम प्रकटयति । प्रकटीकुर्वाणो तत्कार्यं णस्वेदेनेति भावः । अत एव सुतरामुपकारिणी । पुंसां रिरंसाजनना त्वेभ्यः स्वानुरागप्रकाशनाच्चास्य
न्तोपकर्त्रीत्यर्थः । एवंभूते हिमऋतौ हेमन्तेति स्विद् भावमारहितकालेपीत्यर्थः । अत्यक इति सांहितः प्रकृतिभावः । भृशं क्षिदयन्तीति भृशक्षिदः इति सालि
कोक्तिः क्विप् । हेमन्तोपि रागिणां स्वेदहेतुरेवतद्धेतुरागहेतुकत्वादिति भावः । तास्तथाधीरा युवतयो विलासिनः प्रियान् रमयन्ति स्म । हेमन्तस्या(
दीपकत्वादतिपीआक्षमत्वाद्दीर्घरात्रित्वाच्चैभयेच्छासदृशा परमतेत्यर्थः ॥६१॥ ॥६१॥ ॥६१॥ ॥६१॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ मा.टी.ष. ॥
॥ १५ ॥

अर्थशिशिरं वर्णयति ॥ कुसुमयन्नित्यादि ॥ उपवनं वनमित्यर्थः विभक्त्यर्थेऽव्ययीभावः तृतीयासप्तम्योर्बहुलमिति विकल्पादम्भावः फलिनीः प्रियंगुलताः प्रियंगुः फलिनी फली त्यमरः कुसुमयन् कुसुमवतीः कुर्वन् । तत्करोति तदाचष्टे इति णिच् प्रातिपदिकस्य सामग्रीवर्णनं कुसुमयतेर्भ्रमरः अलिनीः भ्रमरीः ...रविन्दैः तत्करोतीति णिचि णाविष्ठवत्प्रातिपदिकस्येति विन्मतोर्लुक् मदयिकाभिर्मदनविजृम्भमाणोऽलिनीः रवैः हुंकारैः ... हुंकृतिः कृतहुंकारः माधुर्यादुद्दीपकत्वादतिशयद्योतनार्थमलिनीति स्त्रीलिंगनिर्देशः शिशिरानिलः प्रियात् युवतीः कोपादिवृत्तमाः योतेः शतरि धातोः ह्रस्वादेशः उगितश्चेति ङीप् युवतीर्वधूः यूनस्तिरिति तिप्रत्ययः

कुसुमयन्फलिनीरलिनीरवैर्मदविकाशिभिराहितहुंकृतिः ॥ उपवनं निरभर्त्सयत प्रियान्वियुवतीर्युवतीः शिशिरानिलः ॥ ६२ ॥ उपचितेषु परेष्वसमर्थतां व्रजति कालवशाद्बलवानपि ॥ तपसि मन्दगभस्तिरभीषुमान्नहि महाहिमहानिकरोऽभवत् ॥ ६३ ॥

वतीर्वधूः यूनस्तिरिति तिप्रत्ययः निरभर्त्सयत् अतर्जयत तर्जितभर्त्सोभ्यामादिकयोरनुदात्तत्वादात्मनेपदम् अत्रवायो अवेतनेऽवेतनधर्माभर्त्सनमुत्प्रेक्षतो सा वालिनिहुंकाराजीवितेति रूपकसंकीर्णव्यंजकाप्रयोगाद्गम्यावः ॥ ६२ ॥ उपचितेष्विति कालवशाद्बलवानपि परेषु शत्रुषु उपचितेषु प्रवृद्धेषु सत्सु असमर्थतां दौर्बल्यं व्रजति यस्मात्तपसि माघमासे तपा माघ इत्यमरः मन्दगभस्तिरपटुरश्मिः अभीषुमानंशुमान् अभीषुः प्रग्रहे रश्माविसमरः करोतीति महाहिमहानिकरः तन्नेतुर्नाभवत् हन्तो हस्तिप्वादिनाहेत्वर्थे टप्रत्ययः विशेषणसामान्यसमर्थनरूपोऽर्थान्तरन्यासः ॥ ॥ श्रीरामः ॥
॥ ६३ ॥ ॥ १५ ॥

१ महामहन्नुपचितस्याहिमस्यहानिंनाप्तं १

हिमहा ...

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अभिषीति · क्षुभितउद्धूतयः सैन्यपरागः सेनारजइव विपांडुरद्युतिः शुभ्रवर्णः यो लोध्ररजश्चयो भुवनान्यभिषिषेणयिषुं सेनयाभिपातुमिच्छ-
न्तं · यत्सेनयाभिगमनेमरोनइच्छिवेणानमित्यमरः · सत्यापपाशेत्यादिना सेनाशब्दात्सिद्धिपिसनाशंसभिक्षउरित्युप्रत्ययः · स्थादिष्व-
भ्यासेन चाभ्यासस्येति धात्वभ्याससकारयोः षत्वं · स्मरमाख्यातेव ख्यातवान् इत्युत्प्रेक्षा · वक्षिउः ख्यात्र · अस्यतिवक्तिख्यातिभ्यो
ङितिच्लेरङादेशः · अयं लोध्ररजश्चयो दिशस्तिरयन्तिरस्कुर्वन्नास्तिरः शब्दात्तत्करोतीति णयन्ताच्छतृ · शत्रादेशः · णाविष्ठवद्भावे टिलोपः ·१

अभिषिषेणयिषुं भुवनानि यः स्मरमिवाख्यत लोध्ररजश्चयः · क्षुभितसैन्यपरागविपांडुरद्युतिरयं तिरयन्नुद्
भूद्दिशः ॥५४॥ शिशिरकालमपास्य गुणोस्य नः क इव शीतहरस्य कुचोष्मणः ॥ इति धियास्तरुषः परिरेभिरे
घनमतो नमतोनुमताः प्रियाः ॥५५॥

उद्भूत् ॥५४॥ शिशिरेति ॥ शिशिरकालमपास्यापहायपशीतं हरतीति शीतहरस्यपहरतेरनुद्यमाने जित्यच्प्रत्ययः · नोस्माकं अ-
स्य कुचोष्मणः कुचोष्मकस्य इव गुणः किं फलं संपाद्यत इति शेषः · गम्यमानक्रियापेक्षया कर्मनिर्देशः · इवशब्दो वाक्यालं-
कारे · इति अतोस्मिन् शिशिरकाले सार्वविभक्तिकस्तसिः · प्रियाकान्ताश्च अस्तरुषो निरस्तरोषाः सन्तो नमः प्रणमतः · अनुमतास्व

प्रियान् · घनं निबिडं परिरेभिरे · आश्लिष्टवत्यः · इति धियेति सुरवार्थस्य परिरंभस्य
कुचोष्मसाफल्यार्थत्वमुत्प्रेक्ष्यते · व्यंजक
प्रयोगादुत्प्रेक्षा [illegible] ॥५५॥ · ॥५५॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



अधीति॰ लवंगे अधिलवंगं॰ विभक्त्यर्थेऽव्ययीभावः॰ सुमनसां पुष्पाणां दलेषु तलन्ति प्रतिष्ठन्तीति सुमनदलतालिनः॰ ताच्छील्ये णिनिः॰ अमी अलिनो मधुपाः॰ उत्तमापरागेणान्तर्वेन स्वमलीनाः मलीमसाः॰ पापिनश्च कृताः मलिनिताः इति हेतोः पुरोग्रे सपदि कुन्दलतामाध्यवहन्ती॰ माध्यं कुन्दमित्यमरः॰ दलता विकसता प्रसवेन निजकुसुमेनाट्टहसत्॰ उपहासस्फुटमिसूत्प्रेक्षा॰ उपस्वलांगतारकापिनं सपत्नीं हसन्तीति भावः॰ कुन्दकुसुमस्य धावल्यात् हासत्वेनोत्प्रेक्षा॰ ॥६६॥ अथ यमकविशेषकौतुकितया कविः पुनर्दशभिः श्लोकैर्वर्णयन्नादौ वसन्तं वर्णयति॰

अधिलवंगममी रजसाधिकं मलिनिताः सुमनोदलतालिनः ॥ स्फुटमिति प्रसवेन पुरोऽहसत् सपदि कुन्दलता दलतालिनः ॥६६॥ अतिसुरभिरभाजि पुष्पश्रियामतनुतरतयेव सन्तानकः ॥ तरुणपरभृतः स्वनं रागिणामतनुत रतये वसन्तानकः ॥६७॥

अतिसुरभीरिति॰ अतिसुरभिरत्यन्तसुगन्धिः सन्तानकः कल्पवृक्षः पुष्पश्रियां पुष्पसंपदां॰ अतनुतरतया महत्तत्वेन॰ अतनुशब्दात्तरप्रत्ययः॰ अभाजि अभंजीवेत्युत्प्रेक्षा॰ तथा नष्ट इत्यर्थः॰ भंजेश्च चिणीति विभाषा नलोपे उपधायां [illegible] विणो लुक्॰ किं च वसन्तस्यानको वसन्तानकः दुन्दुभिरिति रूपकं तरुणपरभृतस्तरुणकोकिलो रागिणां कामिनां रतये रागवृद्ध्यर्थं स्वनमतनुत मधुरं चुकूजेत्यर्थः॰ प्रभावृन्तं स्वरस्तोरावरतिर्नेनोरीप्रभेतिलक्षणात् ॥६७॥ ॥६७॥ ॥६७॥ ॥६७॥ ॥६७॥

॥ श्रीरामः ॥
॥ ९६ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नेति॥ अरमत्यन्तमिष्टं विक्षिप्तेषु मधुषु मकरन्देषु वा सेवसतौ रसो रागो यस्याः सा इष्टमधुवासरसा मधुपानप्रियेत्यर्थः अतएव वा
लिनामालिः भृङ्गश्रेणिः युवतिमाननिरासदक्षं कुशलं उद्दीपकत्वादिति भावः मधुवासरेषु वसन्तादिनेषु सारं श्रेष्ठं मधु(
वासरसारं नत्का लभ्यतामित्यर्थः कृतमहत्कारं अतिरागादतिलोल्याद्गुञ्जन्तं हा तं नाक्षमत क्षमे भौवादिकात्मनेपदम्

नोज्झितुं युवतिमाननिरासे दक्षमिष्टमधुवासरसारम्॥ चूतमालिरलिनामतिरागाद्दक्षमिष्टमधुवास
रसारम्॥६८॥ जगद्वशीकर्तुमिमाः स्मरस्य प्रभाविनीकेतनवैजयन्तीः॥ इत्यस्य तेने कदलीर्मधुश्रीः प्रभा
विनीकेतनवैजयन्तीः॥६९॥

जगतां वशनम्॥६८॥ जगदिति॥ प्रभावयतीति प्रभाविनी संपादयित्री कर्त्तरि ल्युट् ङीप् मधुश्रीः वसन्तश्रीः जगद्वशीकर्तुं
प्रभोः समर्थे अस्य स्मरस्य अनीके सैन्ये जयन्तीति वीरः केतनवैजयन्तीः ध्वजपताकाः तनवै विस्तृतानि तनोतेः प्राप्तका
ले लोट् टेरे त्वं अतएव कारः आउत्तमस्य पिच्च आट् श्वेति शृदि इति मनीजमेतिशेषः रम्भाः कदलीरम्भाः तत्कृत्ये सेनोविततस्ता
रः कदलीवारणा तुङ्गरम्भा मोचांशुमत्फलादत्यमरः कदलीषु कामवैजयन्तीत्वोत्प्रेक्षा वृत्तमुपजातिः॥६९॥ ॥ ॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मा.टि.ष.
७

॥८॥

स्मरेति । असती दुष्टा स्मरागो न कामेन निमित्तेन योगो रागो यस्यां सा तमस्थीत मिस्रा तमस्तोमः । तमिस्रां तिमिरे गतमिस्रा तु तमस्तती । कृष्णपक्षनिशायां च इति विश्वः । रवेर्वपुर्मण्डलं परितस्तार आववे । अदृनि अतिप्रियं जनयामासेत्यर्थः । परि पूर्वात् स्तृणातेर्लिट् । अवश्यं सत्यमिसत्यर्थः । कुतः परितः समन्तात् तारा येषु तथाविधो रवः कोकिलेषु सति कुजति सति इत्युद्दीप कोक्तिः । स्त्री स्त्रियश्चेत्यर्थः । आतावेकवचनं द्विवाचिति व्यधिकरणमपि । सप्तम्यर्थे तृतीया । वशंगतो वश्यः । वशंगत इति यत्प्रत्ययः । न वश्यमवश्यं वशं गतमपीत्यर्थः । प्रियमाप स्वयमभिससारेत्यर्थः । जगद्रागमयं तमिस्रापि वा मम वशगा जातमिति वा ध्रुवं वा मम वशगं ध्रुवं वा मम वशगच्छते । त

स्मररागमयी वपुस्तमिस्रा परितस्तार रवेरसत्यवश्यं । प्रियमाप दिवापि कोकिले नभ्री परितस्तार रवेरसत्यवश्यं ॥१०॥

वपुरम्बुविहारहिमं अविनोदहिमं कमनीयतरागमिता । रमणेन रमाप्यविरांशुलता हविरङ्कमनीयतरागमिता ॥११॥

नवमंशु गतिमिरा तिरोहित भानुमण्डला भास्मिन्य इति रूपकोऽनुप्रासोऽथ मोपमिक्रिया निमित्ता परिस्तारक्रिया ...... संकरेव रूपो श्लेषा ॥ अवश्यमिति व्यञ्जकप्रयोजका ह्रस्वा ॥ औपच्छन्दसिकं वृत्तम् । विषमे ससजा गुरुः समे सभरा येन पदान्यौपच्छन्दसिकमिति लक्षणात् ॥१०॥ अथ कय श्लोकमाह । वपुरिति । अविनाशोऽप्येकान्तप्रयोजकः कर्ता । अम्बुविहारेण जलक्रीडयादिश्लेषशीतलम् अतएव रतिरम्बुकलं वपुर्दहम् । गमिता प्रापिता । गति बुद्ध्यादिना कर्तुः स्मरणाः कर्मत्वं प्रधानकर्मण्याख्येयेलादानां दुहिकर्मणामिति । अभिहितत्वेन । आतश्च वरमणीयतया कमनीयतरागं विशांशुलतेवाविरांशुलतात विद्युल्लता तस्याः हविरिव हविर्यस्याः सा आविरंशुलता हविः इत्युपमा हृयंतथा रागमनुरागमिता प्रापिता । रमणः कर्तरि कर्ता ।

श्रीरामः

७

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ द्वाभ्यां वर्षर्त्तुं वर्णयति · मुदमित्यादि · अइह भुवां मेघप्रभवानां अपां लाभे वर्षे सतीत्यर्थः · सहसा मयूरा मुदमानन्दं अयन्तालभन्त · अय गतौ (
लङि · अडजादीनामित्याडागमे वृद्धिः · नदीपपाट · नदप्रावहन्तीत्यर्थः · अटपट गतौ लिट् · अतादेकवचनं · अलिनामं गेणा सहसायम्भवः
सायन्तनः · सायंचिरेत्यादिना ट्युल् प्रत्ययः · तुडागमश्च · स चासौ दीपश्चेति दृत् · पाटलाभे पाटलप्रभे · स्तुपमालंकारः · तस्मिन् शिलीन्ध्रे
कन्दलीकुसुमे अलिनी अरमत · अत्र मयूरमोदप्राप्त्याघनेकर्तृकक्रियायोपपद्यादिनाधिकारणक्रियासमुच्चयतद्रूपः · समुच्चयलङ्कारभेदः · गुण
क्रियायोगपद्यसमुच्चय इति सामान्यलक्षणम् · ॥ औपच्छन्दसिकं वृत्तम् ॥१२॥ कुटजानीति · शिखरीन्द्रसमयावेवतकाद्रेः समीपे · (

मुदमिह भुवामपां मयूराः सहसायंतनदीपपाटलाभे ॥ अलिनीरमतालिनीशिलीन्ध्रे सहसायंतनदीपपाटलाभे ॥
॥१२॥ कुटजानि वीक्ष्य शिखिभिः शिखरीन्द्रसमयावनौघनमदभ्रमराणि · गगनं वगीतनिनदस्य गिरेर्द्रैः समयावनौ
शि घनमदभ्रमराणि ॥१३॥

अभितः समयेत्यादिना द्वितीया · अवनौ प्रदेशे घनमदाभ्रमराये घृतानि घनमदभ्रमराणि कुटजानि कुटजपुष्पाणि वनौघेन पयः पु त्रि २
टेन नमस्सम्राणि मेघायवस्मि तद्ध्वनौ घनमदभ्रपथः कीलालममृतं जीवनं भुवनं वनमित्यमरः · गगनञ्च · वीक्ष्य शिखिभिर्मयूरैः गी
तनिनदस्य गानध्वने समयाकुलया · तुल्यार्थैरित्यादिना वैकल्पिका षष्ठी · निरावाधकेकयेत्यर्थः · उद्धैरणितारणितं · रणशब्दे भावे ल्युट्
कु विन्तो लुक् · कुटजादित्वं · ममत्वमाभावादहसंज्ञा कुटजाख्यमिति लक्षणात् ॥१३॥ अथ त्रिभिः शरदं वर्णयति ॥ अमीष्विति ॥ (
न २

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi



कामयत इति कामयती· कामयित्री· कमेः कर्मणि यितामीकः कमनः कामनो भीकस्स्मरः· कमेः कर्त्तरि ल्युटि ङीप्· आतो वेकवचनं· अमी याः इत्यन्ताः काशाः आ
श्ववालाधस्मिन्· अमीवकाशे काले शरदीत्यर्थः· मनोजन्मसुखोदयेषु कामसुखाविर्भावेषु समुद्धता आशा अभिलाषो येन तं प्रताशं अभीप्रियं वि
लक्विरकाले शारदीत्यर्थः· मनोजन्मसुखोदयेषु कामसुखसमृद्धिहेतुषु तासामाशं काशं कोशो यस्मिन्कर्मणि तत्समुद्धताशं कं विलध्वं यथा तथा·
आसामाध प्राप्य मुदा सह वर्त्तत इति समुदामानन्दामतीत्यर्थः· वकाशे विललासे· अगसमुद्भ काशा इति षोषितः· शाखिनिभ्यस्तद्वोत्व्यभावेन वंधनात्से

अभीष्टमासाद्य चिराय काले समुद्धताशं कमनीयकाशे । योषिन्मनोजन्मसुखोदयेषु समुद्धताशं कमनीयकाशे ॥ १४ ॥
स्तनयोः समयेन याङ्गनानामभिनद्धारसमानसारसेन । परिरंभरुचिं ततिर्जलानामभिनद्धारसमानसारसेन ॥ १५ ॥

क्षमालंकारः ॥ [ ] रसमावतक्षमासंत्रकाशमानानिवन्यते· रसवस्त्रपदुर्जन्विसमाहितानीतिलक्षणात्· प्रत्नमुपजातिः ॥ १४ ॥
स्तनयोरिति· रसमानाः कूजनशीलाः· ताच्छील्यवयोवचनशक्तिषु चानश् इति ताच्छील्ये चानश्· रसतेः परस्मैपदित्वान्नशानच्· ते सारसाः पक्षिविशे
षाः यस्मिन्तेन रसमानसारसेन समयेन शरत्कालेनेत्यर्थः· सारसानां तत्रैव संभवात्· सारसो मैथुनीकामी गोनर्दः पुष्कराह्वय इत्यमरः· अंगनानां
स्तनयोः जलानां ततिः शारदाभ्रजन्मा स्वेदविन्दुसन्दोहः· अभितो नद्धः न प्रतोरपिपूर्वात्क्वेर्मतः क्तः· नहो धः इति धत्वं· हारसमा· मुक्ताहारसमा·
मुक्ताहारतुल्या· कुचमंडलमंडनायमानोभितिभावः· सा जलततिः रसेनरागेण हेतुना वलीयसेतिभावः· परिरंभरुचिमालिंगनेच्छां नाभिनत्

पार

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जातेति॰ या स्त्री अनुवनान्तं विभक्त्यर्थेऽव्ययीभावः मधुरेणाव्यग्रेण सारसिकाकुरुतेन सारस्य एव सारसिकाः सारसाङ्गनाः कासूर्वस्थितं ला॰
सां काकुरुतेन विकृतशब्देन॰ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः॰ काकुश्च तद्रुतं च तेन कामिकामकल्पां संतो देवदत्तरतिवर्जि
तप्रयोगः॰ कान्ते प्रिये जातप्रीतिः जातस्नेहा अभूत्॰ रसिका रागवती सेत्यर्थः॰ अतः परं निष्ठनाधि तिष्ठन्प्रत्ययः॰ सा कान्ती एकान्ते रहसि तस्य

जातप्रीतिर्यां मधुरेणानुवनान्तं कामिकान्ते मारसिका काकुरुतेन॥
तत्संपर्कं प्राप्य पुरो मोहनलीलां कामिकान्ते सारसिका काकुरुतेन॥१६॥

कान्तस्य संपर्कं प्राप्य पुरः पुरुषप्रेरणात् पूर्वमेव कां मोहनलीलां सुरतक्रीडां न कुरुते सर्वा विस्त्री सर्वान् अपि सुरतविशेषान् कामतंत्रप्रसिद्धान्॰
विलंबवकारेति शृंगारस्य पराकाष्ठाप्राप्तिरुक्ता अन्तमप्रबन्धतमः॥१६॥ अथ केन हेमन्तं वर्णनमाह॥ कान्तेति॰ सहते इति सहः पचाद्यच्॰
स्मरस्य सहः कामोद्दीपक इत्यर्थः॰ तेनांशुवनतोषितः॰ तेन स्मारसहासवतोषितेन॰ अत एवासहामानवसन्तशातिरसहासवतारागहासवताश्च तत
एव प्रेमा[illegible]मनः सुः पुंस्त्वाविनेषु उषितेन वसता॰ वसतेः कर्तरि क्तः॰ वसतिक्षुधोरितीडागमः॰ गतिबुद्धीति सूत्रेणैव कारा द्वर्तमानार्थाप्रकान्ते

मेरेयमासवः सीधुरित्यमरः॰२

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ भा॰टी॰प॰ ॥ धंजनः तेन कान्ताजनेन॰ जातावेकवचनं॰ रहसि प्रसभं बलात् गृहीतकेशौ आकृष्टशिरोरुहे॰ तौ सुरते रमन्ते भवौ हिंस्यस्ताम् हे पनीषुषिप्राथीय

॥ १९ ॥ सीत्वणीति भावः॰ सर्वत्र आगवतलोपश्चेति रमन्ते शारदगणसमयः तकारलोपश्च॰ टि हृता गात्रित्यादिनाऽ ङीप्॰ र जनि षुकेषु वानः॰ शोरते स्म॰

स्वपंतिस्मनकेपीत्यर्थः॰ लट् स्मेति भूते लट्॰ एतेनभ्यति भूषितः भंगारइतिमजपतेः॰ वसन्ततिलका वृत्तं॰ ॥११॥ अथैकेन गिरिशिरांव

गीयति॰॥ गतवताभिति॰ असकलामलपद्यवलीलया असकलाश्च समग्रविलासिनो अमलानिर्मलाश्च ये पद्याः स्तेषां लीलया॰ स

का-ताजनेन रहसि प्रसभं गृहीतकेशौ रते स्मर सहास वतो वितेने॰॥ प्रेमणा मनः सुंदजनीषु विहमनीषु केशरते स्मर सह

सवतो वितेने॰॥११॥ गतवताभिव विस्मयमुच्चकै रसकलामलपद्यवलीलया॥ मधुकृतां मसकृत् गिरमावलीरसकलामल

लपद्मवलीलया॰ ॥१८॥॰

कपयेत्यर्थः॰ विस्मयगतवताभिव स्मिता नाभिवस्तुत्प्रेक्षा॰ मधुकृतां संबन्धिनीषु लवलीषु लताविशेषेषु लयोलयनस्थितिर्यस्याः सा

लवलीलया आवलिपंक्तिः रसकलां रसेन मध्वास्वादेन कलामव्यक्तमधुरां॰ ध्वनौ तु मधुरास्फुटे कलरस्समरः॰ गिरं वाचमसकृ ॥ श्रीः ॥

दुच्चकै रलपत॰ मधुमदहेतुकस्य मधुकालापद्मवलीलया जनितविस्मयहेतुकत्वमुत्प्रेक्षत इति गम्यमहत्प्रेक्षाद्रुतविलंबितं वृत्तं॰ ॥ १९ ॥

॥१८॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

॥ मा॰टी॰ष॰ ॥ कुर्वन्तमिति। इतीत्थं पुष्पैरेवातिभरेण महाभारेण नतैर्नतेनवागौरवेण नगान्वृक्षानवाञ्चः नीचान्भवतीत्यवाञ्चः नम्रान्। अंचेरवपूर्वात्क्विन्
॥ २० ॥ गित्यादिना क्विन्प्रत्ययः। कुर्वन्तमलिनां गानवाञ्चः गीतध्वनेः ओंकारस्य धनविरामम् अविरामं च कुर्वन्तं समस्तमृतुं सर्वानृतून् अ
नुसानु सानुषु। विभक्त्यर्थेऽव्ययीभावः। विभ्रति विभ्राणोऽहमिगिरौ रैवतके विहर्तुं श्रीमान्स्मः हरिः समपूरणि गिरिकेकयाम्रवा

कुर्वन्तमित्यतिभरेण नगानवाञ्चः पुष्पैर्विराममलिनां च न गानवाञ्चः॥ श्रीमान्समस्तमनुसानु गिरौ विहर्तुं
बिभ्रत्यमैच्छदसमपूरगिरौ विहर्तुं॥ ७९॥ ॥ इति श्रीशिशुपालवधे महाकाव्ये षड्ऋतुवर्णनो नाम ष
ष्ठः सर्गः॥ ६॥ ॥

दिष्टैरितः भगवन्निह विहारणात् ऋतुगणमनुगृह्णातीति प्रार्थितः इत्युत्प्रेक्षा। वंशस्थप्रयोगात्प्राग्वसन्ततिलकावृत्तम्। ॥ श्री:१ ॥
॥ ७९ ॥ ॥ इति श्रीमत्पदवाक्यप्रमाणपारावारीणश्रीमहामहोपाध्यायकोलवलमल्लिनाथसूरिविरचिते माघव्या ॥ २० ॥
ख्याने सर्वंकषाख्याने षष्ठः सर्गः॥ ६॥

Jagannath Bhattarai Collection. Nagarjun-7, Kathmandu, Nepal

This PDF you are browsing is in a series of several scanned documents containing the personal colleciton of Jagannath Bhattarai ji from Kathmandu, Nepal.

CV:

Jagannath Bhattarai
Date of Birth: 31 December 1960
Place of Birth: Kathmandu, Nepal
Address: Nagarjun (Ramkot), Kathmandu

Educational Qualifications
Bachelor of Science (B.Sc.) – Major in Biology
Master's Degree – Sociology & Anthropology
Shastri (Ongoing) – Balmiki Vidyapeeth

Professional Experience
Government School Teacher (Madhyamik Pratham Shreni)
Taught at Secondary Level (Madhyamik)
Taught at Higher Secondary Level (Uchcha Madhyamik)
Served as Head Teacher
Led academic and administrative development
Strengthened institutional performance and student outcomes

Areas of Interest
Sanskrit Vyakaran
Spiritual & Philosophical Studies
Educational Leadership

Digitization by eGangotri Trust
Funding by MIDF, New Delhi